नं० ६१८-घ

निर्णयसिन्धुः (धर्मशास्त्रम्)

नं० ५१७-घ

(पत्राणि ०२९०) (अपूर्णम्)

कर्त्ता कमलाकर भट्टः

निर्णयसिंधुः प [redacted] २६ १४४

॥ॐ॥ स्वस्ति श्रीगणेशाय नमः॥ कारुण्यैकनिकेतं रामं सीतालतायुतं। विश्वामित्रान्ववायप्रततिसमालंबशाखिनं वंदे।१।
लक्ष्मीसहायं कल्पद्रुतलरं जितगोकुलं। वर्हापीडं घनश्यामं महः किंचिदुपास्महे।२। यत्पादसंस्मृतिस्सर्वमंगलप्र
तिभूर्मता। तान्भट्टरामकृष्णाख्यान् श्रीमातचरणान्नुमः।३। सर्वकल्याणसंदोहनिदानं यत्पदद्वयं। द्युनदीसोदरीं न
वामुमाख्यां नौमि सादरं।४। विद्युन्माधवपादाब्जरोलंबीकृतविग्रहं। ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे।५। हेमा
द्रिमाधवमते प्रविचार्य सम्यगालोच्य तत्वमथ तीर्थकृतां परेषां। श्रीरामकृष्णतनयः कमलाकराख्यः। काले यथा कोटिप.
मति विनिर्णयमातनोति।६। संति यद्यपि विद्वांसस्तन्निबंधाश्च भूरिशः। तथाप्यमुं ब्रुवे दग्धी केचिद्धित्तातु मीश
ते॥७॥ ॥तत्र संक्षेपतः कालः षोढा। अब्दोऽयनमृतुर्मासः पक्षो दिवस इति। तत्राब्दो माधवमते पंचधा। सावन
सौरचांद्रनाक्षत्रबार्हस्पत्यस्य इति। गुरोर्मध्यमराशिभोगेन बार्हस्पत्यः। स च ज्योतिःशास्त्रे प्रसिद्धः। हेमाद्रिस्त्वस्य
योर्धर्मशास्त्रेऽनुपयोगाच्चतुर्विधमाह। तत्र वक्ष्यमाणैः सावनादिद्वादशमासैस्तत्तदब्दः। मलमासे तु सति
षष्टिदिनात्मक एको मास इति द्वादशमासत्वमविरुद्धम्। तथा च व्यासः। षष्ट्या तु दिवसैर्मासः कथि
तो बादरायणैरिति। तत्र चांद्रोऽब्दः षष्टिभेदः। तथाह गर्गः। प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः। अंगिराः श्रीमु २

त्तो भावो युवा धाता तथैव च। ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः। चित्रभानुस्सुभानुश्च तारणः पार्थिवो
ऽव्ययः। सर्वजित्सर्वधारी च विरोधी विकृतः खरः। नंदनो विजयश्चैव जयो मन्मथदुर्मुखौ। हेमलंबो विलंबोथ वि
कारी शार्वरी प्लवः। शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ। प्लवंगः कीलकः सौम्यस्साधारण विरोधकृत्। प
रिधावी प्रमाथी च आनंदो राक्षसोनलः। पिंगलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती। दुंदुभी रुधिरोद्गारी र
क्ताक्षः क्रोधनः क्षय इति। षष्टिज्योतिषे गुरोर्मध्यमराशिभोगेन प्रभवादीनां माघादौ प्रवृत्तिरुक्ता तथापि
प्रभवादीनां चांद्रत्वमप्यस्ति। चांद्राणां प्रभवादीनां पंचके पंचके युगमिति माधवोक्तेः। तेन चांद्रः प्रभवा
दिश्चैत्रसिते प्रवर्त्तते। बार्हस्पत्यस्तु माघादौ। तयोर्विनियोगो ज्योतिर्निबंधे ब्रह्मसिद्धांते। व्यावहारिकसंज्ञोयं
कालः स्मृत्यादिकर्मसु। योज्यः सर्वत्र तत्रापि जैवो वा नर्मदोत्तरे। आपस्तंबेन: स्मरेत्सर्वत्र कर्मादौ चांद्रं संव
त्सरं सदा। नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तितेति। अयनं तु सौरं ऋतुत्रयात्मकं। सौरं तु [redacted]त्रितयं
षड्दिक्ष्ययनमिति दीपिकोक्तेः। तद्द्विविधं। दक्षिणमुत्तरं चेति। कर्के संक्रांतिर्दक्षिणं मकरे तु। अनयोर्विनियो
गो हेमाद्रौ नरसिंहे सत्यव्रतः। देवतारामवाप्यादि प्रतिष्ठोदङ्मुखे रवौ। दक्षिणायनमुखे कुर्वन्न तत्फलमवा।

शुभात्। वैखानसः। मात्स्यभैरववाराहनारसिंहत्रिविक्रमाः। महिषघ्नसुरहंत्री च स्थाप्या वै दक्षिणायने॥ वै-
ष्णवोऽप्यर्थो। ननु दक्षिणायन एवेति नियमः। पूर्ववचने क्वचिद्दक्षिणायने निषिद्धत्वाद्देवप्रतिष्ठाया देवबि-
२ म्बप्रतिप्रसवात्। रत्नमालायां। गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वम्। सौम्यायने क-
र्मशुभं विधेयं यद्गर्हितं तत्खलु दक्षिणे चेति। अस्यापवादः काश्यां खेटे। सदा कृतं चास्तु सदा चास्तु तरायणे
॥ सदा महोदयश्चास्त्र कार्यं पानिव सतां सतां। इत्ययने। ऋतुर्मासद्वयात्मा। मलमासे तु मासद्वयात्मक एको
मासस्तेन मासद्वयात्मकत्वमविरुद्धं। स द्वेधा। चान्द्रः सौरश्च। चैत्रारंभो वसंतादिश्चान्द्रः। मीनारंभो मेषारं-
भो वा सौरः। मीनमेषयोर्मेषवृषयोर्वा वसंत इति बोधायनोक्तेः। अनयोर्विनियोगमाह त्रिकांडमंडनः।
श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रे षडृतुषु। तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतं। सद्विविधोऽपि बोद्धा
। वसंतो ग्रीष्मो वर्षा शरद्धेमंतः शिशिर इति। इति ऋतुः। मासश्चातुर्धा। सावनः सौरश्चान्द्रो नाक्षत्र इति। त्रिंश-
द्दिनः सावनः। अर्कसंक्रांतेः संक्रांत्यवधिः सौरः। यद्यपि हेमाद्रिमाधवकालादर्शादिषु लोचनेन मेषसंक्रांत्या
समाप्तायाममावास्याकत्वं चैकत्वमिति लक्षणाच्चैत्रमेषसंक्रांतेश्चैत्रत्वं प्रतीयते। तथापि मेषसंक्रमे दर्शांत २

येसतिवैशाखस्यैवाधिक्यात् सर्वमावित्वेन मीनस्यैव तु चैत्रत्वं युक्तं। एवं मेषादयो वैशाखाद्याः। अतो मीनसंक्रां
तिमध्यस्य पौर्णमासीकत्वं। आद्यतिथिकत्वं वा चैत्रत्वनिमित्तं लक्षणात् मीन एव सौरश्चैत्रः। एवं वैशाखादयोपि मेषा
द्यास्तेयाः। अथ सौरमासप्रसंगात् संक्रान्तिनिर्णय उच्यते। तत्र सर्वतो परतोपि संक्रमात्तु पुण्यकालघटिकास्तु षो
डशेति सामान्यतः पुण्यकालस्सर्वैरुक्तः। विशेषस्तूच्यते। अत्र मामकाः संग्रहश्लोकाः। प्राक्पूर्वा दश पश्चाद्द्वितः षड
वपि स्तद्वत्पराः पूर्वे तत्स्त्रिंशत्षोडश पूर्वतो प्यपरतः पूर्वाः पराः स्युर्दश। पूर्वाः षोडश चोत्तरा ऋतुमुखे वः पश्चात्तव
वेदाः पुनः पूर्वाः षोडश चोत्तराः पुनरथो पुण्यास्तु मेषादितः। अस्यार्थः। मेषे प्राक् पंच दश घटिकाः पुण्यकालः।
वृषे पूर्वाः षोडश। मिथुने परः षोडश। कर्के पूर्वास्त्रिंशत्। सिंहे पूर्वाः षोडश ~~धनुषि परः षोडश~~ कन्यायां पराः
षोडश। तुलायां प्राक्पूर्वा दश। वृश्चिके पूर्वाः षोडश। धनुषि परः षोडश। मकरे चत्वारिंशत्पराः। इदं च हेमाद्रिमते
नोक्तं। माधवमते तत्र पराः विंशतिः पुण्याः। कुंभे पूर्वाः षोडश। मीने परः षोडशेति।१२। या पुनरसौ पुण्यतमा माम
योक्ता सा यदि भवेत् सा यदि सायदि सापि पूर्वा। पूर्वा तु या प्रोक्ता यदि सा दिमाने सा पुनरात्रि निषेधतः [illegible]। अर्वाग्दिनार्धी
घाद्य दि संक्रमः स्यात् पूर्वेह्नि पुण्यं परतः परेह्नि। आसन्नयामद्वयमेव पुण्यं निशीथमध्ये तु दिनद्वये स्यात् राक

कैरूखेप्येवमितिह्युवाच हेमाद्रिःसूरिरप्यतथापरार्कैः। क्रमशः प्रदोषे यदि वार्द्धरात्रे परे ह्निपुण्यं त्वथ कर्कटस्थेतःप्र
3 भातकाले यदि वा निशीथे सर्वे ह्निपुण्यं त्विति माधवार्यः। अत्र मूलवचनानि माधवपरार्कहेमाद्र्यादिषु
द्रष्टव्यानि। सर्वासु संक्रान्तिषु दानविशेषो हेमाद्रौ दानखण्डे उक्तः। विष्णुधर्मोत्तरे। मेषसंक्रमणे भानोर्मेष
दानं महाफलं। वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च। वस्त्रान्नपानदानानि मिथुने विहितानि तु। घृ
तधेनुप्रदानं च कर्कटे विविधिष्यते। सुवर्णछत्रदानं सिंहे विविहितं तथा। कन्याप्रवेशे वस्त्राणां वे
श्मनां दानमेव च। तुलाप्रवेशे धान्यानां गोरसानामपीष्टदं। अन्नकोचलिते भानौ दीपदानं महाफलं।
अन्नकी वृश्चिकः। धेनुःप्रवेशे वस्त्राणां यानानां च महाफलं। झषप्रवेशे दारूणां दानमग्नेस्तथैव च।
कुंभप्रवेशे दानं तु गवामंबुतृणस्य च। मीनप्रवेशे स्नानानां माल्यानामपि चोत्तममिति। अत्र उपवास
माह हेमाद्रावापस्तंबः। अयने विषुवे चैव त्रिरात्रोपोषितो नरः। स्नात्वा पस्त्वर्चयेज्जानुं सर्वकामफ
लं लभेत्। अशक्तौ तु हस्यति हः। अयने संक्रमे चैव ग्रहणे चंद्रसूर्ययोः। अहोरात्रोषितः स्नात्वा स 3

र्वेणावैः समुच्यते। अत्रोपवासः संक्रांतिदिने। दानानितु पुण्यकालदिन इत्याचार्यचूडामणिः। विधिला
घवात्पुण्यकालदिनएवोभयमितिवृद्धाः। इदंच पुत्रिगृहस्थातिरिक्तविषयं। आदित्येहनि संक्रांतौ ग्र
हणेचन्द्रसूर्ययोः। उपवासोनकर्त्तव्यः पुत्रिणागृहिणासदेति जैमिनिवचनात्। अत्रआद्यमुक्तं हेमा
द्रौविष्णुधर्मे। श्राद्धं संक्रमणेभानोः प्रशस्तं पृथिवीपते। अपरार्के रविष्णुः। आदित्यसंक्रमं चैव विषुवं चा
यनद्वयं। जन्मर्भमभ्युदयश्च। एतांस्तु श्राद्धकालान्वै काम्यानाह प्रजापतिरिति। यदा द्वादशादिनैरवाग
यनांशप्रवृत्तिर्भवति तदापुण्यंवैजुमयनग्रहणं। अन्यथा संक्रमेणसिद्धेरयनग्रहणंव्यर्थं स्यादित्यप
रार्कः। हेमाद्रावपिगालवः। अयनांशकतुल्येनकालेनैवस्फुटं भवेत्। मृगाककर्कादिगेसूर्ये यास्मोदग
यनेसति। तदासंक्रांतिकालेस्युरुक्ताविष्णुपदादय इति। अयनांशाक्लृप्तिरूपे संक्रांतिकालेपि तत्र
पुण्यंपुण्यकालादित्येयमितिस एवव्याचख्यौ। तच्चमेषायनेद्वायननिमित्तादिसर्वं चन्द्रेयं। माधवीयेपि
जाबालिः। संक्रांतिपुण्यकालस्तुदीयेष्वयनेतथा। अयनेविंशतिः पूर्वामकरेविंशतिः परा इति। मक

रायणे द्वर्वा विंशद् घटिकाः पुण्याः । मकरसंक्रांतौ तु पश्चाद् विंशतिः पुण्याः । अन्यत्रायने तत्संक्रांतिवत् । विष्णुपदादयः अवक्रांते
५ तेन तत्समयुक्तं पुण्यकालादितत्रापि तेयमिति स एव व्याचख्यौ विष्णुपदादिस्वरूपं दीपिकायामुक्तं । हर्य्यंघ्रिर्वृषसिंहवृश्चिकक
घटे चक्रैः स्वयः संक्रमः कन्यामीनधनुर्न्ने युग्मे षडशीत्यास्तु तुलामेषयोः । श्रो कं तविषुवे वे ऽयनमुदक्कार्कटके दक्षि
णमिति । हर्य्यंघ्रि विष्णुपदं । न युग्मिषुतं । अत्र च पिंडरहितं श्राद्धं कुर्यात् । तथा चापरार्के मात्स्ये । अयनद्वितये श्राद्धं वि
षुवद्वितये तथा । संक्रांतिषु च सर्वासु पिंडनिर्वपणादृत इति । श्राद्धमूलपाणिस्तु स्वनिर्मूलत्वात्समूलत्वेऽपि ततः प्रभृ
तिसंक्रांतावुपरागादिपर्वसु । त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टं महालये इति मात्स्योक्तं ग्रहणग्रहणवद्विकल्प इत्याह
तन्न । अस्य पार्वणानुवादकत्वेन पिंडविधायकत्वात् । पिंडोक्तिः अन्यपरे कपदे पिंडानुवाद[illegible] त्रित्वविधौ च ष
ट्कर्त्तुः प्रथमभक्तव दे रूपप्राप्तेः । मंगलकृत्स्ये पुविशेषमाह ज्योतिर्निबंधे नारदः । त्याज्यास्स्युर्घ्यस्तसंक्रांतेः पूर्व
तः परतस्तथा । विवाहादिषु कार्येषु नाड्यः षोडश षोडश । एतत्पुण्यकालोपलक्षणं । भानोः संक्रांतिभोगमत्र कुलि
कश्चार्द्धयामकरति ज्योतिः प्रकाश वर्ज्येषु परिगणनात् । अयनव्यतिरिक्तासु दशसु संक्रांतिषु रात्रौ स्नानं श्राद्ध

वादिनकार्यम्। अह्नि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितं। रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः। अर्द्धरात्रा
दधस्तस्मिन् मध्याह्नस्योपरि क्रिया। ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात्प्रहरद्वयं। पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते र
विः। प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटाविति। वृद्धवसिष्ठादिवचनैरहः पुण्यतोक्त्या रात्रौ संक्रमणे भा
नोर्दिवा कुर्याच्च तत्क्रियाः। पूर्वस्मात्परतो वापि त्र्यस्मासन्नस्य तत्फलमिति वसिष्ठवचनाच्चापरात्रौ स्नानादिनि
षेधप्रतीतेः। यानि तु। विवाहव्रतसंक्रांतिप्रतिष्ठाऋतुजन्मसु। तथोपरागयात्रादौ स्नाने दाने निशा शुभेति।
एवं दर्शनसंक्रांतिविवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु चेत्यादीनि विष्णुगोभिलादि
वचनानि मकरकर्कसंक्रांतिविषयाणि। मुक्त्वा मकरकर्कटाविति तयोर्द्दिवानुष्ठानस्य पर्युदस्तत्वादिति हे
माद्रिमाधवादयः। वस्तुतस्तु प्रागुक्तवचनेन सोर्द्दिनद्वयपुण्यत्वादेरेव पर्युदासान्मकरकर्कटयोरपि स्ना
ने दाने परेहनीत्यादिभिरहः पुण्यत्वोक्तेः। अहः पुण्यत्वात्तु पपत्या कल्प्यरात्रिनिषेधस्य च प्रत्यक्षश्रुतविधि
नावाधात्सर्वसंक्रांतिषु रात्रावनुष्ठानविकल्पः स च देशाचाराद्व्यवतिष्ठत इति युक्तः पंथाः। अयनयोस्तु व
लव्योविशेषमस्याबलेमाघेचवदस्पते। ज्योतिर्निबंधे गर्गः। यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत्। तन्मासार

ष्वंतरे तस्यैव रक्षेण धनक्षयाः। नगरस्तरोरुह पत्रैरजनी सिद्धार्थैलो ध्रसंयुक्तैः। स्नानं जन्मर्क्षे गते रविसंक्रमलेन
5 ण्यं प्रभुभंदः हेमाद्रौ। अन्यत्रापि च दानादि पुण्यस्य ज्ञात्वोच्चैः सर द्वयं। संक्रान्तिः। पुण्यकाल्प्येषा। दानाध्ययन कर्मसु। यत्तु
गौडाः। संक्रान्तौ पक्षयोरंते द्वादश्यां पार्श्ववासरे। सायं संध्यां न कुर्वीत कुर्वन् पितृहा भवेदिति क्रमोपदेशि न्मांसा
व्यासोक्तेः। सायं पुण्यकाले संध्या निषेधमात्रं तन्निर्मूलं। अन्यच्चैवं वक्तव्यं विस्तरभियानोच्यते ॥ ⊙ ॥ इति
संक्रान्तिनिर्णयः ॥ ॥ पत्रे युगजन्माद्वो मासः। सद्वेधा। शुक्लादिरमांतः कृष्णादिः पूर्णिमांतश्च। त
थाच त्रिकांडमंडनः। चांद्रोपि शुक्लपक्षादिः कृष्णादिर्वेति च द्विधा। शुक्लादेशभेदेन तद्व्यवस्थामाह। कृष्णपक्षा
दिकं मासं नांगीकुर्वंति केचन। येपि कुर्वंति न तेषामपीष्टो विंध्यस्य दक्षिणे। इति विंध्यदक्षिणे कृष्णादिनिषेधादु
त्तरतो द्वयोरप्यनुज्ञा गम्यते। तत्रापि शुक्लादिर्मुख्यः। कृष्णादिर्गौणः। शास्त्रेषु चैत्रशुक्लादित्वं प्रतिपद्येव चांद्रसं
वत्सरारंभोक्तेः। तदुक्तं दीपिकायां। चांद्रो ज्ञेयो मधुशुक्लगप्रतिपदारंभ इति। नहि येन कृष्णादिमन्वंते तेषां वत्सरा
रंभोभिद्यते। अतः शुक्लादिर्मुख्यः। कृष्णादिना मलमासासंभवाच्च। चंद्रस्य सर्वनक्षत्रभोगेन नाक्षत्रो मासः। साव ५
नादीनां व्यवस्थोक्ता हेमाद्रौ ब्रह्मसिद्धांते। अमावास्यापरिच्छिन्नो मासः स्याद् ब्राह्मणस्य तु। संक्रांतिपौर्णमासीभ्यां

तथैवक्षत्रवैश्ययोः। अत्र ब्राह्मणादीनां वचनांतरेण यत्र कर्मविशेषे वसंते ब्राह्मणोऽग्नीनादधीतेत्यादिवन्मा
स उक्तस्तत्र दर्शितत्वमात्रे नियम्यते न तु सर्वकर्मसु दर्शितएवेति। दृष्टश्राद्धपर्यंतसौभरेहीमादिविधाननियमवाद
धिलाघवात्। त्रैवर्णिकानां सर्वकर्मसु मासविशेषविधेस्सावनादीनां सूत्रानुक्तौ लौमादिवरत्वापत्तेश्चेति गुरुच
रणाः। ज्योतिर्गर्गः। सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते।
रूष्यशृंगः। विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते। पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाब्दिके। स्मृत्यंतरे। एकोद्दि
ष्टविवाहादावृणादौ सौरसावनौ। ज्योतिर्गर्गः। आयुर्दायविभागश्च प्रायश्चित्तक्रियास्तथा। सावनेनैव कर्त्तव्या
शत्रूणां चाप्युपासना। विष्णुधर्मे। न दत्तं सत्रावप्रयनानि चैवं दोर्मासेन कुर्याद्गणनात्मकेनेति। ब्राह्मे। तिथिकृत्ये च
कृच्छ्रादिं व्रतेष्वब्दादिमेव च। विवाहादौ च सौरादिमासं कृत्स्ने विनिर्दिशेत्। अथ मलमासः। तत्रैकमात्रसंक्रांति
रहितः सितादिश्चान्द्रो मासो मलमासः। एकसंक्रांतिरहितत्वमसंक्रांतत्वेन संक्रांतिद्वयवत्त्वेन च भवति। मलमा
सो द्वेधा। अधिमासः क्षयमासश्चेति। तदुक्तं काठकगृह्ये। यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा। मलमा

सः स विज्ञेयो मासः स्यात्तु त्रयोदशोऽति· सत्यव्रतोपि· राशिद्वयं यत्र मासे संक्रमेत दिवाकरः। नाधिमासो भवेदेष
6 मलमासस्तु केवलमिति। अधिकमासस्य कालनियममाह· वसिष्ठः। द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः
षोडशभिस्तथा। घटिकानां चतुष्केण पतत्यधिकमासक इति· एतच्च सावनादिमानेन संभवार्थं० न तु नियमा
र्थं· अन्यथा षोडशादिनाधिकद्वात्रिंशन्मासानंतरं क्षयपदानियमेन अमुलकादिलभंगापत्तेः। तेन न्यूनाधिक
कालेमलमासपातेपि न दोषः। अत एवोक्तं माधवीये· मासे त्रिंशत्तमे भवेदिति द्वयस्यापि ज्योतिःशास्त्रे· असंक्रा
तिमासोधिमासः स्फुटः स्याद्विसंक्रातिमासः क्षयाख्यः कदाचित्· क्षयः कार्तिकादित्रयेनान्यतः स्यात्तदावर्ष
मध्येधिमासद्वयं च· एकः क्षयात्पूर्वं परतश्चैक इत्यधिमासद्वयं भवतीत्यर्थः। अत्र विशेषमाह जाबालिः। मास
द्वयेऽब्दमध्येतु संक्रांतिर्नयदा भवेत्· प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तर इति· उत्तर एव कालाधिक्यं न पू
र्वस्मिन्नित्यर्थः। यत्तु ब्रह्मसिद्धांते· चैत्रादर्वाङ् नाधिमासः परतस्त्वधिको भवेदिति· तत्रैव चैत्रात्पूर्वमसंक्रांतद्व ६
ये पूर्वो नाधिकः किंतु पर इत्यर्थः। यच्च ज्योतिःसिद्धांते· घटकन्यागते सूर्ये वृश्चिके वाथ धन्विने· मकरे वाथ

कुंभे वा नाधिमासो विधीयत इति । न च वृश्चिकादिचतुष्टये मलमासे सति पूर्वं कन्यातुलागते सूर्ये क्षयात्पूर्वं भाव्य
धिमासस्य कालाधिक्यमात्रनिषेधार्थं न त्वधिकमात्रस्य । दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित् । नपुंस
कत्वं भवतीत्येष शास्त्रविनिश्चयः इति हेमाद्रौ विष्णुधर्मोत्तरेण विरोधात् । मलमासेऽष्टकादिनिषेधानुपप
त्तेश्च । मकरे वा यदि कुंभे चेति दृष्टांतार्थग्राह्यभावात् । क्षयस्यागमनकाल उक्तः सिद्धांतशिरोमणौ । गतोऽब्ध्यद्रि
गते नंदैर्मिते शककाले तिथीशैर्भविष्यत्यथांगाक्षसूर्यैः । गजाद्यग्निभूमिस्तथा प्रायशोऽयं कुवेदेन्दुवर्षैः क्व
चिद्गोकुभिश्चेति । अथ क्षयाश्चत्वारः । अद्रयः सप्त । नंदा नव एषां प्रातिलोम्येन याते ९७४ तन्मिते वर्षे कश्चित्
क्षयमासः पूर्वं जात इत्यर्थः । तिथयः पंचदश । ईशा एकादश । अंके १११५ एवंमिते याते कश्चिद्भविष्यतीत्यर्थः
। अंग ६ अक्षा ५ सूर्याः १२ एकत्र १२५६ ॥ गजाः ८ अद्रय ७ अग्निः ३ भूः १ एकत्र १३७८ कुः १ वेदाः ४ इंदुः १
एकत्र १४१ । गावः ९ कुः १ एकत्र १९ एतैर्मिते वर्षे याते कश्चिद्भविष्यतीत्यर्थः ॥ ॥ अथ मलमा
से कार्याकार्यं निरूप्यते । तत्र जाबालिः । नित्यनैमित्तिके कुर्याच्छ्राद्धं कुर्यान्मलिम्लुचे । तिथिनक्षत्रवारोक्तं का

ण्यं नैव कदाचन। अयं च काम्यनिषेधः आरंभसमाप्तिविषयः। अस्पर्शो नाम ये मासा नंतेषु मम संमतः। अनादौ चैव यस्तानामारंभस्य

7 समापने मिति नैनैवोक्तत्वात्। अस्पर्शो अधिकमासाद्य इत्यर्थः। तत्र मंडलेन पृथग्वेरितिव चेनात् कारीयादिः काम्यस्त्वारंभसमाप्ति

भवत एवेत्यादिरन्यत्र विस्तरः। काठकगृह्येपि मलेऽनन्यगतिकं यां नित्यनैमित्तिकी क्रिया मिति। तानि नैमित्तिकानि दीपका(

या इत्युक्तानि नित्यनैमित्तिकमग्निनष्टानुगतागन्याधानमर्द्धासुवासंस्कारादिविलोपने सति पुनः प्रोक्षं प्रतिष्ठादिकमितिागम

संतरस्युतं तु सोमादिहेयमेव। ।तत्र कर्त्तव्यान्युक्तानि कालादर्शे। द्वादशाहः सपिंडांतकर्म ग्रहणजन्मनोः। सीमंतपुंसवे

आद्यं ह्यावेतौ जातकर्म च। रोगे शांतिरलभ्ये च योगे आद्यं व्रतानि च। आयश्चित्तं निमित्तस्य वशात्स्वैपरत्र च। अक्षादकुं

भमन्वादिमहालयसुगादिषु। आद्यं दर्शे प्रहरहः आद्यं मूनादिमासिकं। मलिम्लुचान्यमासेषु मृतानां आद्यमाब्दिकं।

आद्यं तु सर्वं दृष्टेष्टसुतीर्थेष्वेवं सुगादिषु मन्वादिषु च यद्दानं दानं देने दिने च यत्। तिलगोभूहिरण्यानां संध्योपासनयोः

क्रिया। पर्वहोममग्न्याधेयं एतत्साग्नेरिष्टिश्च पर्वणि। नित्याग्निहोत्रहोमश्च देवतातिथिपूजनं स्नानं च स्नानविधिनाप्यभ रामः

क्ष्यापेयवर्जनं। तर्पणं च निमित्तस्य नित्यत्वादुभयत्र चेति। एतौ पुंसवनसीमंतौ। एतच्च गर्भाधानाद्यन्नप्राशनांतसंस्का

रोपलक्षणं। तदुक्तं दीपिकायां। गर्भाधानमुखं च चौलविधितः प्राग्जातयोगं विना कृच्छ्रेणाग्रयणं गजेन्द्रपुरतश्छायामघानं
गयोः तीर्थेन्दुक्षययोश्चापि त्र्यसमधिके मास्येवमाचरेदिति। अलभ्ये योगे अर्धोदयपद्मकादौ। काम्यान्यपि व्रतादीनि कार्याणी
त्यर्थः। पूर्वे परत्र मलेऽप्युक्तं चेत्यर्थः। महालयश्राद्धेन मघात्रयोदश्युच्यत इति माधवः। दर्शश्राद्धं मलेऽपि कार्यं। यत्तु ऋष्यशृं
गः। संवत्सरातिरिक्ते मासोयः स्यान्मलिम्लुचः। तस्मिंस्त्रयोदशश्राद्धं न कुर्यादिंदुसंक्षय इति। तत्काम्यदर्शश्राद्धविषयं।
काम्यं नैव कदाचनेति वचनात्। दर्शे च काम्यश्राद्धं कन्याकन्यां। वेदिनश्चेत्यादिना याज्ञवल्क्येनोक्तम्। नित्यं तु मलेऽपि भव
त्येव। दर्शे च हरहः श्राद्धदानं च प्रतिवासरं। गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुच इति मात्स्योक्तेरिति हेमाद्र्यादयः।
द्विवोदासीयेऽपि। अनिंदुरिंदुक्षयश्च हरिवासरे बुधाष्टमी। नाधिमासे परित्याज्याः सीमंतान्नाशने शिशोरिति। अनिदु
र्दर्शः। द्विविधमप्यमाश्राद्धं न कार्यमिति तत्परार्कः। तत्र यद्विहितं कर्म उत्तरे मासि कारयेदित्युक्तेः। षष्ठ्यां तु दिवसैरितिशु
द्धमासकरणेऽपि शास्त्रार्थोपपत्तेर्दर्शश्राद्धं मलेन कार्यमिति प्राचीनगौडाः। मूलपाणिश्च। संवत्सरप्रदीपेऽपि। एकराशि
स्थिते सूर्ये यदा दर्शद्वयं भवेत्। दर्शश्राद्धं तदाद्ये स्यात्परत्र मलिम्लुचे। अत्रापि प्राग्वद्व्यवस्था। यच्चापि कालादर्शे सर्ववा
र्षिकं मासद्वये कार्यमित्युक्तं। तथापि हेमाद्रिमाधवापरार्कादिमतात्तथ्यमवार्षिकं मलमासे द्वितीयाद्याब्दिकं तु शुद्धमास-

एवकार्य्यं। असंक्रांतेपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः। तथैव मासिकं श्राद्धं सपिंडीकरणं तथेति हारीतोक्तेः। आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत म
नि॰प्र॰म॰ ८ लिम्लुचे। चतुर्दशे तु संप्राप्ते कुर्वीत पुनराब्दिकमिति स्मृत्यंतरोक्तेश्च। पुनराब्दिकं द्वितीयादिवार्षिकं। त्रयोदशे मासेऽतीते चतुर्दशो यदि
ने कुर्य्यादित्यर्थः। यत्तु सत्यव्रतः। वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि। मलमासे न तत्कार्य्यं व्याघ्रस्य वचनं यथेति। तद्द्वितीयादिवा
४ र्षिकविषयं। आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुच इति पृथ्वीचंद्रवचनात्। यत्र द्वादशं मासिकं शुद्धमासे भवति तत्र त्रयोदशे
ऽधिक एवाब्दिकं कार्य्यं। यत्र त्वधिकमध्ये द्वादशं मासिकं तत्र तस्य द्विरावृत्तेः कृत्वा चतुर्दशे शुद्ध एव प्रथमाब्दिकमिति निष्कर्षः
। तेन द्वितीयादि शुद्धमास एव पृथ्वीचंद्रोदये दिवोदासीये मदनपारिजाते चैवम्। मलमासमृतानां तु यदा स एवाधिकस्स्यात्त
दा तत्रैव कार्य्यम्। यथाऽपेठीनसिः। मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरं। मलमासेपि कर्त्तव्यं नान्येषां तु कथंचनेति। यत्तु हे
द्रविशिष्टः। आब्दीयाहनि संप्राप्ते अधिमासो भवेद्यदि। मासद्वयेपि कुर्वीत श्राद्धमेतन्न मुह्यतीति। यच्च व्यासः। उत्तरे देवका
र्य्याणि पित्र्यकार्य्याणि चोभयोरिति। तन्मासिकादिविषयम्। योगाब्दिकं मासिकं च श्राद्धं चापरपक्षिकं। मन्वादिकं तैर्थिकं च
कुर्य्यान्मासद्वयेपि चेति स्मृतिचंद्रिकोक्तेः। तैर्थिकं। तीर्थश्राद्धं। तच्च मासद्वयेपि कार्य्यमिति त्रिस्थलीसेतौ भट्टाः। केचित्तु। एमः ८
प्रतिमासंमृताहे च श्राद्धं यत्प्रतिवत्सरं। मन्वादौ च युगादौ च तन्मासोरुभयोरपीति मरीचिवचनात्। वर्षे वर्षे तु यच्छ्राद्धं

मातापित्रोर्मृतेहनि । मासद्वयेपि तत्कुर्य्याद्व्याघ्रस्य वचनं यथेति गालवोक्तेश्च प्रत्याब्दिकं मासद्वये कार्य्यमित्याहुस्तत्तु
च्छं । प्रतिमासं मृताहे क्रियमाणं मासिकं । प्रतिसंवत्सरं क्रियमाणं कल्पादिश्राद्धमिति मरीचिवचसो मदनरत्ने व्याख्यानात् ।
गालवीयस्य च मासद्वयात्मके त्तयमास इति माधवेन व्याख्यानात् । यत्तु कैश्चिदुक्तं । प्रथमाब्दिकं मासद्वये कार्य्यम् । आब्दि
के प्रथमे यत्स्यात्तत्कुर्वीत मलिम्लुचे । त्रयोदशे च संप्राप्ते कुर्वीत पुनराब्दिकमिति यमोक्तेरिति तदपि चिंत्यम् । पुनराब्दिके
द्वितीयाद्विवार्षिके त्रयोदशेतीते चतुर्द्दशे कुर्य्यात् । अन्यथा संवत्सरं न वर्द्धेत श्राद्धं तत्र मृतेहनीति पैठीनसिविरोधः
स्यादिति हेमाद्रौ पृथ्वीचंद्रोदये च । एतेन न वर्द्धेत न [illegible]ध्या च्छुद्धेपि कुर्य्यादेवेत्यनंतभट्टव्याख्यामानाभावात्स्यरणस्ता । पूर्वे
व्याख्यायां तु हारीतीये प्रथमग्रहणमेव मानं यदपि निर्णयामृते पूर्वोक्तकालादर्शवचनान्मलमासे श्राद्धदिनस्य वंध्यत्वनि
रासार्थं पितृद्देशेन ब्राह्मणान्भोजयित्वा शुद्धमासे सपिंडकं श्राद्धं कुर्य्यात् । पिंडवर्ज्जमसंक्रांते संक्रांते पिंडसंयुतं । प्रति
संवत्सरं श्राद्धमेवं मासद्वयेपि चेति वृद्धपराशरोक्तेरिति तदपि चिंत्यं पूर्वोक्तवचनस्य तत्पूर्वभाव्यधिकमासविषयत्वा
त् । तत्र हि मासद्वयश्राद्धमुक्तं तदाह सत्यतपाः । एक एव यदा मासः संक्रांतिद्वयसंयुतः । मासद्वयगतं श्राद्धं मलमासे विशिष्य
त इति मासद्वयगतं पूर्वासंक्रांतगतम् । तदपगते चामलमासे त्तयमासे । अविशिष्टात्तत्पूर्वाधिमासे चेति हेमाद्रिः । दीपिकायां ।

तस्मात्संसर्पाधिमासकोयदि भवेत्तत्रत्यसांवत्सरं तस्मिन्नेव कृतया तेषु च वचनात्कुर्याद्द्वयोः कोविद इति। कालादर्शोप्येतद्विषय ए
नि·प्र· वेत्यलं वऊना। ।मलमासवर्ज्यान्युक्तानि कालादर्शे। अनित्यमनिमित्तं च दानं च महदादिकम्। अग्न्याधानाध्वराः पूर्वतीर्थया
मलमास· त्रामरेज्यम्। देवारामतडागादिप्रतिष्ठा मौंजिबंधनं। आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः। राज्याभिषेकः प्रथमश्चू
ए डाकर्म व्रतानि च। अन्नप्राशनमारंभो गृहाणां च प्रवेशनं। स्नानं विवाहो नामानि यत्र देवमहोत्सवः। व्रतारंभसमाप्ती च कर्म का
9 म्यं च पापनं। प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत्। उपाकर्मोत्सर्जनं च पवित्रदमनार्पणं। अवरोहश्च हेमंतः सर्पाणां
बलिरष्टकाः। ईशानस्य बलिर्विष्णोः शयनं परिवर्तनं। दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वज्रिणः। पूर्वत्र प्रतिषिद्धानि
परत्रान्याश्च दैविकमिति। अत्र मूलवचनानि हेमाद्रिमाधवादिष्वोक्तेयानि। दिवोदासीयेऽपि यात्रोत्सवश्च देवादिशप
थं दिव्यमेव च। मलमासे न कुर्वीत व्यासस्य वचनं यथेति। अयं निर्णयः क्षयमासे विज्ञेयः। रविसंक्रमहीने यो वर्ज्यावर्ज्य
विधिः स्मृतः। स एव तु द्विसंक्रांते मलमासे प्रदीरित इति काठकगृह्योक्तेः। क्षयमासस्मृतानां मत्स्याधिके विशेषो हेमाद्रौ। शमः
तिथ्यर्द्धे प्रथमे पूर्वो द्वितीयेर्द्धे तथोत्तरः। मासाविति बुधैश्चिंत्यौ क्षयमासस्य मध्यगौ। आब्दिकवद्वर्धापनेऽपि ज्ञेयम्॥ ए
यन्मलमासे वर्ज्यमुक्तं तच्छुक्रगुर्वोरस्तादिष्वपि ज्ञेयम्। तदाह बृहस्पतिः। बाले वा यदि वा वृद्धे शुक्रे वास्तंगते गुरौ। मलमा

सद्वैतानि वर्जयेद्देवदर्शनमिति॥ अनादिदेवतां दृष्टुं पुष्यः स्युर्न्नष्टभार्गवे। मलमासेप्यनाहूततीर्थयात्रां विवर्जयेत्। आहूतती-
र्थे दोषाभावमात्रं न तु फलमिति वाचस्पतिमिश्राः। तन्न। असति बाधके फलहेतुत्वात्ततः। लल्लोपि नीचस्थे वक्रसंस्थेप्यतिचरणे
गते बाल वृद्धास्तगे वा संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा। मौंजीबंधोंगनानां परिणयनविधिर्वास्तुदेवप्रति-
ष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते चेति॥ दीक्षा यागदीक्षा आगमदीक्षा च। तथा। उद्यानचूडाव्रतवे-
धदीक्षाविवाहयात्राश्च वधूप्रवेशः। तडागकूपत्रिदशप्रतिष्ठा बृहस्पतौ सिंहगते न कुर्य्यात्। दिवोदासीये। गुर्वादित्ये गुरौ सिं-
हे नष्टे शुक्रे मलिम्लुचे। गृहकर्म व्रतं यात्रां मनसापि न चिंतयेत्। अस्यापवादः। तत्रैव श्लोके। पुंडूने चोपवासश्च गोतम्यां सिं-
हगे गुरौ। कन्यागते तु कृष्णायां न तु तत्तीरवासिनां। तथा। आद्यासा गौतमी गंगा द्वितीया जाह्नवी स्मृता। सर्वतीर्थफलं
स्नानाज्जो तम्यां सिंहगे गुरौ। संहिताप्रदीपे। स्यात्सप्तरात्रं गुरुशुक्रयोश्च बालत्वमन्त्यं दशकं च वार्द्धे। वृद्धो सिते त्र्याव-
म्बुभे शिशुत्वे पक्षो यतस्तावुपचीयमानाविति। वशिष्ठः। अतिचारगते जीवे वर्जयेत्तदनंतरं। व्रतोद्वाहादिकार्य्येषु
अष्टाविंशति वासरान्। बाल्यादिलक्षणमुक्तं ब्रह्मसिद्धांते। रविणा सतिरन्येषां ग्रहाणां मस्त उच्यते। ततोऽर्वाग्वार्द्ध-
कं प्रोक्तमूर्ध्वं बाल्यं प्रकीर्तितमिति। बाल्यादिपरिमाणं च वृहत्तशते। बालः शुक्रो दिवसदशकं पंचकं चैव वृद्धः पश्चादक्रांत्रि-
नयमुदितः पक्षमेवं प्राक्रमेण। जीवो वृद्धः शिशुरपि तथा पक्षमन्ये। शिशुत्वे वृद्धो सोक्तो दिवसदशकं चापरे सप्तरात्रं। पश्चिमत

नि॰ सि॰
मलमास॰
१०
10

उदये दशदिनानि बालः अस्ते पंचदिनानि वृद्धः पूर्वतो दिनत्रयं बालः पश्चे च वृद्ध इत्यर्थः। जीवो गुरुः। अन्यत्र त्वन्यथोक्तं। प्राक्पश्चा
दुदितः शुक्रः पंचसप्तदिनं शिशुः। विपरीतं तु वृद्धत्वं तद्वद्देवगुरोरपीति। एतेषां पक्षाणां व्यवस्थामाह मिहिरः। बहवो दर्शिताः काला येऽ
बाल्ये वार्द्धके विवाहाद्यास्तत्राधिकाः। शेषा देशभेदाद्युताः परे इति देशभेदं च मदनरत्ने गार्ग्यः। शुक्रो गुरुश्चाकच प्राक् च वा बाल्ये वि
ध्ये दशाहं तु सप्तरात्रं। वंगेषु हूणेषु च षट् च पंच शेषेषु देशेषु त्रिदिनं वदंतीति। अस्तादेरपवादः काशीखंडे। न ग्रहास्तोदयकृतो दो
षो विन्ध्यस्यापरालये। त्रिस्थलीसेतौ वायवीये। गोदावर्यां गयायां च प्राक्शैले ग्रहणद्वये। सुरासुरगुरूणां च मौढ्यदोषो न विद्यते।
ग्रहणद्वये तन्निमित्तककुरुक्षेत्रयात्रादानादावित्यर्थः। तदाह त्रिस्थलीसेतौ लल्लः। उपप्लवे शीतलभानुभान्वोरस्तोदये वैक
पिलाख्यषष्ठ्यां। सुरासुरेज्यास्तमये वितीर्थे यात्राविधिः संक्रमणे च शस्तः। इत्यलं बहुना। । मलमासे च व्रतविशेष उक्तो
हेमाद्रौ पाद्मे। अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः। उद्दिश्यापूपदानेन नष्टध्वो दानफलं लभेत्। अधिमासे तु संप्राप्ते गुड
सर्पिर्युतानि चात्र त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने। साज्यानि गुडमिश्राणि अधिमासे नृपोत्तम। त्रयस्त्रिंशदपूपान्वै कां
स्यपात्रे निधाय च। सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत्। विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः। अपूपान्नप्रदानेन मम
पापं व्यपोहतु। नारायण जगद्बीज भास्कर प्रतिरूपक। व्रतेनानेन पुत्रांश्च संपदं चापि वर्द्धय॥ यस्य हस्ते गदा चक्रे गरुडो यस्य वा
हनं। शंखः करतले यस्य स मे विष्णुः प्रसीदतु। कलाकाष्ठादिरूपेण निमेषघटिकादिना। यो वंचयति भूतानि तस्मै कालात्मने नमः।

राम॰
१०

कुरुक्षेत्रमयं देशः कालः पर्व द्विजो हरिः। पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम॥ मलानां च विशुद्ध्यर्थं पापप्रशमनाय च॥
पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर। मंत्रेणानेन यो दद्यात्त्रयस्त्रिंशदपूपकान्। प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपद
इति। इति मीमांसककमलाकरभट्टकृते मासमलमासक्षयमासनिर्णयः॥ ॥ पक्षनिर्णयस्तु देवे मुख्यः शुक्लपक्षः कृ
ष्णः पित्र्ये विशेषात इति माधवेनोक्तः॥ अथ तिथिनिर्णयः। तत्र तिथिर्द्वेधा। शुद्धा विद्धा च। वेधरहिता शुद्धा। तत्सहिता विद्धा
। तत्र शुद्धायामसंदेहाद्विद्धा निर्णीयते। तत्र सामान्यतो वेधमाह माधवीये पैठीनसिः। पक्षद्वयेपि तिथयस्तिथिं पूर्वां तथोत्तरां।
त्रिभिर्मुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृत इति। हेमाद्रिमदनरत्नादौ तु द्विमुहूर्तोप्युक्तः। उदिते दैवतं भानौ पित्र्यमस्तमिते
रवौ। द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति विष्णुधर्मोक्तेः। द्विमुहूर्तत्वं चानुकल्पः। द्विमुहूर्तापि कर्तव्या या तिथि
र्वृद्धिगामिनीति दक्षेणापि शेषोक्तेः। अयं वेधः प्रातरेव। सायं तु त्रिमुहूर्तवेध एव। यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनी
पतिः। सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेदिति स्कांदोक्तेः। दीपिकापि। त्रिमुहूर्तगा तु सकला सायमिति। पारणे तु। व्रतोपवा
सस्नानादौ घटिकैकापि या भवेत्। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके इत्यादीनि स्कांदादिवचनानि तानि वेधानराधिकर
णन्यायेनावयवतुल्या त्रिमुहूर्तवेधपराणि। तिथिविशेषे वेधविशेषः स्कांदे। नागो द्वादशनाडीभिर्दिक्पंचदशभिस्तथा। भू

नि॰ प्र॰
तिथि॰

तोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति। अयं चोपवासातिरिक्तविषय इति वक्ष्यते इति वेधः। ।तत्र सर्वा तिथिर्द्वेधा कर्मकाल
व्यापिनी सैव ग्राह्या। कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः। तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति विष्णुधर्मोक्तेः।
दिनद्वये तद्व्याप्तावेकदेशव्याप्तौ वा युग्मवाक्यान्निर्णयः। तस्य सर्वबाधेनोपपत्तेः। कर्मकालस्य प्रधानत्वाच्च युग्मवाक्यं तु निगमः
11 । ।युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः। रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा। प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं म
हाफलम्। एतद्व्यस्तं महादोषं हन्ति पुण्यं पुराकृतमिति। अत्र रन्ध्रान्ताः शब्दा द्वितीयादिनवम्यन्ततिथिवाचकाः। रुद्र एकादशी।
द्वितीया तृतीयायुता सा च द्वितीयायुतेति सप्त युग्मानीत्यर्थः। इदं च शुक्लपक्षे अमाप्रतिपद्युग्मस्य पूर्णिमायां च तत्रैव सत्त्वात् इति
केचित्। तत्त्वं तु अमाप्रतिपद्युग्मात् कृष्णपक्षलिङ्गात् पक्षद्वयपरमिदं तत्र द्वितीयैव वाक्यैः कृष्णे तिथिविशेषे वेधो ग्राह्य इति। दशमी तू
क्ता पुराणसमुच्चये संपूर्णे दशमी कार्या मिश्रिता पूर्वयाथवेति। संपूर्णेऽपि शुक्लपक्षे त्रयोदशी तु सम्पूर्णा नोक्ता। त्रयोदशी तु कर्त्तव्या
द्वादशीसहिता मुने इति। कृष्णपक्षे त्वापस्तंबः। प्रतिपत्स द्वितीया स्याद् द्वितीया प्रतिपद्युता। चतुर्थीसंयुता या च सा तृतीया फल राम:
प्रदा। पंचमी च प्रकर्त्तव्या षष्ठ्या युक्ता तु नारद। कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा प्रकर्त्तव्या परविद्धा न कुत्रचित्। १९
दशमी च प्रकर्त्तव्या सदुर्गा द्विजसत्तम। षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी। एताः परयुताः पूज्याः पराः पूर्वेण संयुत

तां इति। यत्तु व्याघ्रः। खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं। खर्वदर्पौ परौ पूज्यौ हिंसा स्यात्पूर्वकालिकी इति। खर्वः सा
म्यं। दर्पो वृद्धिः। क्षयो हिंसा। तयोः परा। हिंसा त्वयस्तत्र पूर्वैवेत्यर्थः। एतच्चैकभक्तादिविषयं। द्वितीयादिषु युग्मानां पूज्यता। नियमादिषु एकोद्दि
ष्टादि वृद्ध्याद्ये क्षयहव्यादिचोदनेति व्यासोक्तेः। नियमादिषु व्रतदानादिदेवकर्मसु एकोद्दिष्टादितिथेर्वृद्ध्यादावित्यर्थः।
कर्मकालव्याप्त्यभावे कर्मोपक्रमकालगैव ग्राह्या। कर्मोपक्रमकालगा तु इति मिश्राः। ग्राह्या न युग्मादर इति दीपिकोक्तेः। यानि
तु। यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु। इत्यादीनि तानि त्रिमुहूर्त्तादिस्तुतिरि
ति निर्णयदीपे ज्ञेयं। ।अथैकभक्तं। तत्कालः स्कान्दे। मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिरिति। मध्याह्नश्च पंचधा
भक्तदिनतृतीयांशः। तेन यद्यपि द्वादशदंडानंतरं प्राप्यते तथापि दिनार्द्धसमयेऽतीते भुज्यते नियमेन यत्। एकभक्तमिति प्रो
क्तमतस्तत्स्याद्दिवैव हीति स्कांदोक्तेः। षोडशघस्रमं दशादि दंडा मुख्यः कालः। दीपिकायां तु। मध्याह्नोत्पदले त्रिभागदिवस
स्यादेकभक्तमिति। ततः सूर्यास्तपर्यंतं गौणः। दिवैव हीत्यस्यैव यथा पत्त्येते स्वरत्वात्। अत्र पूर्वेद्युर्व्याप्तिः परेद्युरुभयेद्यु
र्व्याप्तिस्तदभावो वा एकदेशव्याप्तिस्तत्रापि साम्यं वैषम्यं वेति षट्पक्षाः। तत्राद्ययोरसंदेहः एवं तृतीये तु पूर्वैव क्रियागौणमुख्यव्याप्तेः।
सत्वात्पूर्वेति माधवः। युग्मवाक्यान्निर्णय इति हेमाद्रिः। चतुर्थपक्षे परैव संकल्पकाले सत्वादिति केचित्। गौणकालव्याप्तेश्च

तुर्थपक्षे सत्वात् वैषम्येण शस्याप्तौ याधिका सा ग्राह्या । साम्ये पूर्वा ॥ अयं च स्वतंत्रैकभक्तनिर्णयः । अन्यांगे उपवासप्रतिनिधौ तदनु-
सारेण निर्णयः ॥ अथ नक्तं । तच्च दिनान्तरस्य पूर्वरात्रिभोजनं । तत्र प्रदोषव्यापिनी ग्राह्या । प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते
नि॰ प्र॰ इति वत्सोक्तेः । प्रदोषस्तु । त्रिमुहूर्त्तं प्रदोषः स्यात् भानावस्तंगते सति । नक्तं तत्र तु कर्त्तव्यमिति शास्त्रविनिश्चय इति म-
नक्तं॰ दनरत्ने व्यासोक्तेः । तत्रापि त्रिदंडोत्तरं ग्राह्यं । सा च संध्या त्रिघटिका अस्तादुपरि भास्वत इति स्कांदोक्तेः । दंडत्रयस्य संध्यात्वा-
12 त् । तत्र चत्वारि मानि कर्माणि संध्यायां परिवर्जयेत् । आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति मार्कंडेयेन भोजननिषेधा-
त् । मुहूर्त्तोनं दिनं नक्तं प्रवदंति मनीषिणः । नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप इति माधवीये भविष्योक्तेश्च । गौडास्तु ।
प्रदोषोस्तमयादूर्ध्वं घटिकाद्वयमिष्यते इति वत्सोक्तेः । प्रदोषः संध्या च दिनरात्र्योः संधौ मुहूर्त्तैः । अर्वाग् अस्तमयात् संध्या व्य-
क्तीभूता न तारका यावत् । तेजःपरिहानि वृषणान्नोरूर्ध्वोदयं यावद् इति वराहोक्तेरित्याहुस्तन्न । अस्य संध्यावंदनाद्या-
दिपरत्वात् । अत एव तत्र खंडमंडलस्य संध्यात्वमुक्तं विज्ञानेश्वरेण । यच्च मदनरत्ने नक्तस्य वैधत्वाद्रागप्राप्तभोजन- एम:
नगोचरो निषेध इत्युक्तं तन्न विधेर्निषेधाविरोधात् । अन्यथा कपिंजलानि त्रयस्त्रिंशो धिकानां हिंसनं स्यात् । सायंका- १२
लेन नक्तं तु दिनद्वये प्रदोषस्पर्शेत्तेयं । अत एवात्र परत्वे स्यादस्तादर्वाग्यतो हि सेति जाबालिवचनात् । प्रदोषव्यापिनी-

तस्मादिह्वा नक्तं विधीयते। आत्मनो द्विगुणच्छायामंदीभवति भास्करे। तन्नक्तं नक्तमित्याहुर्न नक्तं निशिभोजनमिति
स्कांदाच्चैवं यत्यादीनामपि सापराह्णे नक्तं। नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्यात्तत्सदि
वाकरमिति। तत्रैव स्मृत्यंतरात्। इदमपुत्रविधुरोपलक्षणं पुत्रवतस्तु रात्रावेव। अनाश्रमी आश्रमी वा स्यादपत्नीकोऽपि पुत्र
वानिति संग्रहोक्तेः। सौरनक्तं तु दिवैव। त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः। तस्यां सौरं भवेन्नक्तमहन्येव तु भोजन
मिति सुमंतूक्तेः। हरिनक्ते विशेषः कालादर्शे स्कांदे। उदयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति। अन्यनक्ते तु संकोचः स्या
दावपि रात्रावेव। निषेधस्य रात्रौ भोजनगोचरत्वेन वैधाबाधकत्वात्। दिनद्वये व्याप्तौ परा। उभयोर्यद्दिवा तिथ्याः प्र
दोषव्यापिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यत इति कालादर्शे जाबालिवचनात्। अन्यपक्षेषु एकभक्तवन्नि
र्णयः। अत्र विशेषो मदनरत्ने गारुडे। हविष्यभोजनं स्नानं सत्यमाहारलाघवं। अग्निकार्यमधःशय्यां नक्तभोजी षडा
चरेत्। अग्निकार्यं व्याहृतिहोमः। इति नक्तम्। अयाचिते तु विशेषवचनाभावादुपवासवन्निर्णयः। अथ नक्षत्रव्र
तकालः। विष्णुधर्मे। उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः। युज्यते यत्र वा तारा निशीथे शशिना सहेति माधवीये स्कांदे
तत्रैवोपवासे हस्ते यन्निशायां पादधो भवेत्। उपवासे यद्दत्तं स्यात्तद्दिनं नक्तैकभक्तयोः। अथ व्रतपरिभाषा। तत्राधिकारिणो

नि॰सि॰ व्रतारंभ॰ १२

13

मदनरत्ने भविष्ये। अनग्नयस्तु ये विप्रास्तेषां श्रेयो विधीयते। व्रतोपवासनियमैर्नानादानैस्तथा नृप। अग्निगृहस्थमुपवास
विषयम्। अत एव देवलः। आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः। अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नताम्। एकादश्यां तु व
च नाश्नंतीति वक्ष्यामः। शूद्रस्याप्यधिकारः। शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति। वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विने
ति व्यासोक्तेः। प्राच्यास्तु वैश्यशूद्रयोर्द्विरात्राधिकोपवासनिषेधः। वैश्याः शूद्राश्च ये मोहादुपवासं प्रकुर्वते। त्रिरात्रं पंचरात्रं
वा तेषां व्युष्टिर्न विद्यते। चतुर्थभक्तक्षपणं वैश्ये शूद्रे चापि विधीयते। त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिरिति हेमाद्रौ वचनात्।
यावदुक्तनिषेधस्त्वेके प्रकरणान्महातपोविषय इति युक्तं। एवं स्त्रीणामपि। यत्तु स्कांदे। नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं ना
प्युपोषणं। भर्तृशुश्रूषयैवैता लोकानिष्टान्व्रजंति हि। यद्देवेभ्यो यच्च पित्रादिकेभ्यः कुर्याद्भर्ताभ्यर्चनं सत्क्रियां च। तस्य
ह्यर्द्धं सा फलं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैव। आदित्यपुराणे। नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा। विफलं
तद्भवेत्तस्या यत्करोत्यौर्द्ध्वदैहिकमिति। और्द्ध्वदैहिकं पारलौकिकं तदननुज्ञाविषयं। भार्या पत्युर्मतेनैव व्रतादीनाच
रेत्सदेति कात्यायनोक्तेः। अत्र विशेषो हारिवंशे। स्नाने च कार्ये शिरसस्ततः फलमवाप्नुयात्। भर्त्रानुज्ञाता स्त्री प्रातरुत्थाय पर
ति विज्ञापयेत्सती। तथा। गृहीत्वौदुंबरं पात्रं सकुंभं सा तु तं तथा। ओं गंदद्दिणां सिंचेच्च भर्तुः पादौ च तज्जले। औदुंबरं।

र॰म॰ १२

ताम्रमयं। ततो भर्त्तुः सती दद्यात्स्नातस्य प्रयतस्य च। आत्मनश्चाभिषेक्तव्यं ततः शिरसि तज्जलं। उपवासेषु कर्त्तव्यमेतद्धि
व्रतकेषु चेति। सर्वव्रतेषु संकल्पविधिमाह भारते। गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यद्वा संकल्प
येद्बुधः। हस्ते नैवेत्यर्थः। यथेति पाठे यत्फलमि... दित्यर्थः। अथ व्रतारंभकालः। । मदनरत्ने गार्ग्यः। अस्तगे च गुरौ शु
क्रे बाले वृद्धे मलिम्लुचे। उद्यापनमुपारंभं व्रतानां नैव कारयेत्। रत्नमालायां। सोमसौम्यगुरुशुक्रवासराः सर्वकर्मसु भवं
ति सिद्धिदाः। भानुभौमशनिवासरे पुनः प्रोक्तमेव खलु कर्म सिध्यति। तथा। विरुद्धसंज्ञा इह ये च योगास्तेषामनिष्टः खलु
पाद आद्यः। स वैधृतिस्तु व्यतिपातनामा सर्वोप्यनिष्टः परिघस्य चार्द्धं। तिस्रस्तु योगे प्रथमे सवज्रे व्याघातसंज्ञे च पंच शू
ले। गंडे तिगंडे च षडेव नाड्यः शुभेषु कार्येषु विवर्जनीयाः। अथ भद्रा। । तथा च संग्रहे। कृष्णे ग्निदिशयो रूर्द्ध्वं सप्तमीभूतयोरधः
। शुक्ले वेददशयो रूर्द्ध्वं भद्रा ज्ञाणवसुदर्शीयोः। श्रीपतिः। न सिद्धिमायाति कृतं च विष्ट्यां विषारिघातादिकमत्र सिद्ध्यै। व्यवहारस
मुच्चये। दशम्यामष्टम्यां प्रथमघटिकाः पंच चक्रपरं हरिद्युः सप्तम्यादिद्वादशघटिकांते त्रिघटिकां। तृतीयाएकादश्यां खयमघटिका
स्युः परतरं शुभं विष्टेः शुभ्रश्चिवृत्तिपि च तुर्थ्यास्तु विरमे। तत्रैव। सर्पिणी तु सिते पक्षे कृष्णे चैव तु वृश्चिकी। सर्पिण्या मुखं
त्याज्यं वृश्चिक्याः पुच्छमेव च। माधवीये। विष्टिर्यदा हनि तिथेरपरार्द्धजाता पूर्वार्द्धजा निशि तदा शुभदा च पुच्छे। प्रसंख्या।

नि॰प्र॰
व्रतप॰रि॰
२८
14

मले। दिनमज्ञाय यदा रात्रौ रात्रिमज्ञाय यदा दिवा। न स्याज्याम्यमकार्येषु मा ऊरे एवं पुरातनाः। श्रीपतिः। षट्पौरुषतोक्षा दशकीकयाश्च
पौरंदरा ज्ञानिनव्रजमेला। पूर्वार्द्धमध्यापरभागयुक्ति विरंतनं ज्योतिषिकैः स्मृता। तामिः। व्रतारंभे च विशेषो मदनरत्ने सत्यव्रतेनोक्तः
। उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक्। सा खंडा न व्रतानां स्यादारंभश्च समापनमिति। देवलः। अभुक्त्वा प्रातराहारं स्नात्वा
चम्य समाहितः। सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत्। मदनरत्ने भविष्ये। क्षमा सत्यं दया दानं शौचमिंद्रियनिग्रहः। देव
पूजाग्निहवनं संतोषस्तेयवर्जनं। सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः। अग्निहोमस्तु दैवस्यो व्याहृतिहोमो वेति वृद्ध
मानः। यत्तु तेनोक्तं। सर्वमेतत्तु रा[illegible] प्रकृतव्रतपरं। व्रतांतरे तु विधांतरसत्वे होमोन्यथा न। अतएवैकादश्यां शिष्टानां
होमानाचरणमिति तन्न जपो होमश्चेति वत्समाप्तौ कवा कपत्वेनासकाम्यव्रतसमाप्तिपरत्वात् तत्वं तु। सा तद्दशपञ्चमित्र
विंदादिप्रकरणस्थेनैव तत्तद्व्रतविशेषहोमविधिभिरस्योपसंहार इति। विष्णुधर्मे। तज्जप्यजपनध्यानं तत्कथाश्रवणादि
कं। तदर्चनं च तन्नामकीर्तनश्रवणादयः। उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः। कौर्मे। वहिर्यामं स्पृजान्त्यं पति
तं च रजस्वलां। न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे। पृथ्वीचंद्रोदये अग्निपुराणे। स्नात्वा व्रतवता सर्वव्रतेषु व्रतमूर्तयः रा॰म॰
। पूज्याः सुवर्णमय्याद्याः शक्त्या वै भूमिशायिना। जपो होमश्च सामान्यं व्रतांते दानमेव च। चतुर्विंशा द्वादश वा पंच वा त्रय २८

एवं वा। विप्रास्त्रयः स्वयं यथाशक्ति तेभ्यो दद्याच्च दक्षिणां। अत्र विप्रा इति पुंल्लिङ्गनिर्देशात् पुमांस एव भोज्या न तु स्त्रियः। एवं सह
स्त्रीभोजनादावपि विरूपैकरूपोषस्य समाप्तिं विनाऽयुक्तत्वात्। अत एव द्वयोर्यजमानयोः प्रतिपदं कुर्याद्वा अन्यो यजमानेऽन्यद्
त्वाद्दोषे विरूपैकरूपस्यायोगात् तत्त्वमभिप्रायं द्वित्वेव ऊढत्वे वा न सम्भवतीत्युक्तं नाचार्यैः। पार्थसारथिना च। एतेन नैकस्य ब्राह्मण
स्याष्टसहस्रभोजने पर्यस्तम्। व ऊढत्वे सैकपदस्कन्धत्वाब्राह्मणान्वितत्वेन भोजनान्वयाभावादित्यन्यत्र विस्तरः। अथ स्वप्रतिष्ठा
वह्निसंधारणव्याहृतिहोमश्चेति वर्धमानः। व्रतमूर्त्तयो व्रतदेवताप्रतिमाः। प्रतिमास्वरूपं च मदनरत्ने भविष्ये। अनुक्तद्रव्य
तत्संख्या देवताप्रतिमा नृप। सौवर्णी राजती ताम्री हैमजा मार्त्तिकी तथा। चित्रजा पिष्टलेखोत्था निजवित्तानुरूपतः।
आमासात्फलपर्य्यन्तं कर्त्तव्या शाठ्यवर्जितैः। तत्रैव पाद्मे। आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते। मंत्रस्य देवताया
श्च प्रजापतिरिति स्थितिः। मंत्रानुक्तौ समस्तव्याहृतिरूपो मंत्रः। प्रजापतिश्च देवतेति कल्पतरुः। वर्धमानधृत देवीपुरा
णे। होमो ग्रहादिहोमो यावच्छतमष्टाधिकं भवेत्। अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते। मदनरत्ने। अनुक्तसंख्या यत्र सा
ष्टोत्तरशतं। वर्द्धमानधृत ब्रह्मपुराणात् तपः। उपवासं द्विजः कृत्वा ततो ब्राह्मणभोजनं। कुर्यात्तेनास्य सकल उपवासोऽभि
जायते। व्रतोद्यापनानुक्तौ तु पृथ्वीचंद्रोदये नंदिपुराणे। कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितं। उद्यापनं विना यत्तु तद्व्रतं निष्फलं

नि॰ प्र॰
व्रतपरि॰
१५
15

भवेत्। यदि चोद्यापनं नोक्तं व्रतानुगुणतश्चरेत्। वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते। गांश्चैव कांचनं दद्याद्व्रतस्य परि
पूर्त्तये। अशक्तौ तु नारदीये। सर्वेषामप्यलाभे तु यथोक्तकरणं विना। विप्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्त्तये। यथा विप्र
वचो यस्तु गृह्णाति मनुजः शुभम्। अदत्त्वा दक्षिणां पापः स याति नरकं ध्रुवम्। भारते। वेदोपनिषदि चैव सर्वकर्मसु दक्षि
णा। सर्वत्र तु भयोदिष्टा भूमिर्गावोथ कांचनम्। वैजवापः। शिवनेत्रोद्भवं यस्माद्वर्जेत पितृवल्लभम्। अमंगलं तद्यत्नेन देवका
र्ये प्रवर्जयेत्। टोडरानन्दे देवीपुराणे। व्रते चैव तीर्थेऽध्ययने श्राद्धेऽपि च विशेषतः। परान्नभोजनाद्देवि यस्यान्नं तस्य तत्
फलम्। पृथ्वीचंद्रोदयेऽग्निपुराणे। नित्यस्नायी मिताहारो गुरुदेवद्विजार्चकः। क्षारं क्षौद्रं च लवणं मधु मांसानि वर्ज
येत्। हारीतस्तु तत्रैवोक्ताः। तिलमुद्गादृते शिम्बं शस्यं गोधूमकोद्रवौ। धान्यकं देवधान्यं च शमीधान्यं तथैव च। स्वि
न्नधान्यं तथा पण्यं मूलं क्षारगणः स्मृतः। गोधूमान्नं तु तत्रैव प्रतिप्रसवः। व्रीहिषष्टिकमुद्गाश्च कलायाः सतिलं पय
यः। श्यामाकाश्च शालिनीवारा गोधूमाद्या व्रते हिताः। कूष्माण्डालाबुवार्त्ताकपालंकीज्योत्स्निकास्त्यजेत्। चरुभैक्षं स राम:
क्तुकणाः शाकं दधि घृतं मधु। श्यामाकाः शालिनीवाराः यावकं मूलतण्डुलम्। हविष्यं व्रतनक्तादावग्निकार्यादिके १५
हितं। मधुमांसविहायान्यद्व्रते च हितमीरितमिति। शमीधान्यं माषादि। पालंकी मध्यदेशे पोई इति प्रसिद्धा। ज्यो।

त्रिकाके ष्यानकी ॥ मितान्नं रायं गौतमः । क्रमभैक्ष्यं सक्तुं यावकं शाकं पयो दधि । घृतमूलफलोदकानि हवींष्युत्तरोत्त-
रं प्रशस्तानि । पयो दधि घृतं च गव्यमिति । अन्ये च विशेषाः । एकादशी चातुर्मास्यादिप्रकरणेव स्पृंते । गृहीतव्रतत्यागे
तु मदनरत्ने छागलेयः । पूर्वं व्रतं गृहीत्वा यो नाचरेत्काममोहितः । जीवन्भवति चण्डालो मृतः श्वा चाभिजायते । तत्र प्रायश्चि-
त्तमुक्तं हेमाद्रौ वेद्गरये ऽग्निगरुडपुराणयोः । क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि । दिनत्रयं न भुंजीत मुंडनं शिरसोऽ-
थवेति । प्रायश्चित्ताम्नानादिति कात्यायनानुष्ठानेनास्तीति गम्यते । यत्तु प्रायश्चित्तं ततः कृत्वा पुनरेव व्रती भवेदिति वच-
चनं । अतिक्रोधमप्रविष्टं व्रतं कार्यमेवेति शूलपाणिः । तन्मध्ये व्रतलोपे व्रतशेषसत्वे तत्र व्रतशेषसमाप्तये । एतच्च शक्तविषयं । अश-
क्तौ तु कालहेमाद्रौ पुराणान्तरे । उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत् । तावद्धनानि वा दद्याद्भुक्तश्चेद्द्विगुणं तथा ।
भुक्तः कृतभोजनः । ब्राह्मणभोजने स्विनेति शेषः । सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान् । कुर्याद्द्वादशसंख्याकान्-
यथाशक्त्यातुरो नर इति । शुद्धितत्वे मात्स्ये । उपवासेष्वशक्तानां नक्तं भोजनमिष्यते । मदनरत्ने वायवीये । द्रव्यदानोप-
वासस्य फलं प्राप्नोत्यसंशयं । तथा अपरार्के देवलः । ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं । व्रतेष्वेतानि चत्वारि वरि-
ष्ठानीति निश्चयः । मात्स्ये । तस्मात्कृतोपवासेन स्नानमभ्यंगमर्दकं । वर्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप । अन्ये च नियमा

नि॰सि॰
व्रतप॰
२६

स्तत्रतत्रान्वेषणीयाः ॥ अथ स्त्रीव्रतेषु विशेष उच्यते । तत्र हेमाद्रौ व्रतकांडे गारुडे । गंधालंकारतांबूलपुष्पमालानुलेपनं । उ
पवासेन दुष्यंति दंतधावनमंजनमिति ॥ इदं च सभर्तृकोपवासविषयं । अंजनं च सतांबूलं कुंकुमं रक्तवाससी । धारयेत्सो
पवासापि अवैधव्यकरं यतः । विधवा यतिमार्गेण कुमारी वा यदृच्छयेति तत्रैव भविष्योक्तेः । तथा विष्णुधर्मे । सर्वेष्वनूप
वासेषु पुमान्वाप्यसुवासिनी । धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च । विधवा शुक्लवस्त्रमेकमेव हि धारयेत् । मनुर
पि । पुष्पालंकारवस्त्राणि गंधधूपानुलेपनम् । उपवासे न दुष्यंति दंतधावनमंजनं । मदनरत्ने व्यासः । दंतधावनपुष्पा
दि व्रतेष्वस्मान्न दुष्यतीति ॥ यद्यपीदं सर्वोपवासविषयं प्रतीयते तथापि शिष्टाचारात्सौभाग्याद्यर्थं क्रियमाणनवरात्रत्रि
रात्राद्युपवासविषयमेवालंकारधारणादिविषयं । असकृज्जलपानाच्च सकृत्तांबूलचर्वणात् । उपवासः प्रणश्येत दि
वास्वापाच्च मैथुनादित्यपरार्के देवलेन तन्निषेधात् । न चास्य पुंविषयत्वेन सावकाशत्वात् स्त्रीणां तांबूलादि प्राप्नो
तीति वाच्यं । तांबूलादिशास्त्रस्यैवैकादशीतरविषयत्वेन वैपरीत्यस्यापि सुवचत्वात् । यत्तु हरिवंशे । अंजनं रोचनं
चैव गंधाः सुमनसस्तथा । व्रते चैवोपवासे च नित्यमेव विवर्जयेत् । शिरसोभ्यंजनं सौम्ये नैव मे तत्प्रशस्यते । न पादयोर्न राम॰
गात्रस्य स्नेहनेति स्थितिः स्मृतेति । तत्तु नैवोक्तपुण्यकव्रतविषयं । न तु सर्वत्र सर्वोक्तविरोधादिति मदनरत्ने उक्तं । त २६

नैव। अशक्तश्चपातोरोपश्च कलहस्सकृतिस्तथा। उपवासात्कृतात्पापि सद्योऽशयति स्त्रियं। स्त्रियमित्युपलक्षणं। मदनरत्ने
शिवधर्मे। दानं व्रतानि नियमश्चात्ते ध्यानजृतं जपः। यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत्। ।अथ सूतिकादौ निर्णयः।
तत्र शावसूत्याशौचयोः सर्वस्मात्तु कर्मनिवृत्तिर्निबंधेषु स्पष्टैव। गोडास्तु तत्राशौचादाव पितामाहुः। जानूर्ध्वं तत्तजेना
तेनित्यकर्म न चाचरेत्। नैमित्तिकं च तदधः स्नवद्ध्को न चाचरेत्। लौतके च समुत्पन्ने ज्वरकर्मणि मे श्रुते। धूमोद्गारे तथा
वांते नित्यकर्माणि संत्यजेत्। अव्येमुक्ते त्वजीर्णे च नैव मुक्तो पि किंचन। कर्मकुर्यान्नरो नित्यं सूतके मृतके तथेति कालि
कापुराणात्। वस्तुतस्तु पूर्वं देवीश्रद्धोपक्रमात्तन्मात्र विषयत्वमस्येति युक्तं प्रतीमः। तथा हेमाद्रौ पाद्मे। गर्भिणी सूति
का दिश्च कुमारी वाथ रोगिणी। यदा शुद्धा तदान्येन कारयेत्प्रयता स्वयमिति। पुंसोप्येष विधिः लिंगस्याविवक्षितत्वात्।
तेनेयमिन्व्रते यत्सूतकाद्युक्तं तदन्येन कारयेत्। शरीर नियमान्स्वयं कुर्यादिति हेमाद्रिव्याख्यो। नव्रतिनोव्रतमध्ये इति वि
ष्णूक्तेश्च। आरंभस्तु न भवत्येवाशुद्धितत्वे विष्णुः। वऊ कालिकसंकल्पो गृहीतश्च पुण्यदिवसे सूतके मृतके चैव व्रतं तन्न
नैव दुष्यति। एतत्काम्यपरं। नित्यं त्वनारब्धमपि कार्यमिति गौडाः। मदनरत्ने। सर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः
तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितं। माधवीये कौर्म्मे। काम्योपवासे प्रक्रांते त्वंतरा मृतसूतके। तत्र काम्यव्रतं कुर्या

ह्वानार्चनविवर्जितमिति। एतेन संयोगे धिकारात्तद्व्रतांगदेवपूजादिकार्य्यमिति। वर्धमानोक्तिः परास्ताः। प्रारब्धपूजादिका
र्यमेव न वरात्रे तु तत्रैव विशेषं वक्ष्यामः। एवं रजस्वलापि। यत्तु सत्यव्रतः। प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्।
न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति तत्स्नातिनिधिना कारयेदित्येतत्परं। तदुक्तं मदनरत्ने मात्स्ये। अंतरा तु रजो
योगे पूजामन्येन कारयेदिति। प्रतिनिधयश्च निर्णयामृते पैठीनसिः। भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतं। अस्ना
सामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते। स्कांदे पि। पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा। एषामभाव एवान्यं ब्राह्मणं
वा नियोजयेत्। कात्यायनः। पितृमातृभ्रातृपतिगुर्वर्थे च विशेषतः। उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत्। मदनर
त्ने प्रभासखंडे। भर्त्ता पुत्रः पुरोधाश्च भ्राता पत्नी सखापि च। यात्रायां धर्मकार्येषु जायंते प्रतिहस्तकाः। एभिः कृतं महा
देवि स्वयमेव कृतं भवेत्। तत्रैव पापवीये। स्वयं कर्तुमशक्तश्च कारयीत पुरोधसेति तत्रैव वायवीये। स्वयं कर्तुमशक्तश्चे
त्कारयीत पुरोधसा। इदं च सर्ववर्णसाधारणमविशेषात्। यत्तु कश्चिन्महोदन्त्र्याह। शूद्रस्य ब्राह्मणादेरेव प्रतिनिधि
र्दुक्तो न शूद्रः। जपस्तपस्तीर्थसेवा प्रव्रज्या मंत्रसाधनं। विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति मरीचिवच
नादिति। तत्तुच्छं। प्रव्रज्यादीनां शूद्रेऽसंभवाद्विषये प्राप्त्यदर्शनादिति न्यायेनास्य ब्राह्मणादिगोचरत्वात्। यदाह। उ

१वासोव्रतं होमस्तीर्थस्नानजपादिकमिति। पूर्वार्धस्तदापि स एव दोषः। स्त्रीशूद्रपतनानि षडिति मानवीये जपनिषे
धात्। आत्ते णोहीनवर्णस्य यः कुर्यात्कर्म किंचन। स तां जातिमवाप्नोति इह लोके परत्र चेति कालहेमाद्रौ मरीचिनिषे
धाच्च। वस्तुतस्तु। संस्पर्शता वचनमात्रमन्त्रोच्चारणं इति प्रतिनिषेधे ॥ कार्यवार्त्ते स्थले। अत्र विशेषमाह त्रिकाण्डमण्डनः। का
म्यप्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः। काम्ये तूपक्रमादूर्ध्वं केचिदिच्छन्ति तं विदुः। न स्यात्प्रतिनिधिर्मन्त्रस्वा
मिदेवाग्निकर्मसु। स देशकालयोर्नास्ति नारणेरग्निरेव सः। नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्। हिरण्यके
शिसूत्रेपि। न स्वामित्वस्य भार्यायाः पुत्रस्य देशस्य कालस्याग्नेर्देवतायाः कर्मणः शब्दस्य च प्रतिनिधिर्विद्यत इति।
ग्मथव्रतादिसन्निपाते निर्णयः। तत्र तिथिद्वयसन्निपाते तत्रोक्तं दानहोमादि क्रमेणानुष्ठेयमविरोधात्। इदं स्ववीर
व्येष्ठेवा। एकमध्येऽन्यकाम्यकर्मारंभस्तु न भवत्येव गुणफलादृते। यस्य यस्ते व्रतं तेन तरणयत्नेन स्थापयेत यत्नेन निरूपितं ज्ञा
तीति राणकस्तत्र श्रुतेः। यत्तु व्रतादिकर्ममात्रमनारम्भे न व्यवधानदोषः सर्वत्र साम्यात्। शिष्टास्तु। कार्त्तिकस्नानादिमध्ये
लक्षहोमं तुलाभारं तप्तश्रवणादि चाचरन्ति। तन्नित्यमध्ये काम्यमध्ये तु चिंत्यं। यत्र नत्वैकमक्तादौ विरोधस्तत्र माध्य
म्यादेकमक्तं कार्यं। नक्तं तु परेद्युस्तत्तिथौ गौणकाले कार्यम्। समकालीनविरुद्धव्रतादौ तु त्वेकं स्वयं कृतान्यद्भार्य्या

नि॰ प्र॰
तिथि नि॰
१८
18

दिनाकार्ये इति माधवः। यत्तु। शिवरात्र्यादौ तिथिमध्ये पारणयां निशि भोजनं प्राप्तं। तदष्टम्यादौ दिवा भुक्त्वा रात्रौ
भुक्त्वा च पर्वणि। एकादश्यां दिवा रात्रौ भुंक्तो चांद्रायणं चरेदिति। तन्निषेधस्य। तत्र पारणया वैधत्वाद्दिवैव भोज
नम्। निषेधस्तु रागप्राप्तभोजनविषयः। एवमष्टम्यादिनक्तव्रते सक्रोत्स्यादौ रवौ संक्रष्ट चतुर्थ्यां च रात्रौ भोजनम्।
यत्त्वष्टम्यादौ दिवा भुजिनिषेधः संक्रमे च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः। यद्यपि पुत्रिण उपवासो
पि निषिद्धस्तथाप्युपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेदिति वचनात् किंचिद्भक्षयित्वोपवासः कार्यः। चांद्रायणमध्ये एकादश्यादौ तु भो
जनमेव कार्यम्। चांद्रायणस्य काम्यत्वेन नित्यबाधकत्वात्। अबाधेन गत्यंतरसंभवाच्च। एकादश्यामेकांतरोपवासादिपारणायां ज
लपारणं कृत्वोपवसेत्। आपो वा अशितमनशितं चेति श्रुतेः। एवं श्राद्धदर्शमासोपवासश्राद्धप्रदोषादि ज्ञेयम्। एवं काम्यनैमित्तिक
नित्यत्वादिकृतं तद्बलाबलं स्वयमूह्यमिति दिक्। इति निर्णयसिंधौ परिभाषासमाप्ता॥ ॥अथ प्रतिपदादिनिर्णयः।
शुक्लप्रतिपदपराह्नव्यापित्वे पूर्वा ग्राह्या। युग्मवाक्यात् प्रतिपत्संमुखी कार्या या भवेदापराह्निकीति स्कांदोक्तेः। शुक्लास्यास्मृति
प्रतिपत्तिथिः प्रथमतश्चैव सा पराह्ने भवेदिति दीपिकोक्तेश्च। अपराह्नश्च पंचधाभक्ते दिने चतुर्थो भागः। तदभावे सायाह्नव्यापिनी एम:
ग्राह्या। तदभावे तु सायाह्नव्यापिनी परिगृह्यतामिति माधवोक्तेः। कृष्णा तु परा। कृष्णा तूत्तरतोखिलेति दीपिकोक्तेः। कृष्णावि १८
द्धैवेत्यनंतभट्टः। सर्वतिथिषु वर्ज्यान्युक्तानि कृत्ये दीपिकायां। कूष्माडं बृहतीं फलानि लवणं वर्ज्यं तिलाम्लं तथा तैलं चाम

लकं दिवं प्रवसता श्रीषं कपालांत्रकं । निष्पावांश्च मसूरिकां फलमथो वृंताकसंज्ञं मधु द्यूतं स्त्रीगमनं क्रमात्प्रतिपदादिष्वेव
माषोडश । श्रीषं नालिकेरं । कपालं अलाबू । अंत्रं पटोलम् । भूफलः । कूष्मांडं बृहती तारं मूलकं पनसं फलं । धात्री शिरः कपा
लांत्रं नख चर्म तिलानि च । तुरकमीगना सेवा प्रतिपत्सु च तिस्रजेत् । नखं शिंबी । चर्म मसूरिका । द्वितीया तु रुक्मा सर्वा स्मृत्यो
त्तरेति हेमाद्रिः । ह्रस्मा द्वितीयादिमा । सर्वा ज्ञेय द्विसास्थिता तु परतः सर्वैतिदीपिकोक्तेः । माधवानंतभट्टमते तु सर्वापि द्वि
तीया परा । तथा च माधवः । सर्वे द्युरसती प्रातः परे द्युस्त्रिमुहूर्तगा । सा द्वितीया परे ग्राह्या पूर्वे विद्धा न तोन्यथेति । तृतीया तु स
र्वमते रंभाव्यतिरिक्ता परैव । तेन युग्मवाक्यं परं भाव्रतविषयम् । रंभाव्रतं वर्जयित्वा तु तृतीया द्विजसत्तम । अन्येषु सर्वका
र्येषु गणयुक्ता प्रशस्यत इति ब्रह्मवैवर्तात् । गौरीव्रते तु विशेषमाह माधवः । मुहूर्त्तमात्रसत्वेपि दिने गौरीव्रते परे । शुद्धा
धिकायामप्येवं गणयोगप्रशंसनादिति । चतुर्थ्यपि सर्वमते गणेशव्रतातिरिक्ता परैव । युग्मवाक्यात्तु । एकादशी तथा ष
ष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति माधवीये बृहद्वसिष्ठोक्तेश्च । नागचतुर्थी तु मध्याह्न
व्यापिनी पंचमीयुता च ग्राह्येति माधवीये निर्णयामृते चोक्तम् । युगं मध्यं दिने यत्र तत्रोपोष्य फणीश्वरान् । क्षीरेणाप्ला
व्य पंचम्यां पूजयेत्प्रयतो नरः । विषाणि तस्य नश्यंति न तां हिंसंति पन्नगा इति माधवीये देवलोक्तेः । युगं चतुर्थी । पूर्वमध्या

नि॰प्र॰
ना॰पं॰नि॰
१९
19

ह्नव्यापी पूर्वा। अन्यपक्षेषु परैव। पंचम्यां पूज्योक्तेः। गणेशव्रते तु तृतीयायुतैव। चतुर्थी तु तृतीयायां महापुण्यफलप्रदा। कर्त्तव्या व्रति
भिर्वत्स गणनाथसुतोषिणी इति हेमाद्रौ ब्रह्मवैवर्त्तात्। माधवीये तु गणेशव्रते मध्याह्नव्यापिनी मुख्या। चतुर्थी गणनाथस्य मातृविद्धा प्र
शस्यते। मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनीति बृहस्पतिवचनात्। प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप इति तत्कल्पेऽभि
धानाच्च। तेन परदिने तत्त्वे परा। अन्यथा पूर्वैवेत्युक्तम्। वस्तुतस्तु भाद्रशुक्ले चतुर्थ्यादौ यत्र गणेशव्रतविशेषे मध्याह्ने पूजोक्ता तद्विषय
याण्येव प्रागुक्तवचनानि न तु सार्वत्रिकाणि। संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेस्तेन सर्वत्र गणेशव्रते पूर्वैवेति सिद्धं।
संकष्टचतुर्थी तु चंद्रोदयव्यापिनी ग्राह्या। दिनद्वये तत्त्वे मातृयोगस्य सत्त्वात्पूर्वैवेति केचित्। अन्ये तु दिने मुहूर्त्तत्रयादिरूपस्य तृती
यायोगस्याभावात् परदिने माधवोक्तमध्याह्नव्याप्तिसत्त्वात् समत्वाच्च परैवेत्याचक्षते। दिनद्वये तदभावे तु परैव। गौरीव्रते पूर्वैव। ग
णेश गौरी बहुला व्यतिरिक्ताः प्रकीर्त्तिताः। चतुर्थ्यः पंचमीविद्धा देवतांतरयोगत इति मदनरत्ने ब्रह्मवैवर्त्तात्। पंचमी तु माधवमते
सर्वापि पूर्वा। चतुर्थीसंयुता कार्य्या पंचमी परया न तु। दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति हारीतोक्तेः। हेमाद्रिमते तु कृष्णा
पूर्वा सिता परा। कृष्णा पूर्वयुता सिता परयुता स्यात्पंचमीति दीपिकोक्तेः। वस्तुतस्तु हारीतोक्तिरुपवासविषया। प्रतिपत्पंचमी चैव राम:
सावित्री भूतदर्शिमा। नवमी दशमी चैव नोपोष्याः परसंयुता इति ब्रह्मवैवर्त्तात्। यत्तु। पंचमी तु प्रक [redacted] १९

त्तं व्यापष्ठ्यायुक्ता तु नारदे त्वापस्तंबीयं तन्नागपूजाविषयमित्यनंतभट्टनिर्णयामृतादयः। चमत्कारचिंतामणौ चापं-
चमी नागपूजायां कार्या षष्ठीसमन्विता। तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति। तेन नागपूजादौ परैव। यत्तु मदनर-
त्ने दिवोदासीययोः श्रावणे पंचम्यतिरिक्ता पूर्वैवेत्युक्तम्। श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य पं-
चम्यश्चतुर्थीसहिता हिता इति संग्रहोक्तेः। गलेऽस्कंदयोगाभ्यां क्रमान्नागः शुभाशुभः। मित्रामित्रे तयोः पत्रे नागा
नामास्तु वर्हिणामिति षट्त्रिंशन्मताच्च। चतुर्थीयुतत्वमुक्तं तदुपवासादिविषयम्। पन्नेवाहने। षष्ठी सर्वव्रते स्कंदव्रता-
तिरिक्ता परैव युग्मवाक्यात्। षष्ठ्यायुता सप्तमी च कर्त्तव्या तात सर्वदेति स्कांदाच्च निर्णयामृते। षष्ठी च सप्तमी चैव
वारश्चेदंशुमालिनः। योगोऽयं पद्मको नाम सूर्यकोटिग्रहैः समः। अष्टमी तु सर्वमते कृष्णा पूर्वा सिता परा। व्रतमात्रेऽष्टमी
कृष्णा पूर्वा शुक्लाष्टमी परेति माधवोक्तेः। परयुक् शुक्लाष्टमी पूर्वयुक् कृष्णेति दीपिकोक्तेश्च। शिवशक्त्युत्सवे तु पु-
त्तरा। पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवकृदिति माधवोक्तेः। दिवोदासीये भविष्ये। यदा यदा सिताष्टम्यां बुधवारो भवे-
त्क्वचित्। तदा तदा हि साग्राह्या एकभक्ताशनेन्नृप। संध्याकाले तथा चैत्रे प्रसुप्ते च जनार्दने। बुधाष्टमी न कर्त्तव्या हंति
पुण्यं पुराकृतं। नवमी तु सर्वमते पूर्वा। युग्मवाक्यात्। न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति स्कांदाच्च। दशमी पू-
र्वा परा वेति हेमाद्रिः। कृष्णा पूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थितेति माधवः। वस्तुतस्तु युग्म्या नवमीयुतैव ग्राह्या। दश

मीतु प्रकर्त्तव्या सदुर्गा द्विजसत्तमेत्यापस्तंबोक्तेः। यत्तु संपूर्णा दशमी कार्य्या पूर्वया परयाऽथवेति अंगिरसोक्तं तन्नवमी-
नि॰प्र॰प॰ युक्तालाभे औदयिकी ग्राह्येत्येवंनेयम्। ।अथैकादशी। तत्रैकादश्युपवासो द्वेधा। निषेधपरिपालनात्मको व्रतरूपश्च। तत्राद्य-
एका॰नि॰ न शंखेन पिबेत्तोयं न खादेन्मत्स्यसूकरौ। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति कौर्म्मे देवलाद्युक्तः। अग्निपुराणे गृहस्थो
२० ब्रह्मचारी च आहिताग्निस्तथैव च। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति। न चात्र पर्युदासेन व्रतविधिस्तद्धेतुव्रता-
20 दिशब्दाभावात्। व्रतरूपस्तु ब्रह्मवैवर्त्ते। प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि। दशम्यामुपवासस्य प्रकुर्य्याद्वैष्णवं व्र-
तमिति। इदं च शिवभक्तादिभिरपि कार्य्यम्। वैष्णवो वाथ शैवो वा सौरोऽप्येतत्समाचरेदिति सौरपुराणाच्च। सोऽपि द्विधा।
गारु नित्यः काम्यश्च। उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति गारुडोक्तेः। पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणमिति नार-
दोक्तेश्च नित्यता। यदिच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति कौर्मादिषु फ-
लश्रुतेश्च काम्यता। उभयैकादशीव्रतं च गृहस्थातिरिक्तानामेव नित्यं। गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं न कृष्णायां।
एकादश्यां न भुंजीत पक्षयोरुभयोरपि। वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही इति देवलोक्तेः। न चानेन निषेधपालनमे-
व वनस्थयतिविषये उपसंक्रियते न तु व्रतमिति वाच्यम्। अस्य पर्युदासेन व्रतविधिपरत्वात्। अन्यथा पूर्वोक्ताग्निपुराण- रामः
वचनेन निषेधपालने गृहस्थस्याधिकारोक्तिविरोधः स्यात्। निषेधस्य निवृत्तिमात्रपरत्वेन विशेषानपेक्षणादुपसंहारायो- २०
गात्। अभावस्य धर्म्मत्वाभावाच्च। तस्मादनेन सर्वेषामेकादशीव्रतविधायिनां सामान्यवाक्यानां वनस्थयतिविषये उपसं-

हारान्न गृहस्थस्य कृष्णायां नित्यव्रतप्राप्तिः। कथं तर्हि संक्रांत्यामुपवासं च कृष्णैकादशिवासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्
गृहीति नारदादिवचनेषु कृष्णानिषेधः। आप्यभावादिति चेत्। श्रूयताम्। शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या
गृहस्थेन नान्या कृष्णा कदाचनेति पाद्मे। गृहस्थस्याषाढीकार्त्तिकीमध्यस्था या कृष्णा विहिता सा पुत्रवतो निषिध्यते। अन्यकृ
ष्णायां तु न विधिः। सर्वविधीनां वनस्थयतिषूपसंहारात्। न निषेधः। आप्यभावात्। शयन्यादिवाक्यं त्वपुत्रगृहिगोचरमित्यनंतभ
ट्टहेमाद्र्यादिग्रंथाः। दीपिकायाम्। असितातु शयनीबोधांतरस्था व्यपोष्या नस्यात्सा त्वजिनोऽपीति। मदनरत्ने भविष्येऽपि। यथा शुक्ला
तथा कृष्णाद्वादशी नित्यदा प्रिया। शुक्ला गृहस्थैः कर्त्तव्या भोगसंतानवर्द्धिनी। मुमुक्षुभिस्तथा कृष्णा नतैस्तैनोपदर्शितेति। नि
षेधपालनं काम्यव्रतं च सर्वं कृष्णायां सर्वेगृहिणां संभवत्येव। पुत्रवांश्च सभार्यश्च स्वबंधुयुक्तस्तथैव च। उभयोः पक्षयोः का
म्यव्रतं कुर्यात्तु वैष्णवमिति नारदोक्तेः। एतच्च सर्वं कालादर्शे उक्तम्। विधवाया वनस्थस्य यतेश्चैकादशीद्वये। उपवासो गृहस्थस्य शु
क्लायामेव पुत्रिणः। अपुत्रे निर्निषेधः कृष्णायां सिद्धिस्तस्य ततोव्रतं इति। आचार्यास्तु वैष्णवगृहस्थानां कृष्णापि नित्या। नित्यं
भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः। पक्षे पक्षे च कर्त्तव्यमेकादश्यामुपोषणं। सपुत्रश्च सभार्यश्च स्वजनो भक्तिसंयुतः। एकादश्या
मुपवसेत्पक्षयोरुभयोरपीति नारदोक्तेरित्याहुः। पुत्रशब्दश्चापत्यमात्रवचनः। नारायणभट्टैस्तु। पुमांस एव मे पुत्रा जायेरन्निति त्वत्रा
पत्यमात्रवाचित्वोक्तेः। जनयेद्बहुधा पुत्रानिति लिंगात्। पौत्री मातामहस्तेनेति मनूक्तेः। पुत्र्या अपत्यमित्यर्थे स्त्रीभ्यो ढक्। पौत्रेय

नि·सि·प·
व्रतपरि·
२१
21

इत्यापत्तेः। पुमान् पुत्रो जायत इति च। उपवासनिषेधे विशेषो वायवीय उक्तः। उपवासनिषेधे तु किंचिद्भक्ष्यं प्रकल्पयेत्। न दुष्यत्युपवा
सेन उपवासफलं लभेत्॥ भक्ष्यं च तत्रोक्तं। नक्तं हविष्यान्नमनोदनं च फलं तिलाः क्षीरमथांबु चाज्यं। यत्पंचगव्यं यदि वापि वायुः प्रश
स्तमत्रोत्तरमुत्तरं चेत्यलं। तत्र दशमीवेधो द्वेधा। अरुणोदयवेधः सूर्योदयवेधश्चेति। आद्यो गारुडे। दशमीशेषसंयुक्ता यदि स्याद
रुणोदये। नैवोपोष्यं वैष्णवेन तद्दिने एकादशीव्रतमिति। अरुणोदयस्वरूपं च माधवीये स्कांदे। उदयात्प्राक्चतस्रस्तु घटिका अरु
णोदय इति। यदपि। उदयात्प्राक् यदा विप्र मुहूर्त्तद्वयसंयुता। संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही इति गारुडसौरधर्मादिवचनं।
यच्च भविष्ये। आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता। एकादशी तु संपूर्णा विद्धान्या परिकीर्त्तितेति। तदप्युपसंहारन्याये
न दंडचतुष्टयपरमेव। हेमाद्रावप्येवं। यत्तु ब्रह्मवैवर्त्ते। चतस्रो घटिकाः प्रातररुणोदयनिश्चयः। चतुष्टयविभागोत्र वेधादीनां कि
लोदितः। अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयं। अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः। महावेधोपि तत्रैव। दृश्यतेर्को न
दृश्यते। तुरीयस्तत्र विहितो योगः सूर्योदये बुधैरिति। तदप्येवं यवक्षारारुणोदयवेधविशेषपरमेवेति माधवीये मदनरत्ने च।
अन्यस्तूदयवेधः। तथान्येपि हेमाद्रौ माधवीये गारुडे। उदयात्प्राक् त्रिघटिकाव्यापिन्येकादशी यदा। संदिग्धैकादशी नाम
वर्ज्येयं धर्मवृद्धये। हेमाद्रौ रात्रेरंत्योष्टमभागोप्यरुणोदय उक्तः। निशः प्रांते तु यामोर्द्धे देववादित्रबोधने। सारस्वतानध्यय
ने वारुणोदय उच्यत इति स्मृतेः। अत्रैके एषां सर्वपक्षाणां मुहूर्त्तद्वयेन क्रोडीकारं निशः प्रांत इति वचनाच्चरणे त्रिमानवर्णनात्।

रामः
२१

सार्धत्रिदंडादयोनेकेरुणोदयाः। तदाहहेमाद्रिः। सार्द्धघटिकात्रयोक्तिरष्टाविंशतिघटिकामानरात्रिविषया महत्तरास्तुरात्री
रपेक्षचतस्रोघटिकाइत्युक्तमित्याऊः। तन्न। अरुणोदयशब्दस्य अनेकार्थत्वापत्तेः। नचमुहूर्त्तद्वयमर्थः। दंडद्वयैकमुहूर्त्तादि
वेधानां तथाप्यनुपपत्तेः। नहितेषां यामार्द्धत्वमरुणोदयत्वम्। चास्ति। मुहूर्त्तद्वयस्ययामार्धस्य च चतस्रोघटिकाइत्यनेनोपसं
हारएवच न तदर्थः। नचसार्द्धंतु घटिकात्रयमित्यनेनापि तदापत्तिः शंक्या। तेन चतुर्दंडवेधस्यैवोक्तेः। चतुर्दंडैर्धघटी दशमी
सत्वेहि वेधस्तदर्थः। द्विघटिकादौ तदयोगाच्च। यत्तुमतं। कियतारुणोदयवेधइत्यपेक्षायां सार्द्धघटिकात्रयनियमादरुणोदये
ऽर्द्धघटिकातोन्यूनदशमीसत्वेनदोषइति। तन्तुच्छं। द्विदंडादावपि तदापत्तेः। दशमीशेषसंयुक्तो यदिस्यादरुणोदयः। नैवोपो
ष्यं वैष्णवेन तद्दिनैकादशीव्रतमिति गारुडे भविष्ये च योगमात्रनिषेधात्। नारदीयेपि। लववेधेपि विप्रेंद्र दशम्येकादशी त्य
जेत्। सुरायाबिंदुनास्पृष्टं गंगांभ इव निर्मलं। स्कांदेपि। कलाकाष्ठादिगत्यैव हस्यते दशमी विभो। एकादशीं पानकर्त्तव्यां व्रतं रा
जन्कदाचनेति। माधवोप्याह। सोयं कलाद्विवेधोरुणोदयवेधे सूर्योदयवेधे च समानइति। निगमेपि। सर्वप्रकारवेधोयं
मुपवासस्यदूषकः इति। अतएवमाधवे। नारुणोदयाद्यदंडेल्पदशमी स्पृष्टे संदृष्टका। हन्त्येन घटिका द्वययोगे संदिग्धा। मुहू
र्त्तव्याप्तौ संयुक्ता। उदये संकीर्णेत्युक्ता। अरुणोदयवेलायां दशमीयदि संगता। संदृष्टैकादशीतां तु मोहिन्यै दत्तवान्प्रभुरिति.

नि॰प्र॰
व्रतपरि॰
२२

गोभिलाद्युक्तेः। पूर्वोक्तगारुडादेश्च सामान्यतो विशेषतश्चारुणोदयवेधो निषिद्धः। यत्तु पूर्वभागोऽरुणोदय इति हेमाद्रिलेखनम्। यच्च महत्त
ताराज्ञीरिति तत्परमतं स्वयमेव दूषितं। अत्येषुक्तं। वेधतारतम्यं च दोषतारतम्यादुपपद्यत इति। दोषतारतम्यं च प्रायश्चित्ततारतम्याद
वगम्यते। तच्चोक्तं हेमाद्रौ स्मृत्यंतरे। अज्ञानाद्यदि वा मोहात्कुर्वन्नेकादशीं नरः। दशमीशेषसंयुक्तां प्रायश्चित्तमिदं चरेत्। कृच्छ्रपादं
नरश्चीर्त्वा गां च दद्यात्सवत्सिकां। सुवर्णस्यार्द्धकं देयं तिलद्रोणसमन्वितं। विधानांतरं तत्रैव। ब्राह्मणान्भोजयेत्त्रिंशद्गां च दद्या
त्सवत्सिकां। धरणस्यार्द्धकं देयं तिलद्रोणमथापि वेति। अत्र वेधतारतम्यात्स्वल्पस्येति हेमाद्रिः। निशः प्रांते इत्यपि दोषाधिक्या
र्थमेव। तस्माच्चतुर्घटिकात्मक एवारुणोदय इति सिद्धम्। अतेन षट्पंचाशद्दंडानंतरं दशमीवेधेऽप्यरुणोदयवेध उक्तो भवति।
अत एव तत्रैव कण्वेनोक्तः। उदयोपरि विद्धा तु दशम्यैकादशी यदि। दानवेभ्यः प्रीणनार्थं दत्तवान् पाकशासनः इति। स्मृत्यंत
रेपि। दशम्याः प्रांतमादाय यदोदेति दिवाकरः। तेन स्पृष्टं हरिदिनं दत्तं जंभासुराय त्विति। तत्रारुणोदयवेधो वैष्णवविषयः
। तथा केषुचिद्वैष्णवग्रहणात्। तत्स्वरूपं तु माधवीये स्कांदे। परमापदमापन्नो हर्षे वा समुपस्थिते। नैकादशीं त्यजेद्यस्तु यस्य
दीक्षास्ति वैष्णवी॥ विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यत इति। अत्रान्येषामपि प्रसक्तेरव्यभिचाराद्वैष्णवदीक्षा रामः
वत्त्वमेव वैष्णवत्वं। यद्यपि पित्रादेरागमदीक्षायां तन्मात्रस्यैव वैष्णवत्वं न तु पुत्रादेः तथापि स्वपारंपर्यप्राप्तिदृष्टमेव वैष्ण २२

वत्वेस्मार्तत्वंच।मन्यंते वृद्धाः।तत्वसागरे।भविष्ये।यथाष्टकला तथाष्टक्ष्मा यथाष्टक्ष्मा तथोत्तरा।तुल्यैते मन्यते यस्तु स वै वैष्णव उ
च्यते।केचित्तु दशम्यां नवमीवेधमपि सजंति।तत्र मूलं मृग्यं।उदयवेधस्तु परिशेषात्स्मार्तगोचरः।तदाह माधवः।अरुणोदयवे
धोत्र वेधः सूर्योदये तथा।उक्तौ वैद्दशमीवेधौ वैष्णवस्मार्त्तयोः क्रमात्।हेमाद्रिस्तु।केषांचिदर्द्धरात्रेपि दशमीवेधमाह।अ
र्द्धरात्रे तु केषांचिद्दशम्या वेध इष्यते।कपालवेध इत्याहुराचार्या ये हरिप्रियाः।न तन्मम मतं यस्मात्त्रियामा रात्रिरिष्यते इति
ब्रह्मवैवर्त्तात्।अस्यार्थः।अनद्यतने लङि॰ इत्यत्रातीतायाः रात्रेः पश्चिमं यामद्वयमागामिन्याः रात्रेः पूर्वं यामद्वयं दिवसश्च स
कल एषोद्यतनः कालः इत्युक्तं महाभाष्ये स एव वर्त्तमानः कालः एकादश्यहोरात्रे उपोष्या।तन्मध्ये दशमीप्रवेशे विद्धा।सा
त्याज्या।अत एव हेमाद्रौ दशम्याः संगदोषेण अर्द्धरात्रात्परेण तु।वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदेति तत्र दोष उ
क्तः।चतुरो यामान् दिवसस्येत्यर्थः।स्वमते तु रात्रेस्त्रियामत्वात् प्रहरत्रयमेव सर्वशेषः।तेन चतुर्थप्रहर एव वेधो युक्तः।सोप्य
रुणोदय एव सूर्योदयं विना नैव स्नानदानादिकं क्रमश्च इति मार्कंडेयपुराणात्।प्रत्यूषो हर्मुखं कल्य इति कोशादरुणोदयमार
भ्य सूर्यास्तु प्रवृत्तेस्तत्रैव निषेधः।तेन मतभेदाद्व्यवस्थेति केचित्।कैमुत्तिकन्यायेनारुणोदयवेधस्यैवेयं स्तुतिरिति तु
माधवः।यत्तु दिकं च दशमिस्तथैति वेधः स उपवासातिरिक्तविषय इति माधवः।सर्वप्रकारवेधो यमुपवासस्य दूषकः।सा

नि·प्र·
व्रतनि·
२२

२३

ईसमस्तु द्वृत्तिस्तु योगोयं बाधते व्रतमिति निगमादित्यलम्। तत्र माधवमते वैष्णवैररुणोदयविद्धा त्याज्या। यदा त्वेकादश्येव शु-
द्धा सती वर्द्धते द्वादशी वोभयं वा तदा परोपोष्या। एकादशी द्वादशी वाधिका चेत्पूज्यतो दिने। पूर्वं ग्राह्यं तूत्तरं स्यादिति वैष्णव-
निर्णय इति माधवोक्तेः। स्मार्तैस्तु सूर्योदयविद्धा त्याज्या। यदा त्वेकादशी शुद्धा सती वर्द्धते द्वादशी च समा न्यूना वा तदा गृह-
स्थैः पूर्वा यतिभिरुत्तरा कार्या। प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंयुता। द्वादश्यां च तथा तात दृश्यते पुनरेव च। पूर्वा का-
र्या गृहस्थैश्च यतिभिश्चोत्तरा विभो इति स्कांदोक्तेः। वर्धमानोप्येवमाह। उभयवृद्धौ तु शुद्धा विद्धा वा सर्वेषां परैव। संपू-
र्णैकादशी यत्र प्रभाते पुनरेव सा। सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि। इति नारदोक्तेः। द्वादशीमात्रवृद्धौ शुद्धायां पू-
र्वैव। न चेदेकादशी विद्धा द्वादशी परतः स्थिता। उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति नारदोक्तेः। द्वादशीमात्रवृ-
द्धौ तु शुद्धाविद्धेव्यवस्थिता। शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृशः इति माधवोक्तेश्च। मदनरत्नेप्येवम्। यत्तु विद्धाप्यवि-
द्धा विज्ञेया परतो द्वादशी न चेत्। अविद्धापि च विद्धा स्यात्परतो द्वादशी यदीति हेमाद्रौ पद्मवचनम्। तदेकादशीवृद्धौ ज्ञे-
यं तदुक्तं माधवेन। एकादशी द्वादशी चेत्युभयं वर्द्धते यदा। तदा पूर्वदिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनमिति। विद्धैकादश्यां द्वा- रामः
दशीमात्रवृद्धौ च सर्वेषां परैव। तत्रैवैकादशीमात्रवृद्धौ गृहिणः पूर्वा यतेरुत्तरा। पूर्वोक्तपद्मोक्तेः। एकादशीवृद्धौ चेत्तु २२

लोकेऽस्मिन्विशेषवतः। उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही इति शंखवचनोक्तेः। एतच्च शुद्धाविद्धातुल्यमिति भावः। यत्तु सोदश्यां
न लभ्येत द्वादशी यदि किंचन। उपोष्यैकादशी तत्र दशमीमिश्रितापि चेति स्कांदादावाप्यविरुद्धा निनिषिद्धे श्रवणलम्पेदिना
नि तु। मुहूर्त्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिः रातिश्च ष्यश्च गत्क्तेः। मुहूर्त्त पंचकेमरुणोदयमारभ्यत्ते यमोक्त्यान्यथोत्त
रेक्लि एकादश्यभावासंभवात्। तथा च सत्येव। सर्वत्रैकादशीकार्या द्वादशीमिश्रितानरैः। प्रातर्भवतु वा मा भूद्यस्मान्नित्यमु
पोषणमिति। यदपि हेमाद्रिणा शुद्धसमा शुद्धन्यूना वाधिके वा दशिका वेत्यत्र सर्वेषां परैव तु उक्तं तदपि वैष्णवविषयम्। स्मा
र्त्तानां तु पूर्वैवेत्यविरोधः। हेमाद्रिमते तूच्यते। तत्र शुद्धाविद्धा द्वयी नंदा त्रेधा न्यूनसमाधिके। षट्प्रकारा पुनस्त्रेधा द्वाद
श्यूनसमाधिके रित्यष्टादशैकादशीभेदाः। तत्र शुद्धाधिकन्यूनद्वादशिका शुद्धाधिकसमद्वादशिका च सकामैः पूर्वा नि
ष्कामैरुत्तराकार्या। प्रथमेऽहनि संपूर्णेति पूर्वोक्तस्कांदात्। ऊनद्वादशिकायां तु विष्णुप्रीतिकामैः रूपवासद्वयं कार्यं। संपू
र्णैकादशी यत्र प्रभाते पुनरेव सा। लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत्। उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरि
ति पूर्वस्मिन्नुक्तेः। शुद्धान्यूना शुद्धाधिका शुद्धसमाविद्धन्यूनाविद्धसमावाधिकद्वादशिका चेत्सर्वेषां परैवेति हेमाद्रिः।
मदनरत्ने तु शुद्धाधिका परा। संपूर्णैकादशी यत्रेति पूर्वोक्तेः। अन्याः पूर्वा। शुद्धाय दासमाहीना समाहीनाधिकोत्तरा। एका

नि॰ प्र॰
तिथिनि॰
२४
24
समासम

दशीमुपवसेन्नशुक्लां वैष्णवीमपीति स्कांदात् शुद्धाएकादशी। उत्तरा द्वादशी न चेदेकादशी विद्धेति नारदोक्तेश्च। यत्तु त्रिविद्धापि च
विद्धा स्यादिति पाद्मं तच्छुद्धाधिकापरम्। यत्तु संपूर्णैकादशी त्याज्या परतो द्वादशी यदि। उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम्
मित्यादि तद्वैष्णवपरम्। स्मार्त्तानां तु गृहस्थैर्वैतत्तु क्रमम्। विद्धन्यूनासमद्वादशिकातु मुमुक्षूणां पुत्रवतां च परा। अन्येषां पूर्वा। पुत्र
वतोपि गृहस्थैर्वेति मदनरत्ने। विद्धन्यूनान्यूनद्वादशिका च सैव सर्वैः कार्य्येति हेमाद्रिः। मुमुक्षूणां परान्येषां पूर्वेति मदनरत्ने। नि
र्वेधा दशिकोनद्वादशिका च मुमुक्षुभिः परान्यैः पूर्वा कार्य्या। दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते। शुद्धैव द्वादशी राजन्नु
पोष्या मोक्षकांक्षिभिरिति व्यासोक्तेः। मोक्षकांक्षिग्रहणादन्येषां पूर्वैव। सर्वत्रैकादशी कार्य्या द्वादशी मिश्रिता नरैः। प्रातर्भवे
तु वा मा वा यतो नित्यमुपोषणमिति पाद्मोक्तेः। विद्धाधिकसमद्वादशिका च सर्वेषां पूर्वैव। पारणाहे न लभ्येत द्वादशी कल
यापि चेत्। तदानीं दशमीविद्धाप्युपोष्यैकादशी तिथिरिति कृष्णस्य गोक्तेश्च। माधवमते तु। अत्र गृहिणां पूर्वा। यतेरुत्तरा।
विद्धाधिकन्यूनद्वादशिका मोक्षपापक्षयविष्णुप्रीतिकामैः परा कार्य्या। गृहस्थेन तु नैकं कार्य्यम्। एकादशी द्वादशी च रात्रि
शेषे त्रयोदशी। उपवासं न कुर्वीत पुत्रपौ [redacted]

रा॰म॰
२४

त्रसमन्वितइतिकौर्मे। दिनक्षयेउपवासनिषेधात्। दशम्येकादशीविद्धा द्वादशी च क्षयंगता। क्षीणासा द्वादशी ज्ञेयान
क्तंतत्र हरेः स्मृतमिति वृद्धशातातपोक्तेश्च। गृहिणः पूर्वत्रोपवासः। एकादश्याःशुद्धन्यूनत्वेऽस्तु समत्वेवा द्वादश्यान्यून
समत्वयोरेकादश्यामुपवासः। यानि तु दशम्यनुगताहन्ति द्वादशद्वादशीफलं। धर्मापत्यधनायूंषि त्रयोदश्यां तु पारणमि
ति। कौर्मादीनि दशमीवेधत्रयोदश्योः पारणयोर्निषेधकानि तानि विहितभिन्नपराणि। अत्रमूलवचनानितद्वस्या
चाकरेज्ञेया। यत्तु कालहेमाद्रौ। वज्रवाक्यं विरोधेन संदेहो जायते यदा। द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणमिति।
मार्कंडेयोक्तेः। संदिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत्। तथा। विवादेषु च सर्वेषु द्वादश्यां समुपोषणं। पारणं च त्रयो
दश्यामात्रेयं मायकीमुनेरिति पाद्मोक्तेश्च। वेधसंदेहे ज्योतिर्विदां विप्रतिपत्तौ वा परएकार्थ्येत्युक्तम्। तद्वैष्णवविषय
मित्यलंबहुना। । अथात्रोपयुक्तं किंचिदुच्यते। तत्र दशम्यामेकादशीयोगे दशमीमध्य एव भोजनं कार्यम्। एका
दश्यां न भुंजीतेति निषेधस्यैव निमित्तत्वात्। निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षत इति देवलोक्तेश्च। किंचित्तु एकाद
शीव्रतागत्वेन सर्वैर्द्युरेकभक्तविधानाद्विधिस्पृष्टे च निषेधानवकाशान्न काम्यव्रतांगभोजने निषेधः प्रवर्त्तते। तेनै
कादशीमध्ये पूर्वदिने भोजनमित्याहुः। अत्राधिकारी माधवीयकात्यायनोक्तः॥ [redacted]

नि.प्र.
व्र.नि.
२५
२५

अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः। एकादश्यामुपवसेत् पक्षयोरुभयोरपीति भविष्यब्रह्मवैवर्ते। ब्रह्मचारी च नारी च शु
क्लामेव सदा गृहीति। यत्तु विष्णुः। पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत्। आयुष्यं हरते भर्त्तुर्नरकं चैव गच्छतीति। इति त
द्भर्त्तुरननुज्ञाविषयमिति प्रागुक्तम्। उपवासासामर्थ्ये तु मार्कण्डेयकौर्म्मयोः। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवा
सेन दानेन न निर्द्वादशिको भवेत्। अत्र एकभक्तेन यो मर्त्य उपवासव्रतं चरेदित्येकभक्तादिरूपवासशब्दस्तद्धर्मातिदेशार्थः
तेन तत्संयुक्ताः सर्वे धर्मास्तस्यानापन्नेऽपि भवति संकल्पमंत्रे चैकभक्तादिपदेनोहः कार्य्य इति मदनरत्ने। तथा सामर्थ्ये
प्रतिनिधिना कारयेदिति प्रागुक्तम्। व्रताकरणे प्रायश्चित्तमाह माधवीये कात्यायनः। अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमीदि
वा। एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेदिति। अथ काम्यव्रतविधिर्लघुनारदीये। दशम्यादिमहीपाल त्रिदिनं परिवर्ज
येत्। गंधताम्बूलपुष्पादि स्त्रीसंभोगं महायशाः। तत्र दशम्यां विधिः कौर्मे। कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान्।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियं। तथा। शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने। द्यूतमत्यम्बुपानं च दशम्यां वैष्ण
वस्त्यजेत्। मदनरत्ने नारदीये। अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः। अवनीतल्पशयनाः प्रियासंगमवर्जिताः। व्र रामः
तघ्नान्याह हेमाद्रौ देवलः। असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात्। उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्। अ २५
शक्तौ तु मदनरत्ने देवलः। अत्यये चाम्बुपाने च नोपवासः प्रणश्यति। अत्यये कष्टे। विष्णुरहस्ये। गात्राभ्यंगं शिरोभ्यंगं ताम्बू

ले (पुनः स्नान) चानुलेपनम्। व्रतस्थो वर्जयेत् सर्वं यच्चान्यत्र निराकृतं। एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे। स्तेनहिंस
कयोः सख्यं कृत्वा स्तेन्यं च हिंसनं। प्रायश्चित्तं व्रती कुर्यात् जपेन्नाम शतत्रयम्। मिथ्यावादे दिवास्वापे च अञ्जनानां निषेवणे।
अष्टोत्तरं व्रती जप्यात् शतमष्टोत्तरं शुचिः। ओं नमो नारायणायेत्यष्टाक्षरः। तत्र पैठीनसिः। तांबूलचर्वणे स्त्रीसंभोगे मांस
निषेवणे। व्रतलोपो न चेत् कुर्यात् कृष्णावर्जुनिवर्जनमिति। संभोगो ऋतुकालादन्यत्र। रेतःसेकोत्थसंभोगमृते नान्यत्र त्वपः।
स्मृत इति तत्रैव कात्यायनोक्तः। हेमाद्रौ वसिष्ठः। उपवासे तथा श्राद्धे न कुर्याद्दन्तधावनं। दन्तानां काष्ठसंयोगो दहत्यास
प्तमं कुलं। काष्ठग्रहणान्मृल्लोष्टाद्यनिषेध इति हेमाद्रिः। विष्णुरहस्ये। श्राद्धोपवासदिवसे खादित्वा दन्तधावनं। गायत्र्या
शतसंपूतं अंबु प्राश्य विशुध्यति। निर्णयामृते व्यासः। वर्जयेत्पारणे मांसं व्रताहेप्यौषधं सदेति। एकादश्यां श्राद्धप्राप्तौ
कात्यायन आह। उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितं। मातापित्रोः क्षये प्रा
प्ते भवेदेकादशी यदि। आघ्राय पितृदेवांश्च आजिघ्रेत्पितृसेवितमिति हेमाद्र्यादिसर्वनिबंधेष्वेवं एतेनैकादशीनिमित्त
कं श्राद्धं द्वादश्यां कार्यमिति वदंतः परास्ताः। किं च महालये। सपक्षः सकलः पूज्यः श्राद्धषोडशकं प्रतीतिश्च तत्षोडशत्वं
पौर्णमास्यैकादश्यां च मन्वादिश्राद्धं त्वयाहोपरि ज्ञाने च तत्पदैकादश्यां विहितं श्राद्धं बाधितमेव स्यात् यद्यपि स्मृतिचंद्रिका।

यां प्रवृंति। अन्नाश्रितानि पापानि तदन्नो कुदतु रेव च। मज्जंति पितरस्तस्य नरके शाश्वती: समा इति। तस्माद्विरागप्राप्तेषु ज्ञिगोचरस्य
नि॰म॰ वैधं श्राद्धगोचरयत्तं महत्स्याद्हे समिस्यलं। यो पित्र्यकृतं श्राद्धं नित्यपाजल पिंड विना कृता इति लघुनारदीये एकादश्यां श्राद्ध नि
ग्र॰१॰ षेधः समानाविति भिन्नविषयः पूर्ववाक्यतं ग्रहणेन तु। नित्यश्राद्धपरिग्रहः। अव्रतघ्नान्याह मदनरत्ने देवलः। सर्वभूतभ
२६ यं व्याधिः प्रमादो गुरुशासनं। अव्रतघ्नानि पठ्यंते सकृदेतानि शास्त्रतः। स्कांदेपि। अष्टौतान्यव्रतघ्नानि आपो मूलं फलं पयः।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं। नारदीये। अनुकल्पोन्नरणं शोकः स्त्रीणां नो वरवर्णिनि। मूलं फलं पयस्तोयमु
पभोग्यं भवेच्छुभे। न त्वेव भोजनं केचिदेकादश्यां तु धे:स्म्यतम्। अस्यापवादः। शयने च समुत्थाने मत्स्याश्च परिवर्त्तने।
नरो मूलफलाहारी हृदिशल्यं ममार्पयेत्। इदं चातिसंकष्टविषयं। एते चाविरोधिनो निर्णयाः सर्वव्रतेषु स्तेयाः। तत्रै
कादश्यां संकल्पः। गृहीत्वोदुंबरपात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यद्वा चार्थ्येऽवधारयेत्। इति माध
वीये वराहोक्तेः। मंत्रस्तु विष्णूक्तः। एकादश्यां निराहारः स्थित्वाहमपरेहनि। भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्यु राम॰
तेति। पौवादीनां तु हेमाद्रौ सौरपुराणे। सावित्र्या प्रथवा नाम्ना संकल्पं तु समाचरेत्। शिवादिगायत्र्या यजुर्वेदे श्र २६
सिद्धाः वराहे। इत्युच्चार्य ततो विद्वान् पुष्पांजलिमथार्पयेत्। ततस्तज्जलं पिबेत्। अष्टाक्षरेण मंत्रेण त्रिर्जपेत्तेना

भिमंत्रितम्।उपवासफलंप्रेप्सुःपिबेत्पात्रगतंजलम्इतिकात्यायनोक्तेः।मध्यरात्रेउदयेवादशमीवेधेरात्रौसंक-
ल्पइतिमाधवः।दशम्याःसंगदोषेणअर्द्धरात्रात्परेणतु।वर्जयेच्चतुरोयामान्संकल्पार्चनयोःसदा।विद्धोपवासे
नभ्रंस्कदिनेत्युपवासमाहितः।रात्रौसंपूजयेद्विष्णुंसंकल्पंचतदापरेइतिनारदीयोक्तेः।तत्रैवकृष्णामभिधायदेवस्य
पुरतःकुर्य्याज्जागरंनियतोव्रती।द्वादश्यांनिवेदनमंत्रउक्तःकात्यायनेन।अज्ञानतिमिरांधस्यव्रतेनानेनकेशव।प्रसी-
दसुमुखोनाथज्ञानदृष्टिप्रदोभवेति।नारदीये।ब्राह्मणान्भोजयेच्छक्त्यादद्याद्वैदक्षिणांततः।स्कांदे।कांस्यंचैवोपवा-
संतुयोश्नातिद्वादशीदिने।नैवेद्यंतुलसीमिश्रंहत्याकोटिविनाशनम्।द्वादश्यांचवर्ज्यानाहबृहस्पतिः।दिवानिद्रा
परान्नंचपुनर्भोजनमैथुने।क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत्।हेमाद्रौब्रह्मांडपुराणे।पुनर्भोजनमध्यायो
भारआयासमैथुने।उपवासफलंहन्युर्दिवानिद्राचपंचमी।स्कांदे।परान्नंकांस्यतांबूलेलोभंवितथभाषणम्।व-
र्जयेदितिशेषः।विष्णुधर्मे।असंभाष्यान्हिसंभाष्यतुलस्यतसिकादलम्।आमलक्याःफलंवापिपारणेप्राश्यशु-
ध्यति।बृहन्नारदीये।रजस्वलांचचंडालंमहापातकिनंतथा।सूतिकांपतितंचैवउच्छिष्टंरजकादिकम्।भ्राद्रता।दिमध्ये
स्पृष्ट्वायातपद्येषांध्वनिमुत्तमः।अष्टोत्तरसहस्रंतुजपेद्वेदमातरं।एतद्व्रतंसूतकेपिकार्य्यम्।सूतकेमृतकेवा

27

अथ संवत्सरप्रतिपदमारभ्य तिथिकृत्येच कृत्यादिं ब्रूतेशुक्लादिमेव च विवाहादौ च सौरादिमासं कृते ९
विनिर्दिष्टो दितिशास्त्रं प्रायसोनुसृत्य तिथिनिर्णयस्तत्र संचानिरूप्यते तत्र मीनसंक्रान्तौ पश्चात्षोडश घटिकाः
पुण्यकालः रात्रौ च निशीथात्प्राक् परतश्च संक्रमे पूर्वोत्तरदिनार्द्धं पुण्यं निशीथे तु दिनद्वयमिति सामान्यनिर्णयाद्
वसेयम् अथ तिथिनिर्णयः तत्र चैत्रशुक्लप्रतिपदि वत्सरारंभः तत्रौदयिकी ग्राह्या चैत्रे मासि जगद्ब्रह्मा ससर्ज
प्रथमेहनि शुक्लपक्षे समग्रन्तु तदा सूर्योदये सतीति हेमाद्रौ ब्राह्मोक्तेः दिनद्वये तत्वाभावव्याप्तौ वा पूर्वैव तदुक्तेः
तिर्निर्णयस्थे चैत्रसितप्रतिपद्दि या वा एकोदये सवर्षेपुः उदयद्वितये पूर्वा नोदययुगलेपि पूर्वः स्यात् यस्माच्चै
त्रसितादेरुदयाज्ञानोः प्रवृत्तिरब्दादेरिति। वत्सरादौ वसन्तादौ बलिराज्ये तथैव च। पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति।
वृद्धवशिष्ठोक्तेः। चैत्रमासस्य या शुक्ला प्रथमा प्रतिपच्चवेतान्तरं किं ब्रह्मणः कृत्वा सोपवासं सुपूजनं। संवत्सरमवाप्नोति
सौख्यानि भृगुनंदनेति हेमाद्रौ विष्णुधर्मोक्तेः। यदा तु चैत्रो मलमासो भवति तदा देवकार्यस्य तत्र निषिद्धत्वाच्छुद्धे मा
सि संवत्सरारंभः कार्य इति केचिदाहुः। निष्कर्षस्तु शुक्लादेर्मलमासस्य सोन्तर्भवति चोत्तरदत्यादिवचनाद्ग्रिमव
र्षोक्तः प्रातान्मलमासमारभ्यैव वर्षप्रवृत्तेः शुक्लारम्भादाविव मलमासे एव कार्य इति वयं प्रतीमः॥ ननु शुक्लान्तादौ चै
त्रशुक्लप्रतिपदं तरस्याभावाद्युक्तं तन्मध्य एवानुष्ठानं। मलमासे तु शुद्धप्रतिपदं तरस्य संभवाच्छुद्धे एव वत्सरारं

भोयुक्त इति चेन्नांतोस्ति। नहि प्रतिपदंतरसत्वं प्रयोजकम्। द्विःकरणापत्तेर्वर्षे शास्त्रया पत्तेश्च अपितु वत्सरारंभः। सतु
मलमासेपीत्युक्तं प्राक्। । नहि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेन्तर्भवतीति ब्राह्मणाविस्तुवचनम्। अत्र तैलाभ्यंगो
नित्यः। वत्सरादौ वसंतादौ बलिराज्ये तथैव च। तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इति हृदव शिष्टोक्तेः। अस्या
मेव नवरात्रारंभः। तदुक्तं मार्कंडेयपुराणे। शरत्काले महापूजा क्रियते या च वार्षिकीति। तत्र परयुतैव ग्राह्या। अतो
मायुक्ता न कर्त्तव्या प्रतिपच्चंडिकार्चने। मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्वितेति देवीपुराणात्। निस्रोहेताः
पराः प्रोक्तास्तिथयः कुरुनंदन। कार्त्तिकाश्वयुजोर्मासोश्चैत्रे मासि च भारतेति हेमाद्रौ ब्राह्मोक्तेः। पराः परयुताः
। अत्र विशेषः पारणादिनिर्णयश्च शारदनवरात्रे वक्ष्यते। अत्र प्रपादानमुक्तमपरार्के भविष्ये। अतीते फाल्गुने
मासि प्राप्ते चैत्रमहोत्सवे। पुण्येह्नि विप्रकथिते प्रपादानं समारभेत्। दिलुपककम्प। ततश्चोत्सृजेयेद्विद्वान् मंत्रेणा रमः
नेन मानवः। प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता। अस्याः प्रदानात्पितरस्तृप्यंतु हि पितामहाः। अनिवार्यं
ततो देयं जलं मासचतुष्टयमिति। तथा। प्रपादानासमर्थेन विशेषाद्धर्ममीप्सुना। प्रत्यहं धर्मघटको वस्त्रसंवे

ष्टितानन:। आसनणस्फा,हेरयः शीतामलजलः शुचिः। तत्र मंत्रः। एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अ
स्य प्रदानात्सकला मम संतु मनोरथाः। अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति। स याति दानफलं सोपि प्राप्नोतीह
न संशय इति। चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां। संपूज्य दोलोत्सवं कुर्यात्। तदुक्तं निर्णयामृते देवीपु
राणे। तृतीयायां यजेद्देवीं शंकरेण समन्वितां। कुंकुमागरुकर्पूरमणिवस्त्रसुगंधकैः। स्रग्गंधधूपदीपैश्च दमने
न विशेषतः। आंदोलयेत्ततो वत्स शिवोमातुष्टये सदेति। अत्र चतुर्थीयुता ग्राह्या। मुहूर्तमात्रसत्वेपि दिने गौरी
व्रतं परे इति माधवोक्तेः। अत्रैव सौभाग्यशयनव्रतमुक्तं मात्स्ये। वसंतमासमासाद्य तृतीयायां जनप्रिय। सौभा
ग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिरिति। अत्रापि परयुतैव। इयं च मन्वादिरपि। अत्रैव प्रसंगात्सर्वमन्वा
दिनिर्णय उच्यते। तत्प्रोक्तं दीपिकायां। तिथ्यग्नीनतिथिस्तिथ्याशे हेलेऽश्मोनलोग्रहं। तिथ्यर्केन शिवो
ऽश्वो मा तिथिमन्वादयो मधोरिति। तिथिः पूर्णिमा। अग्निस्तृतीया नेति वैशाखे नास्तीत्यर्थः। आशा दशमी।
कृष्णेभः कृष्णाष्टमी। अनलस्तृतीया। ग्रहो नवमी। अर्को द्वादशी नेति मार्गे नेत्यर्थः। शिव एकादशी। अश्वः

सप्तमी। मघोश्चैत्रादारभ्यैता मन्वादय इत्यर्थः। अत्र मूलवचनानि हेमाद्रौ ज्ञेयानि। एताश्च मन्वादयो हेमाद्रिमते शुक्लपक्ष
स्याः। पौर्वाह्णिकाः। कृष्णपक्षस्यास्त्वापराह्णिका ग्राह्याः। पूर्वाह्णे तु सदा ग्राह्याः शुक्ला मनुयुगादयः। दैवे कर्मणि पित्र्ये च कृष्णे
चैवापराह्णिका इति गारुडवचनात्। अथो मन्वादियुगादिकर्मणि तिथयः। पूर्वाह्णिकास्तु सिते विज्ञेया अपराह्णिकाश्च बहु
ले इति दीपिकोक्तेश्च। कालादर्शे तु पराह्णव्यापित्वं मन्वादिषु प्रयुक्तान्न त्वयुक्तमिति युगादिनिर्णये वक्ष्यामः। अत्र श्राद्धमुक्तं
मात्स्ये। कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु। हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेदिति मन्वादिश्राद्धं मलमासे
सति मासद्वयेपि कार्य्यं। मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि च इति स्मृतिचन्द्रिकोक्तेः। अत्र पिंडरहितं श्राद्धं कुर्यात्। तदुक्तं
कालादर्शे। विषुवायनसंक्रांतिमन्वादिषु युगादिषु। विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेदिति। मन्वादिश्राद्धं च नित्यम
करणे प्रायश्चित्तदर्शनात्। तदुक्तम् ऋग्विधाने। त्वं भुवः प्रतिमं त्वं च शतवारं जलेजपेत्। मन्वादयो यदा न्यूनाः कुरुते नैव चा
पिय इति एवं प्रायश्चित्तवीक्षादिदर्शनं। तानि षण्णवति श्राद्धानि नित्यानि। तानि तु। अमा मनुयुगक्रांतिधृतिपातमहाल
याः। अन्वष्टक्यं तु पूर्वेद्युः षण्णवत्यः प्रकीर्तिता इत्युक्तानि। चकाराद् अष्टकाश्राद्धं। वासरमतिः। प्रवराक्याभिश्राद्धानि। पि
त्रोः क्षये त्वमावास्याकृत् तु संक्रोत्यनंत्यकाः। अपरपक्षे नवान्ने च मन्वादिषु युगादिषु। आषाढी कार्त्तिकी माघी वैशाखी च

त्यनंतकाः।२।१२।६।१२।४।१६।२।२४।५। मिलित्वा वासनातिः। चैत्रशुक्लतृतीयैव मत्स्यजयंती। अत्रैव प्रसंगाद्दशाव
तारजयंत्यो निर्णीयंते। तत्र पुराणसमुच्चये। मत्स्योभूद्धुतभुग्दिने मधुसिते कूर्मो विधौ माधवे वाराहो गिरिजासुते नभ
सि यच्छूने सिते माधवे। सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे रामो गोरितिथ्यावतः परमभद्रो मानवम्यां म
धोः।१। कृष्णोष्टम्यां नभसि सितपरे चाश्विने यद्दशम्यां बुद्धः कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण। अत्र मध्ये वाम
नो रामरामो मत्स्यः क्रोडश्चापराह्ने विभागे। कूर्मः सिंहो बौद्धः कल्की च सायंकालो रात्रौ कालसाम्ये च पूर्वैति केचित्तु स्फु
टान् श्लोकान् पठंति। यथा। चैत्रे तु शुक्लपंचम्यां भगवान्मीनरूपधृक्। ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः। चै
त्रे कृष्णनवम्यां तु हरिर्वाराहरूपधृक्। नरसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके। मासे भाद्रपदे शुक्लद्वादश्यां वामनो
हरिः। राधाशुक्लतृतीयायां रामो भार्गवरूपधृक्। चैत्रे शुक्लनवम्यां तु रामो दशरथात्मजः। नभस्ये तु द्वितीयायां बलभ
द्रो भवद्धरिः। अश्वले वऊत्नेष्टम्यां कृष्णो भूत्कंसकः। ज्येष्ठे शुक्लद्वितीयायां बौद्धः कल्की भविष्यतीति। कोंकणस्थ
वाराहपुराणस्थत्वेन वाक्यानि पठंति। आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ जयंती मत्स्यनाम्नीति तस्यां कार्यमुपोष
णं। नभो मासि तृतीयायां हरिः कमठरूपधृक्। नभस्य शुक्लपंचम्यां वराहस्य जयंतिका। वैशाखे तु चतुर्दश्यां नृसिंहः समप

द्युता। वैशाखस्य शुक्लपक्षे तु तृतीयायां भृगूद्वहः। मासि भाद्रपदे शुक्लैकादश्यां वामनो हरिः। चैत्रे नवम्यां रामोभूत् कौशल्यायां परः
३ पुमान्। श्रावणे वकुलाष्टम्यां वासुदेवो जनार्दनः। पौषस्य शुक्ले तु सप्तम्यां कुर्याद्वौद्धस्य पूजनं। माघस्य शुक्ले तृतीयायां कल्कि
नः पूजनं हरेः। प्रातः प्रातस्तु मध्याह्ने सायं सायं तथा निशि। मध्याह्ने मध्यरात्रौ च सायं प्रातरनुक्रमादिति। तदत्र समूल
त्व निर्णये सति कल्पभेदेन व्यवस्था द्रष्टव्या। एताश्च तत्तदुपासकानां नित्याः। अन्येषां तु काम्याः। जन्माष्टम्यादौ तु विशेषं व
क्ष्यामः। चैत्रशुक्लपंचमी कल्पादिः। तदुक्तं हेमाद्रौ मात्स्ये। ब्रह्मणो यादिनस्यादिः कल्पादिः सा प्रकीर्तिता। वैशाखस्य
तृतीया या कृष्णायाः फाल्गुनस्य च। पंचमी चैत्रमासस्य तस्यैवांत्या तथापरा। शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्त
मी। नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहं। कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः। अत्र सर्वो विनिर्णयो मन्वा
दिवज्ज्ञेयः। हेमाद्रौ ब्राह्मे। शुक्लायामथ पंचम्यां चैत्रे मासि शुभानना। श्रीर्ब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया। त
तस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुंचति। चैत्रशुक्लाष्टम्यां भवान्युत्पत्तिः। तत्र नवमीयुता ग्राह्या। अष्टमी नवमीयुक्ता नवमी रामः
चाष्टमीयुतेति ब्रह्मवैवर्त्तोक्तेः। अत्र भवानीयात्रोक्ता काशीखंडे। भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः। न जातु शोकं
लभते सदानंदमयो भवेदिति। अत्रैवाशोककलिकाप्राशनमुक्तं हेमाद्रौ लैंगे। अशोककलिकाश्चाष्टौ ये पिबंति

पुनर्वसौ । चैत्रे मासि सिते ऽष्टम्यां नरो शोकमवाप्नुयुः ॥ प्राशन मंत्रस्तु । त्वामशोक वराभीष्ट मधुमास समुद्भव । पिबामि
शोकसंतप्तो मामशोकं सदा कुर्विति । अत्र विशेषः पृथ्वीचंद्रोदये विष्णुः पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी । प्रा
तस्तु विधिवत्स्नात्वा वाजपेयफलं लभेदिति । तिथितत्वे कालिकापुराणे चैत्रे मासि सिताष्टम्यां यो नरो नियतेंद्रियः
स्नायाल्लौहित्यतोयेषु स याति ब्रह्मणः पदं । चैत्रं तु सकलं मासं शुचिः प्रयतमानसः । लौहित्यतोये यः स्नायात्स
कैवल्यमवाप्नुयात् । लौहित्यो ब्रह्मपुत्रः । मंत्रस्तु । ब्रह्मपुत्र महाभाग शांतनोः कुलसंभव । अमोघागर्भसंभूत पाप
लौहित्य मे हर । चैत्रशुक्ला नवमी रामनवमी । तदुक्तमगस्त्यसंहितायां । चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ । उद
ये गुरुगौरांश्वोः स्वोच्चस्थे ग्रहपंचके । मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये । आविरासीत्सकलया कौशल्यायां परः
पुमान् । तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा । तत्र जागरणं कुर्याद्रघुनाथपरो भुवीति । इयं च मध्याह्नयोगिनी ग्राह्या
चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि । सैव मध्याह्नयोगेन महापुण्यतमा भवेदिति तत्रैवोक्तेः । तथा चैत्रे मासे नवम्यां तु जातो
रामः स्वयं हरिः । पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा । श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका । तथा । केवलापि सदो
पोष्या नवमी शरदं संग्रहात् । तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतं । एवं द्युरेव मध्याह्नयोगे कर्मकालव्याप्तेः सैव ग्राह्या

।दिनद्वये मध्याह्नव्याप्तौ तदभावे वा सर्वदिने पुनर्वसुयुक्तामपि त्यक्त्वा पूर्वैव कार्या । तदुक्तं माधवीयेऽगस्त्यसंहिताया
म् । नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः । उपोषणं नवम्यां च दशम्यां चैव पारणमिति । अष्टमीविद्धा सत्त्वे विनोपे
ष्येति माधवः । रामार्चनचंद्रिकायामपि । विद्धैव चेद्दशमुक्ता व्रतं तत्र कथं भवेत् । विद्धानिषेधश्रवणान्नवमी चेति वा
क्यतः । वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि । दशम्यादिषु वृद्धिश्चेद् द्विधा त्याज्यैव वैष्णवैः । तदन्येषां च सर्वेषां व्रत
न्नत्रैव निश्चितमिति । अत्र दशम्यादिषु वृद्धिश्चेदिति तदन्येषामिति च वदन् यदा प्रातस्त्रिमुहूर्त्ता नवमी दशमी च
क्षयवशात्सूर्योदयात्प्रागेव समाप्यते तदा स्मार्त्तानां तत्रैव एकादशीनिमित्तोपवासात् । नवमीव्रतांगपारणलो
पः स्यात् । अतोऽष्टमीविद्धैव स्मार्त्तैः कार्या । वैष्णवानां त्वरुणोदयविद्धैकादशीहेयत्वान्न पारणलोपप्रसंग इति
द्वितीयैव तैः कार्येति सूचयति । दशमीवृद्ध्यभावेऽष्टमीविद्धाया अखण्डमध्याह्नव्यापित्वे सत्ये च वैष्णवैरपि विद्धैवो
पोष्येत्यर्थः । सिद्धमिदं च व्रतं संयोगपृथक्त्वन्यायेन काम्यं नित्यं च । तदुक्तं हेमाद्रावगस्त्यसंहितायां । उपोष याम:
णं जागरणं पितॄनुद्दिश्य तर्पणं । तस्मिन्दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः । सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसा
धनः । अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम् । पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः । यस्तु रामनवम्यां तु

मुंक्ते मोहाद्विमूढधीः। कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः। तथा। अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमं। व्रतान्य
न्यानि कुरुते न तेषां फलभाग्भवेत्। प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः। उपोषणं न कुरुते कुंभीपाके तु पच्य
ते। अत्र केचित्तदुपासकानामेवेदं व्रतं नित्यं नत्वन्येषामित्याहुः। अन्ये तु अकरणे दोषश्रवणात्। तस्मात्सर्वात्मना
सर्वैः कार्यं वै नवमीव्रतमिति सर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि सर्वेषां नित्यम्। अन्ये तु जन्माष्टम्या राव
पि तदुपासकानामेव नित्यतां वक्तुः कोवारयितेत्याहुः। अत्र विशेषो हेमाद्रौ वगस्त्यसंहितायां। आचार्यं चैव संपू
ज्य हृष्टयात्मार्पयन्निति। श्रीरामप्रतिमादानं करिष्येहं द्विजोत्तम। आचार्यो भव प्रीतः श्रीरामोसि त्वमेव च।
तथा। स्वगृहे चोत्तरे देशे दानस्योज्वलमंडपम्। शंखचक्रहनूमद्भिः प्राग्द्वारे समलंकृतं। गरुत्मच्छार्ङ्गबाणैश्च द
क्षिणे समलंकृतम्। गदाखड्गांगदैश्चैव पश्चिमे तु विभूषितम्। पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृतं। मध्ये ह
स्तचतुष्काढ्यं वेदिकायुक्तमायतं। ततः संकल्पयेद्देवं राममेव स्मरन्मुने। अस्यां रामनवम्यां च रामाराधनतत्परः।
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि। इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः। श्रीरामप्रीतये दास्ये रामभक्ता
य धीमते। प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे। अनेकजन्मसंसिद्धान्यभ्यस्तानि महांति च। ततः स्वर्णमयीं।

रामस्याति मोपलमानतः ॥ निर्मितां द्विभुजां दिव्यां वामांकस्थितजानकीं ॥ बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने ॥ वामेनाधः
5 करेणाढ्वीमालिंग्य संस्थितां ॥ सिंहासने राजतेत्र पल्लवद्वयविनिर्मिते ॥ तथा ॥ अशक्तो यो महाभागस्तु वित्तानुसारतः
पत्रेणैनाथ्यतद दर्शनम रर्यो देनवामुने ॥ सौवर्णं राजतं वापि कारयेद्रघुनंदनं ॥ पार्श्वे भरतशत्रुघ्नौ धृतछत्रकरावुभौ ॥
चापद्वयसमायुक्तं लक्ष्मणं चापि कारयेत् ॥ दक्षिणांगे दशरथं पुत्रावेक्षणतत्परं ॥ मातुरंकगतं रामं मिं
द्रनीलसमप्रभं ॥ पंचामृतस्नानं सर्वं संपूज्य विधिवत्ततः ॥ कौशल्या मंत्रस्तु ॥ रामस्य जननी चासि रामरूपमि
दं जगत् ॥ अतस्त्वां पूजयिष्यामि लोकमातर्नमोस्तु ते ॥ नमो दशरथायेति पूजयेत्पितरं ततः ॥ अत्र दशावरण
पंचावरणादिपूजान्यत्र ज्ञेया ॥ अशोककुसुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः ॥ दशाननवधार्थाय धर्मसंस्थापना
य च ॥ राक्षसानां विनाशाय दैत्यानां निधनाय च ॥ परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥ गृहाणार्घ्यं मया दत्तं
भ्रातृभिः सहितोनघ ॥ पुष्पांजलिं पुनर्दत्वा यामे यामे प्रपूजयेत् ॥ दिवैव विधिवत्कृत्वा रात्रौ जागरणं ततः ॥ ततः प्रा रामः
तः समुत्थाय स्नानसंध्यासंध्यादिकाः क्रियाः समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने ॥ ततो होमं प्रकुर्वीत मूलमंत्रेण
मंत्रवित् ॥ पूर्वोक्तपद्मकुंडे वा स्थंडिले वा समाहितः ॥ लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः ॥ साज्येन पायसेनैव स्मर

न्रा मम मनन्यधीः। ततो भक्त्या सुखं तोष्य आचार्यं पूजयेन्मुने। ततो रामं स्मरन्दद्यादेवं मंत्रमुदीरयन्। इमां स्वर्णमयीं
रामप्रतिमां समलंकृतां। चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते। श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः। इति दत्वा वि
धानेन दद्याद्वै दक्षिणां मुने। ब्रह्महत्यादि पापेभ्यो मुच्यते नात्र संशय इति। इयं मलमासे न कार्या। सुजन्मप्यजे
न्मस्यान्नोपवासः कृतो भवेदिति। न कुर्यान्मलमासे तु महादानं व्रतानि चेति माधवीये संग्रह वचनात्। ननु रामन
वमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेऽपि कर्त्तव्यता स्यादिति चेत्। अत्र ब्रूमः। नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः
र्वाच्या सा च निषिद्धेत्यप्रसंगः। स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले। इति निषेधाच्च। एवं जन्माष्टम्यादावपि
बोद्धव्यं। इति रामनवमी। ॥ चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे। चैत्रमासस्य शुक्लायामेकादश्यां तु केश
वैः। आंदोलनीयो देवेशः सलक्ष्मीको महोत्सवैरिति। ॥ चैत्रशुक्लचतुर्दश्यां दमनोत्सवः। द्वादश्यां चैत्रमासस्य
शुक्लायां दमनोत्सवः। बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति रामार्चनचंद्रिकोक्तेः। ऊर्जे व्रतं मधौ दो
लाश्रावणे तंतुपूजनं। चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः इति तत्रैव पाद्मवचनाच्च। शिवभक्तादिभिस्तु चतु
र्दश्यादौ कार्यम्। तत्रस्यात्त्वीयतिथिषु वक्ष्यामो दमनार्पणमिति तत्रैवोक्तेः। तिथयस्तु वह्निर्विरिंचो गिरिजा गणे

शः फणी विष्णवे दिनकृन्महेशः। दुर्गान्तको विश्वहरी स्मरश्च शर्वः शशी चेति तिथीशपूज्याः इत्युक्ताः। अथ यागमोक्त
दीक्षावतो दमनारोपणविधिः। रामार्चनचन्द्रिकायां। तस्मैकादश्यां। क्रियालोपविधानार्थं यत्त्वया विहितं प्रभो। नम
विघ्नो भवेदत्र कुरु नाथ दयां मयि। सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः। उपवासेन त्वां देव तोषयामि जग
त्पते। कामक्रोधादयो ये ते न मे सन्तु व्रतघातकाः। अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं। तावद्रक्षा त्वया कार्या सर्व
स्यास्य जगत्पते इति देवं संप्रार्थ्य दमनमादाय पंचगव्येन प्रोक्ष्य वारिणा प्रक्षाल्य अशोकमूले देवाग्रे वा। अशोको
य नमस्तुभ्यं कामस्त्रीशोकनाशन। शोकार्तिहर मे नित्यमानन्दं जनय स्वमे। इत्यशोके
तु श्याद्दिकालपर्यन्तः कालरूपो महाबलः। कलते चैव यः सर्वं तस्मै कालात्मने नमः। इति कालं
वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताश्रय। सहस्रमुखसंवास कामरूप नमोस्तु ते इति वसन्तं कामभस्म
समुद्भूत रतिवाष्पपरिप्लुत। ऋषिगन्धर्वदेवादिविमोहक नमोस्तु ते इति दमनं च संपूज्य नमोस्तु पंचबा रमः
णाय जगदाह्लादकारिणे। मन्मथाय जगन्नेत्र रतिप्रीतिप्रियाय ते इति दमनमुपस्थाप्य ओं कामाय
नम इति संपूज्य निशायां देवाग्रे पंचवर्णैः अष्टदलं दलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वर्तुलत्रं

येनद्धहिर्दृतं चतुरस्रं च कृत्वा तन्नकुंभं संस्थाप्योपरि वस्त्रे अष्टदले दमनं पूजयित्वा प्रजार्थं देवदेवस्य विष्णोर्लक्ष्मीप
तेः प्रभोः। दमनक त्वमिहागच्छ सान्निध्यं कुरु ते नमः। ॐ क्लीं कामदेवाय नमः। ॐ ह्रीं रत्यै नम इत्यावाह्य स्वर्णादि दिद्ये
क्लीं कामाय नमः। बीजादि नमोंतं सर्वत्र। भस्मशरीराय नमः। अनंगाय नमः। मन्मथाय नमः। वसंतसखाय। स्म
राय। इक्षुचापाय। पुष्पास्त्राय। इति पूजयित्वा ॐ तत्पुरुषाय विद्महे कामदेवाय धीमहि। तन्नोऽनंगः प्रचोद
यात्। इत्यष्टोत्तरशतं संमंत्र्य पूजयित्वा क्लीं नमः इति पुष्पांजलिं दत्वा। नमोस्तु पुष्पबाणाय जगदाह्लादकारिणे।
मन्मथाय जगन्नेत्र रतिप्रीतिप्रियाय ते इति नत्वा। आमंत्रितोसि देवेश पुराणपुरुषोत्तम। प्रातस्त्वां पूजयिष्यामि
सान्निधो भवते नमः। निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभं। सर्वथा सर्वदा विष्णो नमस्ते सुप्रसीद मे। इति देवं संप्र
प्रार्थ्य पुष्पांजलिं दत्वा। अस्त्रेण चक्रमंत्रेण वा रक्षां कुर्यात्। ततः प्रातर्नित्यपूजां कृत्वा पुनर्देवं संपूज्य द्वौ गं
धादिना पूतं दमनमादाय मूलमंत्रं पठित्वा। देवदेव जगन्नाथ वांछितार्थप्रदायक। हृदिस्थान्पूरय मे कामान्मम का
मेश्वरीप्रिय। इदं दमनकं देव गृहाण मदनुग्रहात्। इमां सांवत्सरीं पूजां भगवन्परिपूरय। इति मंत्रांते। पुनर्मूलमं
त्रेण देवे समर्पयेत्। ततोंगदेवताभ्यः स्वस्वमंत्रेण दत्वा प्रार्थयेत्। मणिविद्रुममालाभिर्मंदारकुसुमादिभिः। इयं

३५

सांवत्सरीं कृतं वास्तु गरुडध्वज । वनमालां यथा विष्णो कौस्तुभं सततं हृदि । तद्वद्दामनमंमी
7 मालां मृजां च हृदये वह । जानताजानता वापि न कृतं यन्मयार्चनं । तत्सर्वं पूर्णतां यातु त्वत्प्रसादे
द्रमापते । जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन । नमस्तेस्तु हृषीकेश महापुरुष पूर्वजाम
त्रहीनमिति च संप्रार्थ्यं पंचोपचारैः पुनः संपूज्य नीराज्य पारयेदिति । दीक्षारहितानां तु नाममंत्रेण सम
र्पणम् । अत्र च द्वादशीमतं स्वीकृत्य पारणहोमाद्यं । पारणाहे न लभ्येत द्वादशी घटिकापि चेत्
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे इति तत्रैवोक्तेः । गौणोपि काल उक्तस्तत्रैव । हरौ न दमनारोपः
स्यान्मधौ विघ्नतो यदि । वैशाखे श्रावणे वापि तत्प्रियो स्यात्तदर्पणं । श्रावणे वृश्चिकास्ते कर्त्तव्य
मिति नारद । इति पाठांतरं । इदं मलमासे न कार्यं । उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति । कालादर्
र्शे मलमासवर्ज्येषु परिगणनात् । उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा । उत्तरे नियतं कुर्यात् सर्वं तन्नि राम:
ष्फलं भवेदिति माधवीये प्रजापतिवचनाच्च । शुक्रास्तादौ तु कार्यमेव । पृथ्वीचंद्रवचनात् । उपाकर्मोत्स
र्जनं च पवित्रदमनार्पणं । ईशानस्य बलिर्विष्णोः शयने परिवर्तनं । कुर्याच्छुक्रस्य च गुरोर्मौढ्येपीति वि

निश्चय इति ज्योतिर्निबंधे ष्टद्यागार्ग्यवचनाच्च। इति दमनारोपः। चैत्रशुक्लेत्रयोदश्यामनंगव्रतं हेमाद्रौ भविष्ये।
चैत्रोत्सवे सकललोकमनोविनोदे कामं त्रयोदशतिथौ च वसंतयुक्तं। पत्न्या सहार्च्य पुरुषप्रवरोप्ययोषित्सौभाग्यरू
पसुतसौख्ययुतः सदा स्यात् इति तत्र सा पूर्वा ग्राह्या। त्रयोदशी तिथिः पूर्वः सित इति दीपिकोक्तेः। चैत्रशुक्ले चतुर्द्द
शी पूर्वा ग्राह्या। मधोः श्रावणमासस्य या च शुक्ला चतुर्द्दशी। सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचनेति हेमाद्रौ
बौधायनोक्तेः। परा पूर्वाह्णगामिनीति वा पाठः। अत्र केचित् यथाश्रुतमेवार्थं वर्णयंति। निशि भ्रमंति भूतानि शक्त
यः शूलभृद्यतः। अतस्तत्र चतुर्द्दश्यां सत्यां तत्पूजनं भवेदिति ब्रह्मवैवर्त्तात् हेमाद्रिमाधवादिलिखनमप्येवं। सं
प्रदायविदस्त्वाहुः। चतुर्द्दशी तु कर्त्तव्या त्रयोदश्या युता विभो इति स्कांद उत्सर्गः। तदपवादश्च तृतीयैकादशी
षष्ठी शुक्लपक्षे चतुर्द्दशी। पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति नारदीयवचनं। तदपवादश्च मधोः श्रावण
मासस्येति। तत्रापवादाभावे पुनरुत्सर्गस्य स्थितिरिति न्यायेन पूर्वविद्धैव ग्राह्येति सिद्ध्यति। ब्रह्मवैवर्त्तं तु सामा
न्यरूपमन्यत्र सावकाशमिति च। तेन पूर्वेद्युर्दिने मुहूर्त्तत्रयवेधे पूर्वा अन्यथोत्तरेति। चैत्रपूर्णिमा सामान्यनिर्ण
यात्सैव। अत्र विशेषो निर्णयामृते विष्णुस्मृतौ। चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्य

माप्नोतीति। तथा कल्पतरौ ब्राह्मे। मंदे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिका। तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्न
४ वेदिति। अत्र सर्वदेवानां दमनपूजोक्ता। तत्रैव वायवीये। संवत्सरकृतार्चायाः साफल्यायाखिलान्सुरान्। दमने
नार्चयेच्चैत्र्यां विशेषेण सदाशिवमिति। अत्र स्वीयतिथ्याः समुच्चय इति केचित्। स्वीयतिथावकरणे अत्र दमनपू
जनमित्यन्ये। दीक्षितास्तदितरविषयत्वेन व्यवस्थेत्यपरे। इयं मन्वादिरपि। सा च पूर्वमुक्ता। चैत्रकृष्णत्रयोद
शी महावारुणीसंज्ञको योगो गौडेषु प्रसिद्धः। तदुक्तं वाचस्पतिकृते मूलपाणौ च स्कान्दे। वारुणेन समायुक्ता मधौ
कृष्णा त्रयोदशी। गंगायां यदि लभ्येत सूर्यग्रहशतैः समा। शनिवारसमायुक्ता सा महावारुणी स्मृता। गंगायां यदि
लभ्येत कोटिसूर्यग्रहैः समा। शुभयोगसमायुक्ता शनौ शतभिषा यदि। महामहेति विख्याता त्रिकोटिकुलमुद्धरेत्। त
त्रैव ज्योतिषे। चैत्रासिते वारुणऋक्षयुक्ता त्रयोदशी सूर्यसुतस्य वारे। योगे शुभे सा महती महत्या गंगाजलेऽर्कग्रह
कोटितुल्येति। त्रिस्थलीसेतौ ब्रह्माण्डपुराणे। वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी। गंगायां यदि लभ्येत शतसू
र्यग्रहैः समेति। चैत्रकृष्णचतुर्दश्यां विशेषः पृथ्वीचंद्रोदये पुलस्त्यः। चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवस
न्निधौ। न प्रेतत्वमवाप्नोति गंगायां तु विशेषतः इति। गौडैस्त्वेतद्देवं शुक्लचतुर्दश्यामित्येवं देवलीयत्वेन पठितम्।

राम:

८

॥ इति रामकृष्णभट्टसूनुकमलाकरभट्टकृते निर्णयसिंधौ चैत्रमासः ॥ ॥ मेषसंक्रमे प्रागपरा दश घटिकाः पु
ण्यकालः। रात्रौ तु प्रागुक्तं। अत्र धर्मकुंभदानमधुसूदनपूजोक्ता षष्ठ्यां चंद्रोदये पाद्मे। तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणं।
दानं धर्मघटीनां च मधुसूदनपूजनं। माधवे मासि कुर्वीत मधुसूदनतुष्टिदं। अथ वैशाखस्नानं। तत्र षष्ठ्यां चंद्रोदये वि
ष्णुस्मृतिपाद्मयोः। तुलामकरमेषेषु प्रातःस्नानं विधीयते। हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति सौरमास
उक्तः। अन्यस्य दैवमुक्तं तत्रैव पाद्मे। मधुमासस्य शुक्लायामेकादश्यामुपोषितः। पंचदश्यां च मे वीर मेषसंक्र
मणे तु वा। वैशाखस्नाननियममाचरेद्ब्राह्मणानुज्ञया। मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं। तत्र मंत्रः। वैशाखं सक
लं मासं मेषसंक्रमणे रवेः। प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः। मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात्।
निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहं। माधवे मेषगे भानौ मुरारे मधुसूदन। प्रातःस्नानेन मे नाथ फलदो भव
पापहन्। इति। तीर्थविशेषोऽपि तत्रैवोक्तः। मेषसंक्रमणे भानौ माधवे मासि यत्नतः। महानद्यां नदीतीर्थे नदे सर
सि निर्झरे। देवखातेऽथवा स्नायाद्यथाप्राप्ते जलाशये। दीर्घिकाकूपवापीषु नियतात्मा हरिं स्मरन्निति। संकल्पे
च तत्तत्तीर्थनामग्राह्यं। अस्नातेषु विष्णुतीर्थमिति वदेत्। यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः। तत्रैव सुवार

णं कार्यं विष्णुतीर्थमिदं स्मृतिः। तीर्थस्य देवता विष्णुः सर्वत्रापि न संशय इति तत्रैवोक्तेः। तथान्योपि विशेषस्तत्रैव पाद्मे तु
१ लसीदलं गोरसं तथा पुष्पं चैव माधुद्विषे। विशेषेण तु वैशाखे नरो नारायणो भवेत्। माधवं सकलं मासं तुलस्या योऽर्च
र्चयेन्नरः। त्रिसंध्यं मधुहंतारं नास्ति तस्य पुनर्भवः। तथा। प्रातःस्नात्वा विधानेन माधवे माधवप्रियं। योऽश्वत्थमूलमा
सिंचेत्तोयेन जनार्दन। कुर्यात्प्रदक्षिणं तत्तु सर्वदेवमयं ततः। पितृदेवमनुष्यांश्च तर्पयेत्सचराचरम्। योऽश्वत्थम
ध्येये देवमुदकेन समं ततः। कृत्वा नाम सुमेते नरा दितस्यान्न संशयः। कंडूयपृष्ठतो गां तु स्नात्वा पिप्पलतर्पणं। कृत्वा
गोविंदमभ्यर्च्य न दुर्गतिमवाप्नुयात्। एकभक्तं तथा नक्तमयाचितमतंद्रितः। माधवे मासि यः कुर्यात् लभते सर्वमी
प्सितं। वैशाखे विधिना स्नात्वा मेषसंक्रांतिके महि। हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः। व्रतं दानं दमो देवि
मधुसूदनपूजनं। अपि जन्मसहस्रोत्थं पापं दहति दारुणं। मदनरत्ने स्कांदे। प्रपा कार्या च वैशाखे देवे देया गलं
तिका। उपानद्व्यजनं छत्रं सूक्ष्मवासांसि चंदनं। जलपात्राणि देयानि तथा पुष्पगृहाणि च। यानकानि च चित्रा एमः
णि द्राक्षारंभाफलान्यपि। पितृप्रीतये। दद्यात्तियो हि मेधावी सतूनं बुधवारान्वितान्। पितृन्नुद्दिश्य विप्रेभ्यः सर्वपापैः
प्रमुच्यते। तथा। वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने। ददाति सुरराजेंद्र स याति परमां गतिं। एवं संदर्शनस्ना

नाशक्तो त्र्यहं वा स्नायात्। तदुक्तं तत्रैव पाद्मे। त्रयोदश्यां चतुर्दश्यां वैशाख्यां च दिनत्रयं। अपि सम्यग्विधानेन नारी वा पुरुषोऽपि
वा। प्रातःस्नातः सनियमः सर्वपापैः प्रमुच्यते इति। यदा वैशाखे मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वयं स्ना
नं तन्नियमाश्च कर्त्तव्याः। मासोपवासचांद्रायणादि तु मलमास एव समापयेत्। तदुक्तं दीपिकायां। नियतत्रिंशद्दिनत्वाच्छुभे
मास्यारभ्य समापयेत मलिने मासोपवासव्रतमिति। अत्र दानविशेष उक्तः पराके वामनपुराणे। गंधाश्च माल्यानि तथा वैशा
खे सुरभीणि च। देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये। एवं स्नाने कृते तस्योद्यापनं कार्य्यं। तदुक्तं तत्रैव। मासमेवं बहिः स्ना
त्वा नद्यादौ विमले जले। एकादश्यां च द्वादश्यां पौर्णमास्यामथापि वा। उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः। मंडपं कारयेदा
दौ कलशं तत्र विन्यसेत्। निष्केण वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः। शक्त्या वा कारयेद्देवं सौवर्णं लक्षणान्वितं। लक्ष्मीयुतं जगन्नाथं
पूजयेदाहने बुधः। भूषणैश्चंदनैः पुष्पैर्धूपैर्दीपैर्नैवेद्यसंचयैः। एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत्। प्रभातेऽमले भूते कृतनैत्योऽथ
ग्रहवेद्यां ग्रहान्यजेत्। होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः। तिलाज्येन यवैर्वापि सर्वैर्वापि स्वशक्तितः। अष्टोत्तरसह
स्रं वा शतमष्टोत्तरं तु वा। व्रताद्विष्णुरनेनैव इदं विष्णुरनेन वा। व्रतसंपूर्त्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीं। पादुकोपानहौ छत्रं
गुरवे व्यजनं तथा। शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा। ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्यो दद्याच्च दक्षिणां। कलशान्न जल

संपूर्णान्ते तस्मै दद्याद्द्विजाय वासांसि तथा। एवं कृते माधवस्य उद्यापनविधौ शुभे। फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात्। एतावत्यशक्तौ त
त्रैवोक्तं। वैशाख्यां विधिना स्नात्वा भोजयेद्ब्राह्मणान्दश। कृसरं सर्वपापेभ्यो मुच्यते नात्र संशय इति। वैशाखस्य शुक्लतृतीया अक्षय
तृतीयोच्यते सा पूर्वाह्णव्यापिनी ग्राह्या। दि नवम्ये पितृघ्नो तो परैव। तदुक्तं निर्णयामृते नारदीये। वैशाखे शुक्लपक्षे तु तृतीया
रोहिणीयुता। दुर्लभा बुधवारेण सोमेनापि युता तथा। रोहिणीबुधयुक्तापि पूर्वविद्धा विवर्जिता। मत्स्या कृतापि मांधातः पुण्यं हात
पुरा कृतं। गौरीविनायकोपेता रोहिणीबुधसंयुता। विनापि रोहिणीयोगात् पुण्यकोटिप्रदा सदेति। इयं युगादिरपि। सा चोक्ता रत्नमा
लायां। माघे पंचदशी कृष्णा नभस्ये च त्रयोदशी। तृतीया माधवे शुक्ला नवम्यूर्जे युगादय इति। यत्तु गौडाः माघस्य पौर्णिमायां तु घोरं क
लियुगं स्मृतमिति ब्राह्मोक्तेः। वैशाखमासस्य च या तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे। नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पंचद
शी च माघे इति विष्णुपुराणे। चकारेण तमिस्रपक्षानुषंगेपि पूर्वानुरोधात् पूर्णिमास्येव ज्ञेया। ब्रह्मोक्ते इत्यादिकं तन्निर्मूलमित्या
हुः। तन्न। दर्शे न माघमासस्य प्रवृत्ते द्वापरं युगमिति भविष्यविरोधात्। एतेन ब्राह्मानुसारात् पूर्णिमायामेव युगादित्वं वद^
न्शूलपाणिः परास्तः। तेन कल्पभेदात् व्यवस्थेति तत्त्वं। एतेन कार्त्तिके नवमी शुक्ला माघमासे च पूर्णिमेति नारदीयं व्याख्या रामः
तं। निर्मूलोक्तिर्नारदीयाज्ञानकृता। अत्र श्राद्धमुक्तं मात्स्ये। कृतश्राद्धविधानेन मन्वादिषु युगादिषु। हायनानि द्विसाहस्रं

पितॄणां तृप्तिदं भवेदिति। भारतेपि। या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः। स्नात्वा हुत्वा च दत्त्वा वा जप्त्वानंतफलं लभे-
दिति। श्राद्धे पिइ(?)र्वाह्णव्यापिनी ग्राह्या। पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः। दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिके
इति पाद्मोक्तेः। दैवं शुक्ले दैवतया कृष्णे युगादीकं वयोविदुः। शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इति पाद्मोक्तेः। दैवं शुक्ले
~~दैवतया कृष्णे युगादीकं वयोविदुः~~ हेमाद्रौ नारदीयवचनाच्च। दीपिकापि। अथ मन्वादियुगादिके मतिथयः पूर्वाह्णिकाः शुक्लाः सि-
ते विज्ञेया अपराह्णिकाश्च बहुले इति। स्मृत्यर्थसारेपि। युगादिमन्वादिश्राद्धे शुक्लपक्षे तूदयव्यापिनी तिथिर्ग्राह्या। कृ-
ष्णपक्षे पराह्णव्यापिनीति दिवोदासीये गोभिलः। वैशाखस्य तृतीयायाः पूर्वविद्धां करोति वै। हव्यं देवा न गृह्णन्ति कव्यं च पित-
रस्तथेति। तेनेयं पूर्वाह्णव्यापिनी। दिनद्वये तत्त्वे परैवेति। धर्मतत्त्वविदो हेमाद्र्यादयः। अनंतमहृत्तसवैधृतिव्यतीपातो यु-
गमन्वादयस्तथा। सन्मुखा उपवासेषु हीनादावंतिमाः स्मृता इत्याह। दानादाविति श्राद्धसंग्रहः। उपवासस्त्वग्रे वक्ष्यते। य-
त्तु मार्कंडेयः। शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः। कृष्णपक्षापराह्णे हि रौहिणं तु न लंघयेत्। रौहिणो नवमो मुहूर्त्तः।
अत्र शुक्लपक्षे युगादिश्राद्धं पूर्वाह्णे कार्यमिति शूलपाणिः। निर्णयामृतादयस्तु कालादर्शेऽमाश्राद्धमापराह्णिकमुक्त्वा
एषु मन्वन्तरादीनां युगादीनां विनिर्णयः इत्युक्त्वा दैवं शुक्ले इत्यादिवचनं विष्णुपूजनादिविषयं। श्राद्धं त्वापराह्णिकमेवेति

व्यवस्थां जगदुः। सेयं सर्वो स्मार्तानेकवचोविरोधात् सर्वाङ्गोदेविकं कुर्यादित्यादिवचनादेवस्थितेर्वचनवैयर्थ्याच्च स्नानस्यैव वि
लसितमात्रमित्युपेक्षणीया। किं चाकालादर्शे क्लिन्न्यायमूलावचोमूलावा। नाद्यः। युगादिश्राद्धस्यामाश्राद्धविकृतिकेन
॥ न्यायतोपराह्णव्यापित्वावपि वचनेन तस्य बाधात्। नान्त्यः। अतिदेशापराह्णप्राप्तेर्वचनवैयर्थ्यात्। अश्रान्तेषु स्मृतिमध्ये वदि
तिन्यायात्। तेन यदि कालादर्शोक्तेः कथंचिद्व्यवस्था जाड्येन समाधित्सा तर्हि न्यायप्राप्तकृत्स्नप्रत्युगादिविषयत्वेन
सा व्यवस्थापनीयेति दिक्। अत्र विशेषो हेमाद्रौ भविष्ये। वैशाखस्य शुक्लपक्षे तु तृतीयायां तथैव च। गंगातोये नरः स्ना
त्वा मुच्यते सर्वकिल्बिषैः। तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत्। यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवान्।
इति। अत्र दानविशेषस्तत्रैव भविष्ये। इमां प्रक्रम्य। उदकुम्भान्सकनकान्सान्नान्सर्वरसैः सह। यवगोधूमचणकान्सक्तुद
ध्योदनं तथा। ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यत इति। देवीपुराणेपि। तृतीयायां तु वैशाखे रोहिण्यर्क्षे प्रयुज्य तु। उद
कुंभप्रदानेन शिवलोके महीयते। ब्रह्मपुराणे। एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य प्रदानात्तृप्यन्तु पितरोपि पि रामः
तामहाः। गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितम्। पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु। अत्र चापिंडरहितं श्राद्धं कु
र्यात्। अयनद्वितये श्राद्धं विषुवद्वितये तथा। युगादिषु च सर्वासु पिंडनिर्वपणादृते। इति हेमाद्रौ पुलस्त्यवचनात्। अत्र

रात्रिभोजनेप्यापस्तम्बविधाने। रात्रौ भुंक्ते वत्सरे तु मन्वादिषु युगादिषु। अभिस्वद्दृष्टिं मंत्रं च जपेद्दशशतं प्रात
केइति। अपरार्के यमः। कृतोपवासाः सलिलं ये युगादिदिनेषु च। दास्यंत्यन्नादिसहितं ते यांति लोकान्महोदया
इति। वैशाखे मलमासे सति तत्रैव युगादिः कार्या। तथा च हेमाद्रौ ऋष्यशृंगः। दशहरसुनोल्कषंश्चतुर्ष्वेपि यु
गादिषु। उपाकर्मणि चोत्सर्गे ह्येतद्दिष्टं वृत्तादितइति। एतद्दशहरादिकं वृषादिसंक्रमेइष्टं। कन्याचंद्रे वृषेर
वाविस्त्रादिनासौ रमासौ केऽरिस्पर्धः। कालादर्शेपि। अष्टोदकुंभमन्वादिमहालययुगादिषु इति मलमास
कर्तव्येषु परिगणनाच्च। महालयशब्देन मघात्रयोदश्युच्यते इति माधवः। स्मृतिचंद्रिकायां मासद्वये क
र्तव्यमित्युक्तं। यौगादिकं मासिकं च श्राद्धं चापरपक्षिकं। मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेपि चेति। अ
परपक्षः कृष्णपक्षः न तु महालयः। तस्य तत्र निषेधात्। मदनरत्ने मरीचिः। प्रतिमासं मृताहे च श्राद्धं यत्
प्रतिवत्सरं। मन्वादौ च युगादौ च तन्मासोरुभयोरपीति। प्रतिवत्सरे क्रियमाणं कल्पादिश्राद्धमिति।
एवं व्याचख्यौ। अत्र श्राद्धाकरणे प्रायश्चित्तम् विधाने। नयस्यद्घां मंत्रं च शतवारं ततो जपेत्। युगाद
यो यत्र न्यूनाः कुर्वते नैव चाप्रियइति। अत्र समुद्रे स्नानं प्रशस्तं। तदुक्तं पृथ्वीचंद्रोदये सौरपुराणे। युगादौ तु

नरः स्नात्वा विधिवल्लवणोदधौ गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत् । तत्फलं लभते मर्त्यो भूमिदानस्य चाक्षयमिति । अयं नि-
12 र्णयः सर्वयुगादिषु बोद्धव्यः । इति युगादिनिर्णयः । इयमेव तृतीया परशुरामजयंती । सा प्रदोषव्यापिनी ग्राह्या । तदुक्तं भार्गवार्च-
नदीपिकायां स्कांदभविष्ययोः । वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ । निशायाः प्रथमे यामे रामाख्यः समये हरिः । स्वो-
च्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंयुते । रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयमिति । दिनद्वये तद्व्याप्तावेकदेशतः समव्या-
प्तौ च परा । अन्यथा पूर्वैव तदुक्तं तत्रैव भविष्ये । शुक्लातृतीया वैशाखे शुद्धा प्रोक्ता व्याप्ता दिनद्वये । निशायां पूर्वयामे चेदुत्तरा-
न्यत्र पूर्विकेति । वैशाखशुक्लसप्तम्यां गंगोत्पत्तिः । तदुक्तं पृथ्वीचंद्रोदये ब्राह्मे । वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी
पुरा । क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् । तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति । अत्र शिष्टाचारान्मध्या-
ह्नव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावेकदेशव्याप्तौ वा पूर्वा । युग्मवाक्यात् । वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ
। ज्योतिःशास्त्रे । पंचाननस्थो गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षे । मासाभिधाना करभेण युक्ता तिथिर्व्यती एम:
पात इतीह योगः । अस्मिंस्तु गोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापं । सुरत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभ-
ते मनुष्य इति । पंचाननः सिंहः । मासाभिधाना तिथिर्द्वादशी । करभो हस्तः । वैशाखशुक्लचतुर्दश्यां नृसिंहजयंती ।

सा प्रदोषव्यापिनी ग्राह्या। तदुक्तं हेमाद्रौ नृसिंहपुराणे। वैशाखस्य शुक्लपक्षे तु चतुर्दश्यां तिथौ शुभे। मज्जन्मसंभवं
पुण्यं व्रतं पापप्रणाशनं। वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारणमिति। दिनद्वये पि तद्व्याप्तौ वा शतः समव्याप्तौ च परा। वि
षमव्याप्तौ त्वधिकव्याप्तिमती। दिनद्वये प्यव्याप्तौ परा। परदिने गौणकालः व्याप्तेः सत्वात्। पूर्वदिने च तदभावात्।
यत्तु। ततो मध्याह्नवेलायां नद्यादौ विमले जले इति उपक्रम्य परिधाय ततो वासो व्रतकर्म समारभेदिति। तत्रैवो
क्तं। तत्संकल्परूपव्रतोपक्रमविषयं। न त्वेतावता मध्याह्नव्यापिनी ग्राह्येति भ्रमितव्यं पूर्वोक्तवचनविरोधात्।
वैशाखस्य चतुर्दश्यां सोमवारे ऽनिलर्क्षके। अवतारो नृसिंहस्य प्रदोषसमये द्विजा इति दोडरानंदे स्कांदात्। कू
र्मः सिंहो वो घकल्की वसायमिति पूर्वोक्तपुराणसमुच्चयाच्चेति केचित्। तत्वं तु पूर्ववचसां सामान्याकारत्वेन नि
र्मूलत्वात्। हेमाद्रौ नृसिंहपुराणे। मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनमित्युपक्रम्य स्वातीनक्षत्रयोगे च शनि
वारे तु मद्व्रतं। सिद्धियोगस्य संयोगे वणिजे करणे तथा। पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः। सर्वैरेतैस्तु
संयुक्तं हत्याकोटिविनाशनं। एतदन्यतरे योगे मद्दिने पापनाशनं। केवलेपि च कर्तव्यं मद्दिने व्रतमुत्तमं। अन्य
था नरकं याति यावच्चंद्रदिवाकरावित्युक्तौ। ततो मध्याह्नवेलायां नद्यादौ विमले जले इत्यादिना मध्याह्ने एव।

उपवासं करिष्यामि सर्वभोगविवर्जित इति मंत्रेण संकल्पं कृत्वा चार्घं कृत्वा सायंकाले॥ ९७

व्रतविधानात् चतुर्दश्युत्तरार्द्धे वणिजे करणे च मध्याह्ने च स्पष्टं जन्म प्रतीयते। संध्यायां जन्म तु बोध्यं तु केचित् खिन
13 कृतं तद् दशान्निर्णयश्च हेयं एवेति। इयमेव योगविशेषेणातिप्रशस्ता। तदुक्तं तत्रैव। स्वातीनक्षत्रयोगे च शनिवा
रे तु मद्व्रतं। सिद्धियोगस्य संयोगे वणिजे करणे तथा। पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः। तथा। एभिर्योगैर्वि
नापि स्यान्मद्दिनं पापनाशनं। तथा। सर्वेषामेव वर्णानामधिकारोस्ति मद्व्रते। मद्भक्तैस्तु विशेषेण कर्तव्यं मत्प
रायणैः। तथा। सिंहः स्वर्णमयो देयो मम संतोषकारकः। तथा। विज्ञाय मद्दिनं यस्तु लंघयेत् स पापकृन्नरः। स याति
नरकं घोरं यावच्चंद्रदिवाकरौ। इदं च संयोगपृथक्त्वन्यायेन नित्यं काम्यं च। अथात्र विशेषः। मध्याह्ने स्नानम
यतिलामलककल्केन कृत्वा। नृसिंह देवदेवेश तव जन्मदिने शुभे। हैमी तु तत्र मन्मूर्तिः स्थाप्या तस्यास्तथैवं
चा। पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः। यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जितः इत्युक्तं। नृसिंहमूर्त्तिं शक्त्या
लंकृत्य सुवर्णसिंहं च कलशोपरि संस्थाप्य रात्रौ जागरणं कृत्वा प्रातः पुनः संपूज्य। नृसिंहाच्युत देवेश लक्ष्मीकांत राम:
जगत्पते। अनेनार्चाप्रदानेन सफलाः स्युर्मनोरथाः। इत्याचार्याय दत्वा। मद्वंशे ये नरा जाता ये जनिष्यंति चा
परे। तांस्त्वमुद्धर देवेश दुःसहाद्भवसागरात्। पातकार्णवमग्नस्य व्याधिदुःखांबुवारिभिः। तीव्रैश्च परिभूत

विद्वल्लोकान्तिकं मन्ये स्वमहादुःखगतस्य मे। करावलंबनं देहि शेषशायिन् जगत्पते। श्रीनृसिंह रमाकांत भक्तानां भय
नाशन। क्षीरांबुधिनिवासिंस्त्वं चक्रपाणे जनार्दन। व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव। इति प्रार्थयेदिति संक्षेपः।
वैशाखपौर्णमास्यां विशेषः। अपरार्के जाबालिः। अतान्नमुदकुंभं च वैशाख्यां च विशेषतः। निर्दिश्य धर्मराजाय गो
दानफलमाप्नुयात्। सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पंच वा। तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्यपोहति इति। कुंभदान
मंत्रस्तु देयपदार्थे तृतीयप्रकरणे उक्तः। भविष्ये। वैशाखी कार्त्तिकी माघी तिथयोऽतीव पूजिताः। स्नानदानविहीनास्ता
न नेयाः पांडुनंदन। अत्र कृष्णाजिनदानं कार्यं। तथा च विष्णुः। कृष्णाजिने तिलान्कृत्वा हिरण्यं मधुसर्पिषी। ददाति यस्तु
विप्राय सर्वं तरति दुष्कृतमिति। इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ वैशाखमासः॥ ॥वृषसंक्रांतौ रवेः षोडश घटि
काः पुण्यकालः। रात्रौ संक्रमे सति प्रागेवोक्तं। ज्येष्ठशुक्लतृतीयायां रंभाव्रतमुक्तं माधवीये भविष्ये। भद्रे कुरुष्व यत्नेन रंभा
ख्यं व्रतमुत्तमं। ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परेति। सा पूर्वविद्धा ग्राह्या। बृहत्तपा तथा रंभा सावित्री व्रतपैतृ
की। कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिरिति स्कांदे उक्तेः। ज्येष्ठशुक्लदशमी दशहरा। तदुक्तं हेमाद्रौ ब्राह्मे। ज्ये
ष्ठमासि सिते पक्षे दशमी हस्तसंयुता। हरते दश पापानि तस्माद्दशहरा स्मृतेति। वाराहेपि। दशमी शुक्लपक्षे तु ज्येष्ठे

मासि कुजे हरति । अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा । हरते दश पापानि तस्माद्दशहरा स्मृतेति । स्कांदे तु दशयोगा उक्ताः । त
था । ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । व्यतीपाते गरानंदे कन्याचंद्रे वृषे रवौ । दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्य
ते इति । अत्र बुधभौमयोः कल्पभेदेन व्यवस्था । इयं च यत्रैव योगबाहुल्यं सैव ग्राह्या । योगाधिक्ये फलाधिक्यात् । ज्ये
ष्ठमलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे । दशहरासु नोत्कर्षश्चतुर्थ्यादियुगादिषु इति हेमाद्रौ ऋष्यशृंगोक्तेः । तथा
स्कांदे । यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं । मुच्यते दशभिः पापैः स महापातकोपमैः । अत्र विशेषः । काशीखंडे ज्ये
ष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिं । दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः । एवं सर्वासु तिथिषु क्रमस्नायी नरोत्त
मः । आशुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् । तथा । लिंगे दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ । दशजन्मार्जितैः पापैः
त्यज्यते नात्र संशयः । तथा भविष्योत्तरकाशीखंडयोः । निशायां जागरं कृत्वा समुपोष्य च भक्तितः । पुष्पैर्गंधैश्च नैवेद्यैः
फलैश्च दशसंख्यया । तथा दीपैश्च तांबूलैः पूजयेच्छ्रद्धयान्वितः । स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः । दश राम:
प्रसृतिकृष्णांश्च तिलान्सर्पिषा च वै जले । सक्तुपिंडान्गुडपिंडान्दद्याच्च दशसंख्यया । ततो गंगातटे रम्ये हेम्ना रूप्येण
वा तथा । गंगायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीं । संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि वा । अथ तत्राप्यशक्तश्च

दिने खेऽलिखितेन वै मुदे। वक्ष्यमाणेन मंत्रेण कुर्यात्पूजां विशेषतः। नारायणं महेशं च ब्रह्माणं भास्करं तथा। भगीरथं च नृपतिं
हिमवंतं नगेश्वरं। गंधपुष्पादिभिः सम्यग्यथाशक्ति प्रपूजयेत्। दशप्रस्थांस्तिलान्दद्याद्दशविप्रेभ्य एव च। दशप्रस्थान्यवान्
दद्याद्दशसंख्या गवीस्तथा। मत्स्याः षोडशपलानि। पलं तु। मुष्टिमात्रं पलं स्मृतमिति महार्णवे उक्तं। मत्स्यकच्छपमंडूकमक-
रादिजलेचरान्। कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा। तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः। गंगायां प्रक्षिपेद्राजन्
दीपांश्चैव प्रवाहयेत्। पुष्पाद्यैः पूजयेद्गंगां मंत्रेणानेन भक्तितः। ॐ नमः शिवायै नारायण्यै दशहरायै गंगायै नमो नमः। इति
मंत्रं तु यो मर्त्यो दिने तस्मिन्दिवानिशं। जपेत्लक्षं च सहस्राणि दश धर्मफलं लभेत्। काशीखंडे त्वन्यो मंत्र उक्तः। नमः शिवायै प्र-
थमं नारायण्यै पदं ततः। दशहरायै पदमिति गंगायै मंत्र एष वै। स्वाहांतः प्रणवादिश्च भवेद्विंशत्यक्षरो मनुः। पूजा दानं जपो हो-
मस्तेनैव मनुना स्मृत इति। अत्र गंगास्तोत्रपाठमपि दशवारं कुर्यात्। तदुक्तं भविष्ये। तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः
यः पठेद्दशकृत्वस्तु दरिद्रो वापि वाक्षमः। सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नत इति। स्तोत्रं च प्रतिपदादिदशमीपर्यंतं दि-
नवृद्धिसंख्यया पठनीयमिति शिष्टाः। अत्र सर्वोपि विस्तरः स्तोत्रादि च भट्टकृतत्रिस्थलीसेतौ ऽवधेयः। विस्तरभीतेस्तु न लि-
ख्यते। एवं कुर्वतः फलमुक्तं काशीखंडे। एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः। उपवासी वक्ष्यमाणैर्दशपापैः प्रमुच्यते। स

र्वान्कामानवाप्नोति प्रत्यग्रस्मृतिः । लीयतन इति । अस्याः सेतुबंधरामेश्वरस्य प्रतिष्ठादिनत्वात् द्विजेवेणएजाकायात् । तदुक्तं स्कांदे से
15 तुमाहात्म्ये । ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ । दशयोगे सेतुमध्ये लिंगरूपध
रं हरं । रामो वै स्थापयामास शिवलिंगमनुत्तमम् इति । इति दशहरा । ज्येष्ठशुक्लैकादशी निर्जला । तत्र निर्जलमुपो
ष्य विधेयो जलकुंभान्नदद्यादिति निर्णयामृते उक्तं मदनरत्ने स्कांदे पि । ज्येष्ठमासि नृपश्रेष्ठ या शुक्लैकादशी शुभा । नि
र्जलं समुपोष्यात्र जलकुंभान्सशर्करान् । प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ । ज्येष्ठपौर्णमास्यां सावित्रीव्रतम् ।
तदुक्तं स्कांदे भविष्ययोः । ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे । इत्युपक्रम्य । व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिं स्थिरा भवे
दिति । अंते तु पक्षांतरं । ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतम् । चीर्णं पुरा महाभक्त्या कथितं ते मया नृपेति । दाक्षि
णात्याश्चैतदेवाद्रियंते । एतच्चामावास्यायामप्युक्तं निर्णयामृते भविष्ये । अमायां च तथा ज्येष्ठे वटमूले महासती । त्रि
रात्रोपोषिता नारी विधिनानेन पूजयेत् । मदनरत्ने त्विदं वाक्यं पंचदश्यां तथा ज्येष्ठे इति पठित्वा ज्येष्ठपौर्णमास्यामप्यु रामः
क्तं । तथा अशक्तौ त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियः । अयाचितं चतुर्दश्याममायां समुपोषणमिति । तत्तु पौर्णमास्यामा
द्रियंते । हेमाद्रिसमयोद्योतादिषु तु अमायामप्युक्तम् । तत्तु नेदानीं प्रचरति । गोडास्तु मेषे वा वृषभे वापि सावि

त्री तां विनिर्दिशेत् । ज्येष्ठस्य कृष्णचतुर्दश्यां सावित्रीमर्चयंति याः । वटमूले सोपवासा न ता वैधव्यमाप्नुयुरिति पराशरोक्ते
श्चतुर्दश्यां प्रदोषे व्रतमादिनद्वये तद्व्याप्तौ परे वेत्याहुः । तन्निर्मूलं । अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये । भूतविद्धा न कर्त्त
व्या अमावस्या च पूर्णिमा । वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्त्तात् । भूतविद्धा सिनीवाली न तु तत्र व्रतं च
रेत् । वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहनेति मदनरत्ने ब्रह्मवैवर्त्ते । प्रतिपत्सं च सा भूतसावित्री वटपूर्णिमा । नवमी द
शमी चैव नोपोष्याः परसंयुता इति । यदा त्वष्टादशघटिका चतुर्दशी तदा परा ग्राह्या । पूर्वविद्धैव सावित्रीव्रते पंचदशी ति
(थिः) नाड्योऽष्टादश भूतस्य स्युश्चेत्तत्त्वपरेहनीति माधवः । वस्तुतस्तु । भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमित्यस्य व्र
तांतरे सावकाशत्वाद्विशेषतः प्रवृत्तपूर्वविद्धाविधायकवचनेन तस्य बाधादष्टादशनाडीवेधेपि पूर्वैवेत्ययं पंथाः साधुः ।
अत्र पूर्णिमानुरोधेनैव यथा त्रि+रात्रसंपत्तिर्भवति तथा त्रयोदश्यां ग्राह्या तस्याः प्रधानत्वात् । अयं निर्णयोऽमायामपि
ज्ञेयः । पारणं तु पौर्णिमाते कार्यं । अत्र स्त्रीव्रतेषु विशेषः । परिभाषायामुक्तः । अत्र विशेषो भविष्ये । गृहीत्वा वालुकां पात्रे
प्रस्थमात्रे युधिष्ठिर । ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते । सावित्रीप्रतिमां कुर्यात्सौवर्णीं चाथ मृन्मयीं । सार्द्धसत्यव
तीं साध्वीं फलनैवेद्यदीपकैः । रजन्या कंठसूत्रैश्च पुष्पैः कुंकुमकेसरैः । पूजयेदिति शेषः । रजनी हरिद्रा । कंठसूत्रं सौभाग्यत

तुः सावित्र्याख्यानकं चापि वाचयीत द्विजोत्तमैः। रात्रौ जागरणं कृत्वा प्रभाते विमले ततः। तामपि ब्राह्मणे दत्वा प्रणिपत्य क्षमा
16 पयेत्। मंत्रस्तु। सावित्रीयं मया दत्ता सहिरण्या महासती। ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यतां। अनेनानेन राजेंद्र वैधव्यं
नानुयात्क्वचिदिति। ज्येष्ठपौर्णमास्यां विशेषश्चादित्यपुराणे। ज्येष्ठामासि तिलान्दद्यात्पौर्णमास्यां विशेषतः। अश्वमेधस्य य
त्फलं तत्प्राप्नोति न संशयः। विष्णुरपि। ज्येष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नराधिपत्यमाप्नोतीति। हे
माद्रौ ज्योतिषे। ऐंद्र्यां गुरुः शशी चैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता। इयं मन्वादिरपि। सा
पौर्वाह्णिकी ग्राह्या। विशेषस्तु चैत्रे उक्तः। तथापरार्के वामनपुराणे। उदकुंभाम्बुदानं च तालवृंतं च चंदनं। त्रिविक्रमस्य प्री
कमलाकरभट्ट कृते १ त्यर्थं दातव्यं ज्येष्ठमासि तु इति॥ ॥इति निर्णयसिंधौ ज्येष्ठमासः॥ ॥मिथुनसंक्रांतौ परः षोडश घटिकाः पु
ण्याः। रात्रौ तु प्रागेवोक्तं। आषाढशुक्लद्वितीयायां रथोत्सवः। तदुक्तं तिथितत्वे स्कांदे। आषाढस्य सिते पक्षे द्वितीया पुष्य
संयुता। तस्यां रथे समारोप्य रामं मां भद्रया सह। यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान्बहून्। तथा। ऋक्षाभावे तिथौ का रामः
र्या यात्रा सा प्रीतये मम। आषाढशुक्लदशमी पौर्णमासी च मन्वादिः। सा च पूर्वाह्णव्यापिनी तिथिः प्रागुक्ता। आषाढशुक्ले
द्वादश्यामनुराधायोगरहितायां पारणं कुर्यात्। तदुक्तं भविष्ये। आभाकासितपक्षेषु मैत्रश्रवणरेवती। संगमे न हि भो

कर्तव्यं द्वादश्यां द्वादशी हरेस्तत्। अस्यार्थः। आषाढभाद्रपदकार्तिकशुक्लद्वादशीषु अनुराधाश्रवणरेवतीयोगे पारणं न कु
र्यादिति। अत्रायं यथैवेतावदेवोक्तं। तथा अनुराधाप्रथमपादं वर्ज्यः। तदुक्तं विष्णुधर्मे। मैत्राद्यपादे स्वपितीह विष्णुः पौष्णांत्य
पादे प्रतिबोधमेति। श्रुते श्रवणमध्ये परिवर्तमेति। सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यमिति। वस्तुतस्तु सर्ववचनमिदं च निर्मूलमेव। अ
त्रैव विष्णुशयनोत्सव उक्तो हेमाद्रौ ब्राह्मे। एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः। भुजंगशयने शेते क्षीरार्णवजले सदे
ति। कल्पतरौ यमः। क्षीराब्धौ शेषपर्यंके आषाढ्यां संविशेद्धरिः। निद्रां त्यजति कार्तिक्यां तयोस्तं पूजयेत्सदा। ब्रह्महत्यादि
कं पापं क्षिप्रमेव व्यपोहति। हिंसात्मकैस्तु किं तस्य यज्ञैः कार्यं महात्मनः। प्रस्वापे च प्रबोधे च पूजितो येन केशवः। दोउराने दे
पि स्कांदे। आषाढशुक्लैकादश्यां कुर्यात्स्वप्नमहोत्सवं। अयं द्वादश्यामप्युक्तः। आभाकासितपक्षे शुभे मैत्रश्रवणरेवती॥
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवः। निद्राः स्वापादिवोत्थानं संध्यायां परिवर्तनं। अन्यत्र पादयोगे पि द्वादश्यामेव का
रयेदिति। आभाकाद्येषु मासेषु मिथुने माधवस्य च। द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवं हरति भविष्योक्तेः। द्वाद
श्यां संधिसमये नक्षत्राणामसंभवे। आभाकासितपक्षेषु शयनावर्तनादिकमिति वाराहोक्तेश्च। द्वादश्यामित्यत्रापि पा
रणाहो मात्रं विवक्षितं। पारणाहे सर्वरात्रे घंटादीन्वादयन्नुज्झरिति रमार्चनं च द्विकोक्तेः। अत्रैकादशी द्वादश्यो देशभेदेन

व्यवस्था। इदं च मलमासे न कार्यं। ईशानस्य बलिर्विष्णोः शयनं परिवर्त्तनमिति कालादर्शे निषेधात्। यदपि। एकादश्यां तु ग्र क्रीयात्सं
17 क्रान्तौ कर्कटस्य वा। आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतं क्रियामिति हेमाद्रौ ब्रह्मवैवर्त्ते। तदपि मलमासे सति द्रष्टव्यं। मिथुन
स्थो यदा भानुरमावास्याद्वयं स्पृशेत्। द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे। इति तत्रैव मोहचूडोत्तरोक्तेः। अत्रैव चातुर्मास्य
व्रतारंभ उक्तो भारते। आषाढे तु सिते पक्षे एकादश्यामुपोषितः। चातुर्मास्यव्रतं कुर्यात् यत्किंचिन्नियतो नर इति। अस्य नित्यत्व
तत्रैवोक्तं। वार्षिकांश्चतुरो मासान् येन केन चिन्नरः। व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोत्सवं। असंभवे तुलार्केऽपि कर्त्तव्यं। तत्र
यत्नत इति। तेन आषाढशुक्लैकादश्यां पौर्णमास्यां वारंभः। समाप्तिस्तु कार्त्तिकशुक्लद्वादश्यामेव तदुक्तं हेमाद्रौ भारते। चतु
त र्थोग्र ह्य वै चीर्णे चातुर्मास्यव्रते नरः। कार्त्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत्। अस्यारंभः शुक्रास्तादावपि कार्यः। न
शैशवं न मौढ्यं च शुक्रगुर्वोर्न बालतिथ्यः। खंडत्वे चिंतयेच्चादौ चातुर्मास्यविधौ नर इति हेमाद्रौ गार्ग्योक्तेः। इदं च द्वितीयारंभविष
यं प्रथमारंभस्तु न भवत्येव। आशौचमध्येऽपि द्वितीयारंभो भवति। अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्। व्रतमेतन्नरः कृ एम:
त्वा मुच्यते सर्वपातकैरिति भार्गवार्चनदीपिकायां स्कांदोक्तेः। आरब्धे सूतकं न स्यादनारब्धे च सूतकमिति वचनाच्च। यत्तु अत्र
संक्रान्तेन तथा मासं देवे पित्र्ये च कर्मणि। मलमासं मध्यगं चैव वर्जयेन्मतिमान्नर इति हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्य

वचनमूातल्लक्षणानुमंत्रणं मंत्रवदसंवद्धं मध्ये पठितमिति ज्ञेयम्। अन्यथापि ज्ञस्य पूर्वोक्तस्य विवाहादेश्च चातुर्मास्यव्र
तेकः प्रसंगः प्रकरणनिवेशो विना प्रथमारंभविषयं ज्ञेयम्। केचित्तु प्रतिवर्षं च चातुर्मास्यव्रतप्रयोगाणां भिन्नत्वादा
शौचादिपाते द्वितीयादिप्रयोगो न भवत्येवेत्याहुः। तन्न। प्रतिवर्षं च यः कुर्याद्देवं वै संस्मरन् हरिं। देहांतेपि प्रदीप्तेन वि
मानेनार्कवर्चसा। मोदते विष्णुलोके सौ यावदाहूतसंप्लवमिति हेमाद्रौ भविष्यवचनादित्यास्तां विस्तरः। इदं च शिव
भक्तादिभिरपि कार्यम्। शिवे वामे कृतिसंयुक्तो भानौ वा गणनायके। कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेदिति
ब्रह्मवैवर्त्तात्। व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये। महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः। जातीकुसुममालाभिः
मंत्रेणानेन प्रार्थयेत्। सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं। विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत। एवं तां प्रति
मां विष्णोः पूजयित्वा स्वयं नरः। प्रभाषेच्चाग्रतो विष्णोः कृतांजलिपुटस्तथा। चतुरो वार्षिकान्मासान् देवस्योत्थापना
वधि। इमं करिष्ये नियमं निर्विघ्नं कुरु मेच्युत। इदं व्रतं मया देव गृहीतं पुरतस्तव। निर्विघ्नं सिद्धिमायातु प्रसादात्त
व केशव। गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत्। तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन। गृहीतेस्मिन्व्रते देव यद्य
पूर्णे म्रिये ह्यहं। तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दनेति। तत्र मार्गवाचन दीपिकायां नृसिंहपरिचर्यायां च भवि

ष्यो। श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा। दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेत्। इति स्मृतेः। स्कान्देऽपि चातुर्मास्यके त्या। व
त्वार्य्येतानि निःसृत्यानि चतुराश्रमवासिना। प्रथमे मासि कर्त्तव्यं नित्यं शाकव्रतं नरैः। द्वितीये मासि कर्त्तव्यं दधिव्रतमनुत्तमं॥
18 पयोव्रतं तृतीये तु चतुर्थे द्विमनिष्पामय। द्विदलं चैव बीजं च ह्रतकं च विवर्जयेत्। निष्पान्न्येतानि विधेयव्रतान्याज्ञमनीषिणः॥
जं वीरं राजमाषांश्च मूलकं रक्तमूलकं। कूष्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद्बुधः। अत्र मूलं चिन्त्यं। तथा। विशेषाद्बदरीधात्रीकू-
ष्माण्डं तिंतिणीं त्यजेत्। जीर्णधात्रीफलं ग्राह्यं कथंचित्कापथ्याधनमिति। तीर्थसौख्ये स्कान्दे। वार्षिकांश्चतुरो मासान् प्रसु-
प्ते च जनार्दने। मंचं षट्ठादि शयनं वर्जयेद्भक्तिमान्नरः। अनृतौ वर्जयेज्जायां मांसं मधु परौदनं। पटोलं मूलकं चैव वृन्ताकं च
न भक्षयेत्। अमस्यं वर्जयेद्दूरान्मसूरं सितसर्षपं। राजमाषान्कुलत्थांश्च आमधान्यं च संत्यजेत्। शाके दधि पयो माषा-
न्मसूरादिषु वर्जयेत्। अत्र त्यजेदिति वर्जनं संकल्परूपः पर्युदासो ज्ञेयः। अतो पक्वमात्। अत्र केचिच्छाकाख्यं पत्रपु-
ष्पादीत्यमरकोशस्य शाकाते ऽपि तु मनेनेति शाक इति क्षीरस्वामिना व्याख्यानात्। व्यंजनमात्रस्य निषेधमाचक्षते। राम:
अन्ये तु शाकशब्दस्य पत्रादिदशविधशाके योगरूढित्वात्। योगाच्च रूढेर्बलीयस्त्वात्। सूपादीनामपि त्यागापत्ते-
श्च तत्परत्वमाचक्षते। तेन मूलपत्रकरीराग्रफलकाण्डाधिरूढकाः। त्वक्पुष्पं कवचं चेति शाकं दशविधं स्मृतमिति

ह्रीरस्वामिनोक्तस्यशाकस्य निषेधइति। अधिरूढकं अंकुरः। वस्तुतस्तु। तत्तत्कालोद्भवाः शाका वर्जनीयाः अयत्न
तः। वज्रबीजमबीजं च विकारि च विवर्जयेदिति भविष्यवचनात्। तत्कालोत्पन्नानां दग्धविधशाकानां निषेधः। अत्र त
त्कालोद्भवजातीयत्वं विवक्षितं। न तु तन्मात्रकालोद्भवत्वं गौरवात्। तेनातपादिशोषितानां वर्षांतरोद्भवानामपि नि
षेधः। अत्र तत्कालोद्भवजातीयत्वमात्रं विवक्षितं। न तन्मात्रकालोद्भवत्वं गौरवात्। तेनान्यकालोद्भवानां च विवादी
नां निषेधः। अत्र तत्तत्कालोद्भवा इति वीप्सावशात् स्वस्वकालोद्भवानां सर्वेषां निषेध इति निष्कर्षः। वज्रबीजमित्यनेकबी
जमिति केचित्। इतरावयवापेक्षया बीजावयवगाधत्रवहवृलादिस्यन्ये। अबीजं कदलादि। वस्तुतस्तु इदं महानिबंधे स्व
भावान्निर्मूलमेव। आचारप्रदीपे। हेमंतार्कं चक्रलिंगं च विल्वोदुंबरभिः सह। उदरे यस्य जीर्यंति तस्य दूरतरो हरिः। तथा पुरा
के देवलः। ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं। व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः। आमिषाणि चोक्तानि
रामार्चनचंद्रिकायां पाद्मे। प्राण्यंगचूर्णं चर्मांबुजंबीरबीजपूरकं। अयज्ञशिष्टमाषादि यच्च सौरनिवेदितं। दग्धम
न्नमसूरं च मांसं चेत्यष्टधामिषं। कैश्चि तत्तद्देशलम्पंसु तद्दैवं विवर्जयेत्। पाद्मे कार्तिकमाहात्म्ये। गोछागीमहिषी
दुग्धादन्यद्दुग्धादि चामिषं। धान्ये मसूरिका प्रोक्ता अन्नं पर्युषितं तथा। द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा।

ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं। आत्मार्थे पाचितं चान्नमामिषं तत्स्मृतं बुधैः॥ तथा॥ निष्पावान् राजमाषांश्च

१ मसूरं संधितानि च। वृन्ताकं चणकं लिंगं चमुस्ते देवे विवर्जयेत्॥ संधितानि लवणशाकादीनि॥ तत्रैव वृद्धिधर्मे। चतुर्ष

पीह मासेषु हविष्याशी न पापभाक्॥ हविष्याणि तु स्मृतीचंद्रोदये भविष्ये हैमंतिकं सिता स्विन्नं धान्यं मुद्गा यवास्तिलाः

।कलायं कंगुनीवारं वास्तूकं हिलमोचिका। षष्टिका कालशाकं च मूलकं केमुकेतरत्॥ कंदः सैंधवसामुद्रे गव्ये च दधि

सर्पिषी॥ पयोऽनुद्धृतसारं च पनसाम्रहरीतकी॥ पिप्पली जीरकं चैव नागरंगं च तिंतिणी॥ कदली लवली धात्री फलान्य

गुडमैक्षवं। अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते इति॥ मदनरत्नेप्येवं। सितं मस्विन्नमनूष्मपक्वं धान्यं तंडुलाः। केमु

कं केमुजा इति प्राच्येषु प्रसिद्धः। कंदः। कलायस्तु सतीनकः स्त्यमरः। मटरीति प्रसिद्धधान्यं। अगस्त्यसंहितायां। हेमंताद्यु

क्ता। नालिकेरफलं चैव कदली लवली तथा। आम्रमामलकं चैव पनसं च हरीतकी। व्रतांतरप्रशस्तं च हविष्यं मन्यते

बुधाः। अन्यान्यपि प्रशस्तान्युक्तानि हेमाद्रौ भविष्ये। स्त्रीणां नरैर्वा मद्भक्तौ धर्मार्थं सुदृढव्रतैः। फलानीयान्नियमानेता

न्दन्तधावनवर्जकान्। तेषां फलानि वक्ष्यामि तत्कर्तृणां पृथक्पृथक्। मधुरस्वरो भवेद्राजा पुरुषो गुडवर्जनात्। तै राम:

लस्य वर्जनाद्राजन् सुंदरांगः प्रजायते। कटुतैलपरित्यागाच्छत्रुनाशः प्रजायते। योगाभ्यासी भवेद्यस्तु स ब्रह्म

पद्मानुयात्। तांबूलवर्जनाज्जोगी रक्तकंठश्च जायते। घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत्। एकपक्षोपनाज्जो
गी श्च पक्षोदोऽमलो भवेत्। भूमौ प्रस्तरशायी च विप्रोऽसुनिवरो भवेत्। एकांतरोपवासेन ब्रह्मलोके महीयते। धारणान्नख
रोम्णां च गंगास्नानफलं लभेत्। मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत्। भूमौ भुंक्ते सदा यस्तु स पृथिव्याः पतिर्भ
वेत्। प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठकः। हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत्। अयाचितेन प्राप्नोति पुत्रान्ध
र्मानपेयतः। षष्ठान्नकालभोक्तायुः कल्पस्थायी भवेद्दिवि। पर्णेषु यो नरो भुंक्ते कुरुक्षेत्रफलं लभेत्। गुडवर्जी नरो
दद्यात्तन्द्रतं ताम्रभाजने। सहिरण्यं नरश्रेष्ठ लवणस्याप्ययं विधिः। सुप्ते देवे तु यो विष्णोः शिवस्यांगणमर्चयेत्। पं
चवर्णैस्तु पानि सस्वस्तिकैः पद्मकैस्तथा। स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात्। अथैषां समाप्तौ कार्त्तिक्यां दा
नानि। नक्ते वस्त्रयुग्मं। एकांतरोपवासे गौः। शय्याभूशयने। षष्ठकालभोजने गौः। व्रीहिगोधूमादित्यागे हैमव्रीह्यादि।
कृच्छ्रे गोयुगम्। शाकाशने गौः। पयोव्रते चामधुदधिघृतव्रतेषु वासो गोश्च। ब्रह्मचर्ये स्वर्णभूर्त्तिमत्। तांबूलव्रते वा
सोयुग्मं। मौने घृतकुंभो वस्त्रयुग्मं घंटा च। देवाग्रे रंगमालिकाकरणे धेनुर्हैमपद्मं च। दीपव्रते दीपिका वासोयुग्मं च।
भूमिभोजने पर्णभोजने च कांस्यपात्रं गोश्च। चतुष्पथदीपे गोवासे च गोवृषौ। प्रदक्षिणाशते वस्त्रम्। अनुक्ते सुवर्णं

गोश्वस्यादिकं हेमाद्रौ ज्ञेयम्। तथा भार्गवार्चनदीपिकायां पाद्मे। शयनीबोधिनीमध्ये शमीदूर्वापमार्गकैः। भृंगराजेन देवेशं तु नार्चयी
२० त कदाचन। हेमाद्रौ पाद्मे। आषाढादि चतुर्मासान् भृंगं वर्जयेन्नरः। समाप्तौ च पुनर्दद्यात् तिलतैलयुतं घटम्। आषाढादि चतु
र्मासं वर्जयेन्नखकृंतनं। वृंताकं गृंजनं चैव मधुसर्पिर्घटान्वितं। कार्तिक्यां तत्तु नर्हं मे ब्राह्मणाय निवेदयेत्। अन्यान्यपि वर्ज
नसंकल्परूपाणि पृथ्वीचंद्रोदये ज्ञेयानि। टोडरानंदे स्कांदे। एकांतरं घ्यंतरं वा कुर्यान्मासोपवासकं। अनोदनं फलाहारं न
क्तव्रतमथापि वा। अत्रैव तप्तमुद्राधारणमुक्तं रामार्चनचंद्रिकायां भविष्ये। शयन्यां चैव बोधिन्यां चक्रतीर्थं तथैव च। शंख
चक्रविधानेन वह्निप्तो भवेन्नर इति। अतप्ततनूर्न तदामो अश्नुत इति ऋग्वेदात्। सहोवाच याज्ञवल्क्यस्तस्मात् उ
मानात्महिताय हरिं भजेत्। सुश्लोक मौलेर्वर्मणोपयोग्य अग्निना संधत्त इति शतपथश्रुतेः। प्रतेविष्णो अर्जुन चक्रे सुतप्ते
जन्मांभोधिं तत्तेवे चर्मणी द्वाः। मूले वोको देधतेन्यो पुराणाल्लिंगान्यंगेतावकान्यर्पयंति इति सामवेदात्। अग्निहोत्रं
तथा नित्यं वेदस्याध्ययनं तथा। ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणमिति पद्मपुराणाच्चेति। ब्राह्मणः क्षत्रियो वै रामः
श्यः शूद्रो वा यदि वेतरः। शंखचक्रांकिततनुस्तुलसीमंजरीधरः। गोपीचंदनलिप्तांगो दृष्टश्चेत्तदघं कुत इति काशी
खंडात्। तत्प्रकारस्तु रामार्चनचंद्रिकायां ज्ञेयः। पृथ्वीचंद्रोदयस्तु। यस्तु संतप्तशंखादिलिंगचिह्नतनुर्नरः। स सर्व

यातनाभोगी चंडालो जन्मकोटिषु ॥ द्विजं तु तप्तशंखादिलिंगांकिततनुं नरः । संभाष्य रौरवं याति यावदिंद्राश्चतुर्दशे
ति बृहन्नारदीयोक्तेः । शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा । एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः । शंखचक्र
के मृदा यस्तु कुर्यात्तप्तायसेन वा । स शूद्रवद्बहिःकार्यः सर्वस्माद्द्विजकर्मणः । यथा श्मशानजं काष्ठमनर्हं सर्वकर्म्म
सु । तथा चक्रांकितो विप्रः सर्वकर्मसु गर्हितः । तथा । शिवकेशवयोरंकान् शूलचक्रादिकान् द्विजः । न धारयेत मतिमा
न् वैदिके वर्त्मनि स्थित इति विष्णु आश्वलायनादिवचनात् । ऋग्वेदादिश्रुतीनामन्यार्थत्वादन्यश्रुतीनां चासत्वाच्च
क्रादिधारणं शूद्रविषयमित्यूचुः । तत्संचोदनार्थं निषिद्धमिति श्रीधरस्वामी । यद्यपि निषेधस्य प्राप्तिसापेक्षत्वा
द्विधिं विना च तदयोगाद्दुपजीव्यविरोधेन न तौ पक्षे करोतीतिवत्विकल्पो युक्तस्तथापि एकजातेरयं धर्म इत्यनेन
सामान्यवाक्यानामुपसंहारणात् । द्विजातिनिषेधो नित्यानुवाद इति तदाशयः । अत्र शिष्टाचार एव संकटपाशनिःस
रणस्थलमिति संक्षेपः ॥ ॥ आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये । आषाढपौर्णमास्यां तु
संध्याकाले ह्युपस्थिते । संकल्पयेन्मासमेकं श्रावणे प्रत्यहं ह्यहं । स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती । भोक्ष्या
मि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति । अस्य नक्तव्रतत्वात्सायाह्नव्यापिनी ग्राह्या । अत्रैव शिवशयनोत्सवउ

क्तो हेमाद्रौ वामनपुराणे ॥ पौर्णमास्यां तु या नाथः स्वपते चर्मसंस्तरे । वैयाघ्रे च जटाभारं समुद्ग्रथ्याहिवर्मणा ॥ मदनरत्नेप्येवं । इयं प्रदोष
व्यापिनी । अत्रैव व्यासस्नानोक्ता । तत्र त्रिमुहूर्त्ता चेत्परैवेति संन्यासपद्धतौ त्रिमुहूर्त्ताधिकं ग्राह्यं पर्वक्षौरं भ्रमणं मयोरिति वचनात् ॥
॥ इति श्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ आषाढमासः ॥ ॥ कर्कसंक्रांतौ पूर्वास्त्रिंशद्दंडाः पुण्यकालः । सू
र्योदयोत्तरं संक्रमे तु परत एव पुण्यं । रात्रौ तु निशीथात्प्राक् परतश्च संक्रमे ऽपरार्के हेमाद्र्यनंतभट्टादिमते पूर्वोत्तरदिनयोः पंच
नाड्यः पुण्यकालः । धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा । पूर्वापरविभागेन रात्रौ संक्रमते रविः । दिनांते पंच नाड्यस्तु तदा पुण्य
माः स्मृताः । उदये पि तथा पंच दैवे पित्र्ये च कर्मणीति स्कांदोक्तेश्च । पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रांतिपरं । वक्ष्यमाण
वचोविरोधात् । इदमुक्तं मदनरत्ने । तेनायमर्थः । रात्रेः पूर्वभागे मकरे उदये पंच नाड्यः पुण्याः । रात्र्यावपरभागे कर्कसंक्रमे दि
नांते पंच नाड्यः पुण्याः । विषुवतोस्तु पूर्वदिने पंचापरदिने च पंचेति । वाक्यांतरानुरोधात् । तेन हेमाद्रिमाधवयोः सर्ववचना
नां चाविरोधः । माधवमते तु । अर्धरात्रेन दूर्ध्वं वा संक्रांतौ दक्षिणायने । पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति वृद्धगा रा.भा.।
र्ग्योक्तेः । मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमालिनः । प्रभाते वा निशीथे वा तदा पुण्यं तु पूर्वतः इति भविष्योक्तेश्च पूर्वदि
न एव पुण्यं । दाक्षिणात्यास्त्वेतदेवाद्रियंते । अत्र रात्रावपि स्नानादि भवतीत्युक्तं प्राक् । अत्र दानोपवासादि सर्वमुक्तं । तथा

कर्कैकेषणादिकर्त्तनं निषिद्धं। कुंभे कर्कटके वापि कन्यायां का मुकेरवौ। रोमखंडं गृहस्य स्यपितृन्न प्राप्यते यम इति सुमंतुवच
नादितु कं जीवत्पितृकनिर्णये गुरुभिः। अथ नदीनां रजोदोषः। हेमाद्रावत्रिः। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्ना
नादीनि कर्माणि तासु कुर्वीत मानवः। इदं च क्षुद्रनदीषु। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा
समुद्रगा इति व्याघ्रोक्तेः। मासत्वं लगस्त्योदयावधि त्वमुक्तं। यावन्नोदेति भगवान् दक्षिणाशाविभूषणं। तावद्रजोवहा नद्यः क
रतोयाः प्रकीर्तिताः। करतोया अल्पतोयाः। तथा कात्यायनः। याः शोषमुपगच्छंति ग्रीष्मे कुसरितो भुवि। तासु नाह्वि न स्नाया
द्दह्लीदशावासरे। इदं चापदि। स्मृतिसंग्रहे। धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्तास्ते परिकीर्तिताः
। महानदीषु भविष्य उक्तं। आदौ तु कर्कटे देवि महानद्यो रजस्वलाः। त्रिदिनं तु चतुर्थेह्नि शुद्धाः स्युर्जाह्नवी यथा। महानद्यश्च
ब्राह्मे। गोदावरी भीमरथी तुंगभद्रा च वेणिका। तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः। भागीरथी नर्मदा च यमुना च सर
स्वती। विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः। द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः। मदनरत्ने पुराणांतरे। महानद्यो देवि
का च कावेरी वंजरा तथा। रजसा तु प्रदुष्टाः स्युः कर्कटादौ त्र्यहं नृप। कात्यायनः। कर्कटादौ रजोदुष्टा गोमती वासरत्रयम्। चंद्रभागा
सती सिंधुः सरयूर्नर्मदा तथा। इदं गंगादितिरिक्तविषयम्। गंगा च यमुना चैव प्लक्षजाता सरस्वती। रजसा नाभिभूयंते ये चान्ये नद

सन्नकाः। श्रोणसिंधुहिरण्यवाह्याः कौशिकीलोहितघर्घराः। शतद्रूश्च नदाः सप्त पावनाः परिकीर्तिताः इति देवलोक्तेः। यत्तु प्रथमं कर्कटे दे
22 वि त्र्यहं गंगा रजस्वला स्यादिति वचनं तत्र गंगाशब्दो भिन्नगोदावर्यादिगंगातरपरमिति मदनरत्ने। अन्ये त्वंतर्गतरजोविषयं। गंगाधर्मद्र
वः पुण्या यमुना च सरस्वती। अंतर्गतरजोदोषाः सर्वावस्थासु चामलाः इति निगमोक्तेः। तीरवासिनां तु रजोदोषो नास्ति। न तु नत्ती
रवासिनामिति निगमोक्तेः। रजोदुष्टमपि जलं गांगं जलं यागे पावनं। गंगांभसा समायोगाद्दुष्टमप्यंबु पावनमिति मात्स्योक्तेः। भू
तनकूपादौ तु योगियाज्ञवल्क्यः। अजाश्वा वा महिष्यश्च ब्राह्मणी च प्रसूतिका। भूमेर्नवोदकं चैव दशरात्रेण शुध्यतीति। क्वचित्त्वदो
षमाह व्याघ्रपादः। अभावे कूपवापीनामन्यपापि पयो मतं। रजोदुष्टेपि पयसि ग्रामभोगो न दुष्यति। गौडास्तु। अन्येनापि स
मुद्धृते इति द्वितीयपादे पाठः। तेनोद्धृते न दोषः। तथा च तासु स्नानेति प्रागुक्तमित्याहुः। वसिष्ठोपि। उपाकर्मणि चोत्सर्गे प्रेत
स्नाने तथैव च। चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते इत्यलं विस्तरेण। श्रावणशुक्लतृतीया मधुश्रवा। सा गुर्जरेषु प्र
सिद्धा। सा परयुता ग्राह्येति दिवोदासः। श्रावणशुक्ले चतुर्थ्यां शिवचतुर्थीभात्त्वविघ्नगणेश्वर इति वचनात्। श्रावणशुक्लेप
चमी नागपूजादौ परैवेति सामान्यनिर्णय उक्तं। मात्र चमत्कारचिंतामणौ। पंचमी नागपूजायां कार्या षष्ठीसमन्विता। तस्यां तु तु राम:
षिता नागा इतरा सचतुर्थिकेति। श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य पंचम्यां चतुर्थी सहिता हिता इति

मदनरत्नेभिधानात्त्वातेन परैर्वेति। अत्र विशेषो हेमाद्रौ भविष्ये। श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप। द्वारस्योभयतो ले-
ख्या गोमयेन विषोल्बणाः। पूजयेद्विधिवत्क्षीरदधिदूर्वांकुरैः कुशैः। गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः। ये तस्यां पूजयं-
ती ह नागान्भक्तिपुरःसराः। न तेषां सर्पतो वीर भयं भवति कुत्रचिदिति। श्रावणशुक्ले वादंशपादधिव्रतं प्रागुक्तं। तत्कोदीनां व
निषेधः। तत्र दधिव्यवहाराभावादिति वक्ष्यते। अत्रैव दिने विष्णोः पवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये। श्रावणस्य सिते पक्षे
कर्कटस्थे दिवाकरे। द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम्। द्वादश्यामथवैकादश्यां पंचम्यामथवा द्विज। अनुकूल्येषु कर्त्तव्यं पंच-
दश्यामथापि वेति। शिवे तु तत्रैव कालोत्तरे। आषाढांते चतुर्दश्यां नभस्ये नभसेऽथ तथा। अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः सम-
मिति। अन्यदेवतानां तु वक्ष्यते। अधिवासनं तु दीपिकायां। गोदोहांतरिते काले सर्वेष्वधिवासनमिति। गोदोहकालो रामार्चनचंद्रि-
कायां। पवित्रारोपणं विष्णोश्श्रावणे नभवे द्वादि। कार्त्तिक्यवधि श्रुक्लास्ते कर्त्तव्यमिति नारदः। हेमरौप्यताम्रक्षौमैः सूत्रैः कौ-
शेयपद्मजैः। कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्त्तितैः शुभैः। कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत्। तत्रोत्तमं पवित्रं
तु षष्ट्या सह शतैस्त्रिभिः। सप्तत्या सहितं वा स्याच्छतेनाथ मध्यमं स्मृतं। साशीति नाशतेनैव कनिष्ठं तत्समाचरेत्। साधार-
णपवित्राणि त्रिभिः सूत्रैः समाचरेत्। उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं। कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशद्ग्रंथिशोभ

ने। षट्त्रिंशच्च चतुर्विंशद्द्वादशेति च केचन। चतुर्विंशद्द्वादशाष्टाविंत्येके मुनयो विदुः हेमाद्रौ विष्णुरहस्ये तन्त्र यथोक्तं। अष्टोत्तर
23 शतं कुर्याच्चतुःपंचाशदेव वा। सप्तविंशतिरेवाऽथ ज्येष्ठमध्यकनीयसं। अधमं नाभिमात्रं स्यादूरुमात्रं द्वितीयकं। प्रलंबंतो
जानुमात्रं प्रतिमायां निगद्यते। शिवपवित्रं तु तत्रैव शैवागमे। एकाशीत्यथवा सूत्रैस्त्रिंशता चाष्टयुक्तया। पंचाशता वा कर्त्तं-
व्यं तुल्यग्रंथ्यंतरालकं। द्वादशांगुलमानानि व्यासादष्टांगुलानि वा। लिंगविस्तारमानानि चतुरंगुलिकानि चेति हेमा-
द्रौ कालोत्तरे युगधर्मे। कृते मणिमयं कार्यं त्रेतायां हेमसंभवं। पट्टजं द्वापरे प्रोक्तं कार्पासं तु कलौ स्मृतं। अधिकारिणो
ऽपि तत्रैव विष्णुरहस्ये। ब्राह्मणाः क्षत्रिया वैश्यास्तथा स्त्रीशूद्र एव च। स्वधर्मावस्थिताः सर्वे युक्त्या कुर्युः पवित्रकं। तथा। अ-
नादेवेति मंत्रेण द्विजो विष्णोर्निवेदयेत्। शूद्रस्य मूलमंत्रो वा येन वा पूजयेद्धरिं। एतच्च नित्यं। न करोति विधानेन पवित्रारो-
पणं तु यः। तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम। तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः। वर्षे वर्षे प्रकर्त्तव्यं पवित्रा-
रोपणं हरेरिति तत्रैवोक्तेः। देवताविशेषे तिथयोऽपि तत्रैव। धनदश्रीरमागौरीगणेशः सोमराट् गुहः। भास्करश्चंडिकांबा च एषः
वासुकिर्ऋषयस्तथा। चक्रपाणिरनंगश्च शिवो ब्रह्मा तथैव च। प्रतिपत्प्रभृतिष्वेताः पूज्यास्तिथिषु देवताः। यथोक्ताः श्रु-
त्यपेक्षितेन्तिथयः श्रावणस्य चेत्ता। तथा हेमाद्रौ कालोत्तरे। चतुर्दश्यामथाष्टम्यां सर्वेषां धारणं तु तद्दिने। तत्र कारस्तु ण-

22

मार्चेन चंद्रिकायामृ ततस्तानि पवित्राणि वैष्णवे पुटके शुभे । संस्थाप्य शुचिवस्त्रेण पिधाय पुरतो न्यसेत् ।। अग्र रात्रिं समि-

तां वैणीकुर्यात्सद्भिः शास्त्रीकुशैः । क्रियालोपविधानार्थं यत्त्वया विहितं प्रभो । मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकं । न मे वि-

घ्नो भवेद्देव कुरु नाथ दयां मयि । सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः । उपवासेन देवत्वां तोषयामि जगत्पते । काम-

क्रोधादयो ह्येते न मे सन्तु व्रतघातकाः । अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं । तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोस्तु-

ते इति देवं संप्रार्थ्य । कुंभं संस्थाप्य तत्र वंशपात्रे ॐ संवत्सरस्य यागस्य पवित्रीकरणाय भोः । विष्णुलोकात्पवित्राद्य आग-

च्छ इह नमोस्तु ते । अनेन मूलेन चावाह्योत्तममध्यमकनिष्ठेषु । विष्णुब्रह्मरुद्रान्सत्वरजस्तमसि वेदत्रयं वनमालायां भ-

क्तिं चावाह्य तत्र सत्र्यां ब्रह्मविष्णुरुद्रान्न्यस्य ग्रंथिषु । क्रिया । पौरुषी । वीरा । विजया । ईशा । अपराजिता । मनोन्मनी । जया । भद्रा ।

मुक्तिश्चेत्यावाह्य संपूज्य । ॐ संवत्सरकृतार्चायाः संपूर्णफलदोपियत् । पवित्रारोपणायैतत् कुरुकुंधरते नमः । विष्णुते-

जोद्भवं रम्यं सर्वपातकनाशनं । सर्वकामप्रदं देव तवांगे धारयाम्यहं । इति देवकरे मंगलसूत्रं बध्वा देवं संपूज्य अभिमंत्रयेत् ।।

आमंत्रितोसि देवेश पुराणपुरुषोत्तम । प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव । क्षीरोदधिमहानागशय्यावस्थितवि-

ग्रह । प्रातस्त्वां पूजयिष्यामि सन्निधौ कुरु ते नमः । निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं । सर्वथा सर्वदा विष्णो नमस्ते स्तु गही

दमे। ततः पुष्पांजलिं दत्वा रात्रौ जागरणं कुर्यादित्यधिवासनम्। प्रातर्नित्यकृत्यं कृत्वा गंधदूर्वाक्षतयुतं पवित्रमादाय। देवदे
२५ व नमस्तुभ्यं गृहाणेदं पवित्रकं। पवित्रीकरणार्थाय वर्षपूजाफलप्रदं। पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं। शुद्धो भवाम्यहं दे
व त्वत्प्रसादात्सुरेश्वर। मूलमंत्रपुटितानेन दत्वांगदेवताभ्यो नाममंत्रैः समर्प्य महानैवेद्यं दत्वा नीराज्य। मालिविद्रुममालाभिरिंद्रा
क्षिभिर्दमनारोपोक्तमंत्रैः प्रार्थ्य पित्रा गुरवे ब्राह्मणेभ्यश्च दत्वा स्वयं च धारयेत्। तथा। मासपक्षमहोरात्रं त्रिरात्रं धारयेत्तथा।
देवेतस्तत्रसंदर्भदेशकालविवर्त्तया। अकरणे तु तत्रैव। पवित्रारोपणं काले न करोति कथंचन। तदा युतं जपेन्मंत्रं स्तोत्रं
वापि समाहितः इत्युक्तं। इति पवित्रारोपः। श्रावणशुक्लचतुर्दशी हस्तयुता ग्राह्या। अत्र वक्ष्यो विशेषश्चैत्रचतुर्दश्यामुक्तः।
॥ ॥ अथोपाकर्म। तत्रैव कृत्यचानाम्। प्रयोगपारिजाते शौनकः। अथातः श्रावणे मासि श्रवणर्क्षयुते दिने। श्राव
णं वा श्रावणे मासि पंचम्यां हस्तसंयुते। दिवसे विदधीनेत तु पाकर्म यथोदितम्। अध्यायोपाकृतिं कुर्यात्तत्रोपासनवह्
निनेति। अत्र पौर्णमास्युपसंहारन्यायेन यजुर्वेदीपरेति हेमाद्रिः। अत्र हस्तयुतापंचम्युक्ता। कारिका॥ तन्मासे ह एम:
स्तयुक्तायां पंचम्यां वा तदिष्यत इति। केवलपंचम्यां हस्तयुते ऽस्मिन्नदिने इति तु हेमाद्रिः। उपासनवह्निनेति तु क
र्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते। इति कारिकोक्तलौकिकाग्निनापि कल्प्यते। तत्रापि अध्यायोपैरन्वारभ्य इ

तिरस्कारात्सपिण्डत्वे तदधिकारिकस्याचार्याग्नौ नान्यस्याग्नावन्यो जुहुयादिति निषेधाद्वह्नौ किं कएवा। तदभावे तु
स्मार्त्ते इति निर्णयः। यद्यपि दीपिकायां वेदोपाकर्मनिरोषधिप्रजनने पद्मेसिते श्रावणे इति सूत्रे पद्मेपि सर्वेषां मुख्य
कालत्वेनोक्तः वक्ष्यमाणगार्ग्यवचनेन हस्तयोगान्न अतिविहितस्य तस्याविरोधिनः सर्वान् प्रतिप्रवृत्तिश्च तथापि श्रा
वणमाससंबंधस्य सूत्रोक्तत्वात् कृष्णपक्षेपि कार्यमिति द्रष्टव्याः। तथा च सूत्रं। अथातोध्यायोपाकरणमोषधीनां
प्रादुर्भावे श्रवणेन श्रावण्यां पंचम्यां हस्तेन वा। अत्र श्रावणो मुख्योन्यो गौणः। तस्याह हस्तयोगे हेमाद्रौ व्यासः।
धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत्। तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितं। श्रावणेन तु यत्कर्म उत्तराषाढ
संयुतं। संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यतीति। प्रयोगपारिजाते गार्ग्योपि। उदयव्यापिनी लेवा विहस्त्र हस्तेघ
टिकाद्वयं। तत्कर्म सफलं ज्ञेयं तस्य पुण्यप्रवनं तकमिति। ऋग्वेदिभिरुत्तराषाढयोगे परेद्युः श्रवणाभावे घटिकाद्वयन्यू
नेवापंचम्यादौ कार्यं। न तु हस्तविधावयं संगवेपि अपवादाभावात्। किंच परेद्युः संगवास्पर्शे निषिद्धपर्वग्रहणे किंमा
नं। संगववाक्यं श्रवणवाक्यं चेति चेत्तर्हि व्रीहिवाक्याद् स्वशंफवाक्याश्च बलं। मासमिश्राणामप्युपादानं स्यादिति
महत्संकटितं। एतेन पर्वाप्यौदयिकं व्याख्यातम्। निषेधश्रवणे स्मरणभयत्र सामान्यात्। अर्थवणस्तु हस्तदिने संक्रांत्यादौ उपाक ३२

र्म न कुर्वीत कर्मा तत्सामगर्यजुर्विदः । ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु इति हेमाद्रौ निषेधात् पंचम्यादयो ग्राह्याः । अत्र ग्र
८५ हसंक्रान्ति दिने येषां प्राप्तं तैः सर्वैरुपाकर्मैव न कार्यम् । इत्येके । को नाम वाक्यार्थः । तेनाथर्ववेदिनामपि निषेधः अन्यथा हस्तादित्र
येऽत्रैवैके ग्रहसंक्रान्त्योः षड्वाक्यकल्पनापत्तेः । मदनरत्नेऽपि यदि स्याच्छ्रावणं पर्व ग्रहसंक्रान्तिदूषितं स्यादुपाकर
णं शुक्लपंचम्यां श्रावणस्य तु । स्मृतिमहार्णवे । संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते । तन्मासे हस्तयुक्तायां पंचम्यां वा
तदिष्यते । तत्रापि नयोगपारिजाते वृद्धमनुकात्यायनौ । अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं तदा । उपाकर्म न कुर्वी
त परतश्चेन्न दोषकृदिति । मदनरत्ने गार्ग्योऽपि । यद्यर्धरात्रादर्वाक्तु ग्रहः संक्रम एव वा । नोपाकर्म तदा कुर्यात् श्राव-
ण्यां श्रावणेऽपि वा । एतेन ग्रहणकाले श्रवणसत्त्व एव निषेधो नार्वागिति मूर्खधीः काप्यपास्ता । ग्रहविशिष्टानां हस्तश्रव
णपर्वणां प्रत्येकं निषेधे तद्युक्तोपाकर्मनिषेधे च विशिष्टोद्देशे वाक्यभेदात् पंचम्यां संक्रान्तौ निषेधाभावापत्तेश्च ।
तेनार्धरात्रात्पूर्वं ग्रहसत्त्वमात्रेऽउपाकर्मणि निषेधो न तद्योगः । यत्तु प्रतिपन्मिश्रिते नैव नोत्तराषाढसंयुते । श्रवणे श्रा रामः
वणं कुर्याद्ग्रहसंक्रान्तिवर्जिते इति । प्रतिपन्मिश्रितं निषेधकं वचनं तन्निर्मूलं हेमाद्रौ निगमः । ग्रहयोगे गुरुर्हंति
संक्रान्तिः शिष्यघातिनी । तपो हंत्युत्तराषाढा उपाकर्मणि वैष्णवे । अत्र चापि दोषकरणे प्राप्ते कुलीरे संस्थिते रवौ ।

उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्तके इति वचनं देशान्तरविषयं। नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके। कर्कटे सं
स्थिते भानावुपाकुर्यात्तु दक्षिणे इति बृहस्पतिवचनादिति प्रयोगपारिजाते। नोक्तं परं हरमाधवीये प्येवं। सामगानां सिं
हस्थे रवावुक्तेस्तद्विषयमिदं श्लोकद्वयं चतुर्थीकरणेवदुपसंक्षीयत इति वयं पश्यामः। कालादर्शे। अध्यायानामुपाक
र्म श्रावण्यां तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युः सिंहस्थोर्को भवेद्यदि। सहस्तस्य शुक्लपंचम्यां तद्वद्ग्रहणसंक्रमे। असिं
हार्के प्रौष्ठपद्यां श्रवणेन यजुर्वस्य येति तन्मूलालिखनात्सूत्रविरोधाच्च चिंत्यः। सूत्रे हि। श्रवणेन श्रावण्यां स्याति चांद्रमास एवो
क्तो न सौरः। तस्य पंचम्यभावाच्छ्रुतिलग्नहणाभ्यामुभयपरत्वे हत्तिहृय विरोधाच्च। तेन सिंहस्थोर्को भवेद्यदि तदा कर्केऽपि ग्रह
णसंक्रमे सति असिंहार्के शुक्लपंचम्यां श्रावण्यां वा बह्वृचाः प्रौष्ठपद्यां तैत्तिरीया इति व्याख्येयं। तेषां सौरमासाभावात्।
श्रावण्यां श्रवणस्यानुक्रमादौ तु बह्वृचपरिशिष्टे। अब्दं यत्र यस्मिन्मासे तु न भवेति चेत्। तदा भाद्रपदे मासि श्रवणे
न तदिष्यत इति। तत्राप्यनुक्रमे तु कुर्यादेव। तत्वार्षिकमित्याचक्षत इति सूत्रात्। वर्षं तोभवं वार्षिकं एतच्च शुक्रास्तादा
वपि कार्यं। उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति दमनारोपे लिखितवचनात्। नित्ये नैमित्तिके जप्ये होमयज्ञक्रि
यासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति प्रयोगपारिजाते हेमाद्रौ संग्रहोक्तेः। पर्वणि ग्रहणे सति पूर्वं त्रिरात्रा

द्विवेधाभावं वक्तुमिदं तेन पर्वणि ग्रहणेपि चतुर्दश्यां श्रवणे कार्य्यमिति हेमाद्रिः। प्रथमारंभस्तु न भवति। गुरुभार्गवयोर्मौ
ढ्ये वा बाल्ये वार्द्धकेपि वा। तथाधिमाससंसर्पमलमासादिषु द्विजः। प्रथमोपाकृतिर्न स्यात् कृतं कर्म विनाशकृदिति तत्रैव कश्य
26 पोक्तेः। तत्र प्रथमारंभे वृद्धिश्राद्धं कुर्यादिति नारायणवृत्तौ। एतच्चाधिमासे न कार्य्यं। उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्ट
काः। मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकमिति ज्योतिःपराशरोक्तेः। उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणां। अभि
षेकादिवृद्धीनां न तूत्कर्षो युगादिष्विति कात्यायनोक्तेश्च। यत्तु। उपाकर्मणि चोत्सर्गे ह्येतद्दिष्टवृषादित इति तु स्पष्टमृग
वचस्तत्सामगविषयं तेषां सिंहार्के एवोक्तेः। एतच्चापराह्णे कार्यम्। उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव त्विति। अध्या
यानामुपाकर्म कुर्यात्काले पराह्णके। पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति हेमाद्रौ गोभिलोक्तेः। वस्तुतस्तु भवे
दुपाकृतिः पूर्णिमास्यां पूर्वाह्ण एव त्विति प्रचेतोवचनात् पूर्वाह्णे सामगविषयं तेषामपराह्णे एवोक्तेरित्यनुपदं वक्ष्यते। दी
पिकापि। अस्य तु विधेः पूर्वाह्णकालः स्मृत इति। याजुषास्तु पर्वणि कुर्युः। तच्चापस्तंबैरौदयिकं ग्राह्यं। अन्ये तु पूर्वमा रामः
पर्वण्योदयिके कुर्युः श्रावणे तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते इति गार्ग्योक्तेः। संप्राप्तवान्कृती
र्देशा पर्वण्योदयिके पुनः। अतो भूतदिने तस्मिन्नोपाकरणमिष्यत इति कालिकापुराणाच्च। अथ चेद्दोषसंयुक्ते पर्वर

णिस्यादुपक्रिया। दुःखशोकामयग्रस्तोराष्ट्रे तस्मिन् द्विजातयः इति मदनरत्ने गार्ग्योक्तेः। अत्र सिंगाभट्टीये विशेषः। श्रवणः
श्रावणपर्वसंगवस्थं यदा भवेत्। तदैवोदयिकं ग्राह्यं नान्यदौदयिकं भवेत्। पराशरमाधवीयेऽपि गार्ग्यः। श्रावणी पौर्णमा
सीतु संगवात्परतो यदि। तदैवोदयिकी ग्राह्या नान्यदौदयिकी भवेत्। कर्मकालमाह कालादर्शे निगमः। श्रावण्यां प्रोष्ठप
द्यां वा पतिपत्स्यामणुकृत्तैः। विद्यास्याच्छंदसां तत्रोपाकर्मोत्सर्जनं भवेत्। अत्र पौर्णमासी श्रवणहस्तयोरुपलक्षणं तेन
तावपि संगवस्पृशौ उदयेषट्घटीस्पर्शे ऽतो पर्वणि वा कर्म। कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमात्। इति पृथ्वीचं
द्रः। तन्न। विष्णुचैतन्यघटिकाद्वयमिति सर्वोक्तिविरोधात्। सामान्यवाक्याद्दौदयिकी कर्मपर्याप्ता ग्राह्या न स्पृष्टा। संगवनिमित्तः
पूर्वविद्धापवादाभावात्। माद्वादौ कालांतरे वास्तु न तु निषिद्धं। न हि व्रीह्यलाभे निषिद्धमाषग्रहणं युक्तं। अत एव परे
द्युः संगवव्याप्तौ पूर्वनिषेधः। तदभावे तु नेति मूलवचनस्याप्यपास्ता। विधिवैषम्यात्। माषनिषेधे तथापत्तेश्च। पूर्ववि
द्धावचनस्य त्वे हि सायुज्यते एवं श्रवणे विज्ञेयं। एतच्च बुद्ध्याधिकपरं। तेन यथाग्निहोत्रादौ सायंप्रातःकालबाधे सामान्यो
स्याजीवनावश्यकन्ल कालेदर्शादिरनुष्ठानमाप यथा व्रीह्याद्यभावे शफाद्यभावे यागादिप्र निषिद्धवर्ज्यद्रव्येण तथात्र संगवा
भावे निषिद्धवर्ज्यं कर्मपर्याप्तौदयिके कालांतरे वानुष्ठानं न तु कदापि निषिद्धे। अपवादाभावे उत्सर्गस्यैव प्राप्तेः। तेन प्रा

शास्त्रमात्रपरमिदं कात्यायनादीनां तु दिनद्वये सर्वोक्त्याभावेकदेशस्पर्शेनापूर्वैवेति हेमाद्रिः। यदपि श्रावणी दुर्गानव
मी दूर्वा चैव कुजनाशिनी। पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति अत्र सर्वैव वर्त्तत द्रुलपवित्रश्रावणीकर्मादिदैवकर्मवि
षयमिति हेमाद्रिः। अत एव वचनात्कुलधर्मवृत्तात्वापि पूर्वैव। मदनरत्नेप्येवं। मदनपारिजातेपि। पूर्वविद्धायां श्रावण्यां
वाजसनेयिनामुपाकर्मेत्युक्तं। मदनरत्नेतु। पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः इति बह्वृचपरिशिष्टाद्बह्वृचान्
श्रुतिकर्मविधानार्थप्रवृत्तेः तत्र तैत्तिरीयककर्मविध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यतश्चौदयिकपर्वप्राप्तेस्त
न्निषेधेन बह्वृचानां श्रावणीविधानात्तैत्तिरीयकपदं अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात्। प्राप्तेश्च यजुर्वेदिमात्रपर
त्वात्सर्वयजुर्वेद्युपलक्षणार्थं। अत एवोत्पत्त्यानुवादत्वानन्तु विधायकं। येन विशेषविधिना उपसंहारः स्यात्। अनुवादत्वा
नङ्गीकरणे दोषः। अन्यथौदयिकपर्वविशिष्टोपाकर्मोद्देशेन कर्तृविधौ कर्तृविशिष्टौदयिकपर्वविधौ वा वाक्यभेदा
पत्तेः। औदयिकपर्वविधौ वाक्यभेदापत्तेः। तस्मात्तैत्तिरीयकपदाविवक्षया सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तं। तन्न एमः
। नतावत्परिशिष्टे बह्वृचानां पर्वत्वेव विधिः। धनिष्ठाप्रतिप्रयुक्तं त्वाष्ट्रकृत्तसमन्वितमित्यादि तदुदाहृततएव परिशि
ष्टावेदान्तरधर्मविधीनां दर्शनात्तानाप्यनुवादोयं कालिकापुराणबह्वृचादीनामपि तदापत्तेः। कुर्युरित्यस्याविधि

त्वेन तस्यैवार्थवादत्वेनैतत्स्या प्राप्तानुवादित्वाच्चा न चैतत्तैत्तिरीयकाणां गृह्ये तद्विधिरस्ति येनानुवादः स्यात् । न च वाक्यभेदः ।
तैत्तिरीयकपदमात्रस्य कर्ममात्रस्य वा उद्देश्यत्वायोगेन हविरार्त्तिवदष्टवर्षं ब्राह्मणमुपनयीतेतिवच्चाङ्गस्याविशि
ष्टस्योद्देश्यत्वात् । अन्यथोत्तरार्द्धे बह्वृचपदस्याप्यविवक्षापत्त्या श्रावणस्य सर्वसाधारणत्वापत्तेः । तस्माद्धेमाद्रिमतमेव
युक्तमिति दिक् । इदं च शिष्यानध्यापयतश्चावसथ्येऽग्नौ । अनध्यापयतो नाधिकार इति कर्कः । श्रावण्यामपि ग्रहण
दिदुष्टायां कातीयभिन्नैः प्रोष्ठपद्यां कार्य्यं । तेन तु श्रावणपञ्चम्यां संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् । उपाकृति
स्तु पञ्चम्यां कार्या वाजसनेयिभिरिति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः । इदं च सूत्रोक्तकालपरत्वाद्बह्वृच
परमपि शाखायनैस्तु हस्ते कार्य्यम् । आपस्तम्बैराथर्वणैश्च प्रोष्ठपद्यां । यत्तु बौधायनः । श्रावण्यां पौर्णमास्यामाषाढ्यां
वोपाकृत्य तैष्यां प्रोष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं तच्छाखीयविषयं वा । सामगास्तु । श्रावणे हस्ते कुर्युः
बह्वृचाः श्रवणे चैव हस्ते चैव सामवेदिन इति निर्णयामृते गोभिलोक्तेः । सोऽप्युत्तरः । धनिष्ठावतिपद्युक्ते त्वाषाढ्युक्तसम
न्वितं । श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठका इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योपि । सिंहे रवौ तु पुष्पर्क्षे श्रवणे
विवरे बहिः । छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसां । अस्तपक्षे तु हस्तेन उपाकर्मापराह्णिकमिति । अविविवरे गृहादि

दोषहीने। पुष्ये हस्ते वा कृते उत्सर्गः। अपराह्णिक मुपाकर्म्मेत्यन्वयः। विचरेदिति पाठो ऽज्ञानकृतः। अत्र तु विशेषः सर्व्वमेवोक्तः। प्रयो
गपारिजाते गोभिलः। उपाकर्मोत्सर्जनं चैव तस्यानाम प्रदीप्यते। धारणाध्ययनं गत्वा रुद्रिणा ब्रह्मचारिणा। उत्सर्जनं च वेदानां
मुपाकरणकर्म्म च। अकृत्वा वेदजप्येन फलं नाप्नोति मानवः। सर्वथा लोपे तु कृच्छ्रं उपवासश्च। वेदोदितानां नित्यानामिति म
नुना ऽभोजनोक्तेः। एवमुत्सर्गो ऽपि। अथ प्रसंगादत्रैवोत्सर्जनमुच्यते। तच्च पौषमासे रोहिण्यां तत्कृत्स्नाष्टम्यां वा कार्य्यम्।
पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलान्ते छंदसां कुर्यादुत्सर्गं विधिवद्बहिरिति याज्ञवल्क्योक्तेः। श्रावण्यां
प्रौष्ठपद्यां वोपाकृतेः क्रमेण पौषशुक्लप्रतिपदि माघशुक्लप्रतिपदि वा कार्य्यम्। अर्द्धपंचमासानधीयीतेति तेनैवोक्तेः।
अर्द्धः पंचमो येषु मासेषु ते चतुरर्द्धस्यर्थः। वृद्धहारीतः। अर्द्धमान्मासानधीत्योर्ध्वं समुत्सृजेत्। पंचार्द्धषष्ठानित्येतत् तदा पा
द्युपाकर्मविषयं। बोधायनस्तु। पौष्यां माघ्यां वा कुर्युः। पौष्यां माघ्यां वोत्सृजेत् इति तन्नत्योक्तम्। तैत्तिरीयैस्तु तैष्यां कार्य्यं।
तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदिति तत्सूत्रात्। तावत्कृच्छ्रेण माघ्यां कार्य्यं। अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीय
त इति कारिकोक्तेः। कात्यायनस्तु। भाद्रपदे कुर्युः। उत्सर्गश्च तदा तिष्यति ध्या प्रौष्ठपदे विवेति कात्यायनोक्तेः। सामगास्तु।
सिंहार्के पुष्ये कुर्युः। तथा च सिंहे रवौ त्विति गार्ग्यवचने इत्येवमुक्तं। सर्वे रूपाकर्मदिने वा कार्य्यं। पुष्ये तूत्सर्जनं कुर्यात् दु

पाकर्मदिने यद्वेति हेमाद्रौ खादिरगृह्योक्तेः ॥ यदा सिंहस्थे सूर्ये सति तन्मध्ये हस्तनक्षत्रात्प्राक् पुष्पः कर्कस्थो
भवति तदा तस्मिन्पुष्ये उत्सर्गं कृत्वा तदुत्तरं हस्ते उपाकर्म सामगाः कुर्युः ॥ मासे प्रौष्ठपदे हस्तात् पुष्यः पूर्वो भवेद्यदा त
दा च श्रावणे कुर्यादुत्सर्गं छन्दसां द्विज इति तैत्तिरीयपरिशिष्टोक्तेः ॥ अत्र श्रावणोपि सौरो मासो ज्ञेयो तेषां सौरस्यैवोक्तेः ॥ अत्र
विशेषमाह कार्ष्णाजिनिः ॥ उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च । ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः ॥ उपा
कर्म्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रं वानध्याय इति मिताक्षरायामुक्तं ॥ अत्र नदीनां रजोदोषो नास्ति ॥ उपाकर्म्म
णि चोत्सर्गे रजोदोषो न विद्यते ॥ इति गार्ग्योक्तेः ॥ अत्रैव रक्षाबंधनमुक्तं हेमाद्रौ भविष्ये ॥ संप्राप्ते श्रावणस्यान्ते पौर्ण
मास्यां दिनोदये । स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः ॥ उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणं ॥ उपाकर्मणि
कर्त्तव्यमृषीणां चैव पूजनं ॥ ततोऽपराह्णसमये रक्षापोट्टलिकां शुभां । कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैरिति ॥
अतोपाकर्मानंतर्यस्य पूर्णतिथ्या वार्षिकस्यानुवादेन तु विधिगौरवात् प्रयोगविधिभेदेन क्रमायोगात् शूद्रादीनद
योगाच्च तेन परेद्युरुपाकरणेपि पूर्वेद्युरपराह्ने तत्करणं सिद्धं ॥ इदं भद्रायां न कार्यं ॥ भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गु
नी तथा ॥ श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनीति संग्रहोक्तेः ॥ तत्सत्वे तु रात्रावपि तदंते कुर्यादिति निर्णयामृते ॥ मं

त्रस्तु। येन बद्धो बली राजा दानवेंद्रो महाबलः। तेन त्वामभिबध्नामि रक्षे मा चल मा चल। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च
मानवैः। कर्तव्यो रक्षिकाचारो द्विजान्संपूज्य शक्तित इति। अत्रैव हयग्रीवोत्पत्तिः। तदुक्तं कल्पतरौ। श्रावण्यां श्रवणे
जातः पूर्वं हयशिरा हरिः। जगाद सामवेदं तु सर्वकल्मषनाशनं। स्नात्वा संपूजयेत्तं तु शंखचक्रगदाधरं। आश्वला
यनेन श्रवणाकर्मोक्तं श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति। तत्रास्तमययोगिनी ग्राह्या। अस्तमिते स्थालीपाकं श्र
पयित्वा इति सूत्रात्। अत एव निशीथे दर्शसंयोगात्। प्रातर्नियमात्तदंगैः प्रसंगसिद्धिरुक्ता द्वादशे। अन्यथापरे
द्युः प्राप्तोक्तः प्रसंगः प्रसंगस्यापाक्षिकत्वात्पौर्णमादर्शेष्ट्योः प्रणष्टाः पर्वति तेन गणवद्धोरन्वाचितत्वात्तत्रैव कर्म
कालव्याप्तिर्ग्राह्येति विकृतित्वात् एषपर्वेच्छन्ति। श्रवणादिमासचतुष्टय कृष्णपक्षद्वितीयासु अशून्यशयनव्रतम्।
तत्र चंद्रोदयव्यापिनी। दिनद्वये तत्त्वे परेति निर्णयामृते। । इति श्रीनिर्णयसिंधौ मीमांसकरामकृष्णभट्टात्मज
कमलाकरभट्टकृते श्रावणमासः॥ ॥ सिंहे परः षोडश घटिकाः पुण्यकालः। अन्यत्पूर्ववत्। अत्र गोप्रसवे अद्भु
तसागरे नारदः। भानौ सिंहगते चैव यस्य गौः संप्रसूयते। मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः। तत्र शांतिं प्रवक्ष्या रामः
मि येन संपद्यते शुभम्। प्रसूतां तां तत्क्षणाद्देवतागां विप्राय दापयेत्। ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः। आज

तीनोघृताक्तानामयुतंजुहुयात्ततः।व्याहृतिभिश्चायंहोमःसोपवासःप्रयत्नेनदद्याद्द्विजायदक्षिणामिति।तथा·
सिंहराशिगतेसूर्येगोप्रसूतिर्यदाभवेत्।पौषेचमहिषीसूतेदिवेवाश्वतरीतथा।तदानिष्टंभवेत्किंचित्तच्छांत्यै
शांतिकंचरेत्।अस्यवामेतिसूक्तेनतद्विष्णोरितिमंत्रतः।जुहुयाच्चतिलाज्येनघृतमष्टोत्तरंअधिकमूलमंत्रेणजुहुयाद्वि
धानेनजुहुयाच्चतथाश्रुतम्।श्रीसूक्तेनततःस्नायाच्छांतिसूक्तेनवापुनः।मध्यरात्रेनिशीथेवायदागौःक्रंदतेत
दा।ग्रामेवास्वगृहेवापिशांतिकंसर्वेवृद्दिशेत्।एवंश्वावलोवडवाप्रसवोदिवानिशिपिंडः।तदुक्तमथर्ववेदेदिनांगार्ग्येप
रिशिष्टे।माघेबुधेचमहिषीश्रावणेवडवादिवा।सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायकाइति।अत्रतदुक्तामृता
ख्याशांतिःकार्या। ।भाद्रकृष्णतृतीयाकज्जलीसंज्ञा।सापराह्णव्याप्तेतिदिवोदासीयेउक्तम्। ।भाद्रकृष्णचतु
र्थीबहुलाख्यामध्यदेशेप्रसिद्धा।सापराह्णव्यापिनीग्राह्यादिनद्वयेतत्वेपूर्वा।गौर्यथाश्चतुर्थीवद्धेनुपूजाद्युगा
चेनंदुर्भरहोलिकेच।वत्सस्यपूजाशिवस्तत्रैरेताःपरान्विताःग्राह्याइतिन्यसरहस्यमितिदिवोदासीयेवचनात्।अत्र
वत्सपूजायाःपृथगुपादानात्तुपूजाशब्देनबहुलाख्यायोगइष्यतेइतिसएवव्याचख्यौ।मदनरत्नेप्येवम्।अत्रगोरस
जोयवान्नाशनंचतत्रैवोक्तम्। ।भाद्रकृष्णषष्ठीहलषष्ठीसासप्तमीयुतेतिदिवोदासः। ।भाद्रकृष्णसप्तम्यांश्री

तल्लाव्रतं तत्र सर्वोपयोगि इति हेमाद्रिः ॥ ॥ अथ जन्माष्टमी । सा च कृष्णादिमासेन भाद्रपदकृष्णाष्टमी । तथा भाद्रपदे मासि कृष्णा-
३० ष्टम्यां कलौ युगे । अष्टाविंशतिमे जातः कृष्णोसौ देवकीसुत इति कल्पतरौ ब्रह्मपुराणोक्तेः । अत्रेदं माधवमतम् । अष्टमी द्वेधा । ज-
न्माष्टमी जयंती चेति । तत्राद्या केवलाष्टमी । येन कुर्वंति जानंतः कृष्णजन्माष्टमीव्रतम् । ते भवंति नराः प्राज्ञ व्याला व्याघ्राश्च
कानने । इति स्कांदात् । दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला । विमुक्तौ न कुर्वीत विशेषेणेंदुसंयुताम् इति पुराणांत-
रात् । श्रावणे वहुले पक्षे कृष्णजन्माष्टमीव्रतम् । न करोति नरो यस्तु भवति क्रूरराक्षसः इति भविष्योक्तेश्च । केवलाष्टम्या-
एवोपोष्यत्वावगतेः । सैव रोहिणीयुक्ता जयंती । कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि । जयंती नाम सा प्रोक्ता उपोष्या सा
प्रयत्नत इति वह्निपुराणात् । अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता । भवेत्प्रौष्ठपदे मासि जयंती नाम सा स्मृतेति वि-
ष्णुरहस्यादिवचनाच्च । ज्योतिरादिवत्सरूपाकर्मभेदः । रोहिणीयोगस्त्वहोरात्रमुख्यः । निशीथे स त्व मध्यमः । दिवसा
दावधमः । अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि । मुहूर्तमप्यहोरात्रे योगश्चेत्तमुपोषयेदिति वसिष्ठसंहितोक्तेः । राम:
अर्द्धरात्रे तु योगोयं तारापत्युदये सति । नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेदिति विष्णुधर्मोक्तेः । वासरे वा निशायां
वा यत्र स्वल्पापि रोहिणी । विशेषेण नभोमासे सैवोपोष्या मनीषिभिरिति पुराणांतराच्च । विशेषेणेति श्रुते भाद्रपदेपीदं

।श्रावणे वा नभस्ये वेति वक्ष्यमाणत्वात्।गौडास्तु।निशीथ एव रोहिणीयोगो जयंती नान्यथेत्याहुः।तन्न।वासरे वा निशायां वे
ति विरोधात्।योगविशेषात्गुणफलमित्यन्ये।तेष्वकरणे दोषश्रुतेरुपेक्ष्याः।तत्र जन्माष्टमीव्रतं नित्यं।पूर्वोक्तवचनेष्वक
करणे निंदाश्रुतेः।वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम्।न करोति महाप्राज्ञ व्याली भवति कानने।इति स्कांदे दोषश्रु
श्रुतेश्च।न करोति नरो यस्त्विति पुंस्त्वमुक्तेरत्र स्त्रीलिंगमतंत्रम्।मदनरत्ने स्कांदे तत्र फलमप्युक्तम्।जन्माष्टमीव्रतं
ये वै कुर्वंति नरोत्तमाः।कारयंत्यथवा लोका लक्ष्मीस्तेषां सदा स्थिरा।सिध्यंति सर्वकार्याणि कृते जन्माष्टमीव्रत इति।
जयंतीव्रतं तु नित्यं काम्यं।महाजयार्थं कुरु तां जयंतीं मुक्तयेनघ।धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव।ददाति वांछि
तानर्थान्ये चान्येप्यतिदुर्लभा इति स्कांदादौ फलश्रुतेः।शूद्रान्नेन तु यत्पापं शवहस्तस्य भोजने।तत्पापं लभते कुंति
जयंतीविमुखो नरः।न करोति यदा विष्णोर्जयंतीसंभवं व्रतं।यमस्य व्रतमापन्नः सहते नारकीं व्यथाम्।इत्यकरणे नि
दाश्रुतेश्च।यदा पूर्वेद्युः परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयंत्यामंतर्भूतेति ज्ञेया।न तु जन्माष्टमीव्रतं पृथक्कार्यं
विष्णुशृंखलवत्।तदुक्तं माधवेन।यस्मिन्वर्षे जयंत्याख्यो योगो जन्माष्टमी तदा।अंतर्भूता जयंत्यां स्यादाहुर्योगप्र
शस्तितः इति।मदनरत्ने निर्णयामृते गौडमैथिलमतेप्येवं।केचित्तु रोहिणीसंयुतोपोष्या सर्वाघौघविनाशिनी।ग्रहे

रात्रादधश्चोर्द्धकलमात्रा यदा भवेत्। जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी। अग्निपुराणादर्द्धरात्र एव रोहिणीयोगस्य प्रा
3। शस्त्यात्। मुहूर्त्तमपि लभ्येतेत्यादीनां चार्द्धरात्रयोगेप्युपपत्तेर्न जयंतीव्रतेभिन्नमित्याहुः। तत्वे तु हेमाद्रिमते जयंतीव्र
तं भिन्नमेव। उदये चाष्टमी त्यक्ता तेन जयंतीपरत्वोक्तेः। किं चा रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं
शौरेर्हंति पापं त्रिजन्मजमिति विष्णुधर्मोक्तेः। समायोगे तु रोहिण्या निशीथे राजसत्तम। समजायत गोविंदो बालरू
पी चतुर्भुजः। तस्मात्तं पूजयेत्तत्र यथा वित्तानुरूपतः इति वह्निपुराणाच्चार्द्धरात्रस्य कर्मकालत्वमवसीयते अतः क
र्मणो यस्य यः कालः इत्यादिवचनात्पूर्वेद्युरेव प्राप्तेः। परदिने सतोपि रोहिणीयोगस्य न प्रयोजकत्वं। अन्यथा बुधवास
रादेरपि तत्प्राप्तेः। किं चा जयंतीशब्दो रात्रिविशेषवचनः। अभिजिन्नाम नक्षत्रं जयंती नाम शर्वरी। मुहूर्त्तो विज
यो नाम यत्र जातो जनार्दनः इति हेमाद्रौ ब्रह्माण्डपुराणात्। तेन न तद्योगे रोहिण्या योगेन त्वान्न व्रतभेदः। यत्तु। वास
रे वा निशायां वेति तल्लैकमुक्तिकन्यायेन निशीथयोगस्यैव स्तुत्यर्थं पूर्वदिनेऽर्द्धरात्रयोगाभावे वा प्राशस्त्यार्थमि एमः
त्याहुः। अन्ये तु यद्यपि दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला। रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुतामित्य
नेन रोहिणीयोगाभावेऽर्द्धरात्रव्याप्तेर्ग्राह्यतोक्तेः तथापि यस्मिन्वर्षे जयंतीयोगो नास्ति तत्र जयंतीव्रतलोपप्राप्तेः

3।

ष्टमीमात्रेपिजयंतीव्रतंकार्य्यमित्येवपरमिदमितितदाशयः।अत्रहिसत्यायामृक्षे विश्वजितायजेत।एषामसंभवे
कुर्यादिष्टिंवैश्वानरींद्विजइतिवचोरोहिणीयोगाभावेविधानात्तत्कार्य्यप्रतीतिःस्पष्टैव।अतएवोक्तंजयंतीनामशर्वरी(
ति।यत्तुस्कांदे।उदयेचाष्टमीकिंचिन्नवमीसकलायदि।भवेतबुधसंयुक्ताप्राजापत्यर्क्षसंयुता।अपिवर्षशतेनापि
लभ्यतेवाथवानवेति।यच्चपाद्मे।प्रेतयोनिंगतानांतुप्रेतत्वंनाशितंतुतैः।यैःकृताश्रावणेमासिअष्टमीरोहिणीयुता।
किंपुनर्बुधवारेणसोमेनापिविशेषतः।किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेति।तद्दानादिविषयम्।उपवासाश्र
वणाद्विसर्जनंतमदृः।जयंतीपरमितिहेमाद्रिः।उदयेचंद्रोदयेइतिकेचित्।तन्न।चंद्रोदयसत्त्वेऽसंदेहान्नवमीसक
लेत्यस्ययोगान्मानाभावाच्च।तेनसर्वेष्वपुःसप्तमीविद्धपरदिनेसूर्योदयेघटिकापिग्राह्या।सर्वविद्धाष्टमीतिपाद्मोक्तेरि(
त्युक्तं।अतोनव्रतभेदोनाप्यंतर्भावइत्यूचुः।गौडास्तु।नवमीस्थपरमिदंवचनम्।नवमीसकलायदीतिविशेषोक्तेः।
एतत्सर्वंदिनेजयंत्यभावपरमित्याऊः।जयंत्याःक्षिसर्वापवादोयमित्याचार्यचूडामण्यादयः।वयंतुसतंव्रतभेदः।लोका
स्तुजन्माष्टमीमेवानुतिष्ठंति।नहिश्रावणेवानभस्येवारोहिणीसहिताष्टमी।यदाकृष्णानरैर्लब्धासाजयंतीतिकी(
र्तिता।श्रावणेनभवेद्योगोनभस्येतुभवेद्ध्रुवमितिमाधवीयेवसिष्ठसंहितोक्तापिभाद्रेजयंतीकेनापिक्रियते।यद्यपि

णात् फलं । सत्रमेव व्रतस्य कर्त्तुः सकाममुपनयेदिति वदिष्यन्ते । तन्न । नित्यत्वानुपपत्तेः । अत्र गौणमुख्यचोदनाभ्यामेक एव मासदृत्सन्ये । तन्न ।
32 एकवाक्ये उभयनिर्देशो वा शब्दद्वयायोगात् । अतो जयन्तीव्रतस्यापि नित्यत्वादुपवासद्वयं कार्य्यमिति ब्रूमः । अत एव हेमाद्रिमदनर
त्नादौ जन्माष्टमीव्रते जयन्तीव्रतं च भिन्नमुक्तम् । भिन्नकालत्वात् सर्वथा नावदं तर्भावो नेति सिद्धम् । यद्यपि पूर्वापरवाक्याधिरो
हिण्यां पुनैव कार्य्येति ग्रन्थानां नत्वं प्रतीयते । तदपि जयन्तीपरमेव । इदं च काम्यमेवेत्यनेन भट्टैः । तद्दूषणं हेमाद्रौ ज्ञेयं । नित्य
काम्यमिति तु बहवः । न तु यथा विष्णुशृङ्खलयोगेन श्रवणद्वादशी वामनजयन्त्यादि सर्वैः सिद्धिर्यथा वैकादशीत्वलापिव
रा । तथा । कलाकाष्ठामुहूर्त्तोऽपि यदा कृष्णाष्टमी तिथिः । नवम्यां सैव ग्राह्या स्यात् सप्तमीसंयुता न हीत्यादिवचनाद्वेधे यादि
वद्योगाधिक्ये फलाधिक्यात्परैव । जन्माष्टमीयुक्तेति चेत् वार्त्तमात्रं । न हि तत्र भेदो द्वयोर्नित्यत्वं द्वयोरकरणे दोषा
वाप्तेः । इह त्वेते स्त्रिभिर्हेतुभिः संज्ञाभेदाद्धर्मभेदात् फलभेदाच्चोपवासभेदः स्पष्ट एव । एकदेवतात्वात् श्रवणद्वादशीव
त्पारणालोपदोषोऽपि । तेन व्रतद्वयमेव युक्तम् । द्वयोरपि नित्यत्वात् । केचित्तु त्रेतायां द्वापरे चैव राजन् कृतयुगे तथा । रो रामः
हिणीसहिता चेयं विद्वद्भिः समुपोषिता । अतः परं महीपाल संप्राप्ते तामसे कलौ । जन्मनो वासुदेवस्य भविता व्रतमुत्तमम् इ
ति हेमाद्रौ वह्निपुराणात् कलौ जन्माष्टमीव्रतमेव न जयन्तीव्रतमित्याहुः । तन्न । तामसे कलाविति उक्तेः । परमश्रेयो हेतोरस्य

कलौ पापिनां दुःखमत्वमुच्यते। तेन कलौ तामसानेकरिष्यंति किंतु धन्या एवेत्यर्थः। अन्यथा भ्रष्टाश्च ब्राह्मणाचार
मविष्यंति कलौ युगे इत्यादौ विधिकल्पनापत्तेः। अननिशीथवेधए व्याख्यः पूर्वोक्तवचने ष्टुतस्यैवमुख्यकालोक्तेः॥
अष्टमी शिवरात्रिश्च अर्द्धरात्राद्धो यदि। दृश्यते घटिकाप्यासा पूर्वविद्धा प्रकीर्तितेति माधवीये पुराणांतरात्। अर्द्धरा
त्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति भविष्योक्तेः। अष्टमी रोहिणीयुक्ता
निश्यर्द्धे दृश्यते यदि। मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयमिति वसिष्ठसंहितोक्तेश्च। तत्राष्टमी द्विधा रोहिणी
रहिता तद्युता च। आद्यापि चतुर्द्धा। पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेवोभयेद्युरनुभयेद्युश्चेति। तत्राद्ययोरसंदेह
एव। कर्मकालव्याप्तेः। जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या तिथिभांते च पारणमिति भ
गृह्योक्तेश्च। अस्मात्केवलरोहिण्युपवासोपि सिद्धः। अंत्ययोः परैव। प्रातः संकल्पकालव्याप्तेराधिक्यात्। वर्जनीया प्रयत्न
त्नेन सप्तमीसंयुताष्टमीति ब्रह्मवैवर्ताच्च। एवं प्रातः समव्याप्तावा विषमव्याप्तौ त्वाधिक्येन निर्णयः। रोहिणीयुता
पि चतुर्धा पूर्वेद्युरेव निशीथे रोहिणीयुता परेद्युरेवोभयेद्युरनुभयेद्युश्च। अत्राप्याद्ययोरसंदेहः। कार्या विद्धापि
सप्तम्या रोहिणीसहिताष्टमी तिथ्याद्योक्तेः। जयंत्यां पूर्वविद्धायामुपवासं समाचरेदिति गारुडात्। सप्तमीसंयुता

ष्टम्यां निशीथे रोहिणी यदि भविता साष्टमी पुराणपाया वच्चेन्द्र दिवाकराविति वह्निपुराणाच्च । द्वितीये तु संदेह एवात तती(
३३ यपक्षे परैव । वर्ज्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी परेह्नि सत्त्वे तापि न कर्त्तव्या सप्तमीसंयुताष्टमीति ब्रह्मवैवर्त्ता(
त् । चतुर्थपक्षे द्वेधा । पूर्वेद्युर्निशीथेष्टमी परेह्नि रोहिणी परेद्युरष्टमी पूर्वेह्नि रोहिणी । उभयेद्युरुभयस्य निशी(
थासंबंधो वेति । आद्ये परेद्युर्जयंतीयोगस्य सत्त्वात्परैवेति माधवः । तदुक्तं तेनैव । यस्मिन्वर्षे जयंत्याख्यो योगो ज(
न्माष्टमी तदा । अंतर्भूता जयंत्यां स्यादृक्षयोगप्रशस्तितः इति । पूर्वविद्धाष्टमी या तु उदये नवमीदिने । मुहूर्त्तमपि सं(
युक्ता संपूर्णा साष्टमी भवेत् । कलाकाष्ठामुहूर्त्तापि यदा कृष्णाष्टमी तिथिः । नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता
नहीति पाद्मोक्तेश्च । केचित्तु हेमाद्र्यादयः ष्टम्याः प्राधान्यात्तस्याश्च पूर्वेद्युः कर्मकालव्यापित्वात्पूर्वैव । पाद्मवचनं
तु पूर्वेह्नि निशीथेष्टम्यभावे ज्ञेयं । अत एवाह्निस्तु मूर्ध्वे धश्रणमात्रमित्याहुः । अन्ये तु पूर्वविद्धाष्टमीति वाक्ये ज(
न्माष्टम्यास्तूदये सप्तमीवेधनिषेधात् । कलाघटिकामात्रापि उदयिकी ग्राह्या । कार्या विद्धापि सप्तमी जयंती परं ।
जयंत्यां पूर्वविद्धायामुपवासं समाचरेदिति सेकवाक्यत्वात् । तत्रापि द्वयोर्निशीथसत्त्वात्कालभेदाद्वोपवासद्वयं भवत्येव
। यदा तु केवलाष्टमी शुद्धाधिका तदा त्यागहेतोः सप्तमीवेधस्याभावात्पूर्वैव । यदि दिवा विद्धन्यूना तदा परदिने ग्राह्या(

राम:

३३

तिथेरभावात्सूर्द्वैवा। एवं सर्वाण्योदयिकवाक्यानि सप्तमीवेधपराणि। पितुर्जन्माष्टमी पूर्वविद्धा सऋक्षा सकलामपि॥
विहाय नवमीं शुद्धामुपोष्य व्रतमाचरेदिति व्यासोक्ते विधवाक्याः सप्तम्युक्तनवम्यामुपवासः। दशमीवेधे त्वाद्यस्तुपवार
सवदित्याज्ञः। तेनिर्मूलत्वादुपेक्ष्याः। मुहूर्त्तमपि संयुक्ते तिरोहिणीयोगे एवत्याज्यत्वोक्तेः। तिथ्यंते पारणाकार
क्यानां निर्विषयत्वापत्तेः। न च जयंतीपराणि शुद्धाधिकपराणि वा तानि मध्यगवाद्येः पूर्वविद्धाष्टम्यामपि तिथ्यं
ते पारणोक्तेः। तेन कलाकाष्टेति वाक्यांतरवशाज्जयंतीपरमेतत्। तातत्वंतु अष्टम्याः कर्मकालव्याप्तेर्दिवा वा यदि
वा रात्रौ नास्ति चेद्रोहिणी कला। रात्रियुक्तां प्रकुर्वीतेति पूर्ववाक्ये रोहिणीयोगाभावेप्याद्यत्वोक्तेर्वचनात् कर्मका
लव्यापिनीत्वस्य पूर्वापरा वा व्यापि रोहिणीयुता जयंत्यां ग्राह्या। माधवमदनरत्ननिर्णयामृतानंतभट्टगौडमै
थिलग्रंथादिष्वप्येवमिति। युक्ते तु उपवासद्वयं कार्यं। द्वयोर्नित्यत्वादितिवयम्। अग्रे त्वेषोः परेवा। सप्तमीसंयुताष्ट
म्यां भूत्वा ऋक्षं द्विजोत्तम। प्राजापत्यं द्वितीये हि मुहूर्तेऽपि भवेद्यदि। तदाष्टम्यामिकं पुण्यं प्रोक्तं व्यासादिभिः पुरेति
स्कांदोक्ता। मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत्। किंपुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पाद्माच्चेति दि
क्। निर्वादित्योपासकानां तु। जन्माष्टमी रामनवमी शिवरात्र्यादौ पूर्वैव हि कर्मकालीना तिथिः स्यात्। द्वित्रिमुहूर्त्ता परैव॥

तिथिर्ग्राह्या। उदयव्यापिनी ग्राह्या कुलेतिथिरुपोषणे। निंबार्को भगवान्येषां वांछितार्थफलप्रदः इति। हेमाद्रौ मात्स्ये।
3५ कृत्तमुक्तिसप्तमीव्रते भाविष्योक्ते रित्याऊः। तन्न। यदि द्वितीये दिवसे तु कृत्तिका तिथिर्युज्येत स्यान्न तदोपवासः। पूर्वेद्युकु
र्यात् द्वितीये दिने शमक्तोयत तदा व्रताद्यमिति मात्स्यवाक्ये न तत्रैवोपसंहारात्। सर्वार्थत्वे मानाभावात्। कृत्त
[illegible] तिथ्योर्हस्तसप्तम्योः। अन्यथा ऋषिपंचम्यादौ तदापत्तिः। (शिष्टा)चारान्नेति चेन्न तस्य न्यायस्य बाधेऽविरोधे
हेयत्वात्। इदानीं क्वापि निंबार्कोपासनाभावाच्चेति संक्षेपः। पारणं तु। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं। तस्मा
त्प्रयत्नेतः कुर्यात्तिथिभांते तु पारणमिति ब्रह्मवैवर्त्तात्। तिथ्यन्ते योर्यदा छेदे न तत्रांतमथापि वा। अर्द्धरात्रे यदा
कुर्यात्पारणं त्वपरेहनीति हेमाद्रौ वचनाच्चार्द्धरात्रेप्युभयांते अन्यतरांते वेति मुख्यः पक्षः। सर्वेषूपवासेषु दिवापार
णमिष्यत इति ब्रह्मवैवर्त्ते तन्न विषयं। दिने मुख्यकालालाभेऽन्यतरांते वा रात्रेपि गोऽप्यस्तु। [illegible] न
रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्। तत्र निशि पूजितं कुर्यात् वर्जयित्वा महानिशामिति ब्रह्म[illegible] ड
पुराणाद्रात्रौ सार्द्धप्रहरमध्ये कार्यं। महानिशा तु विज्ञेया मध्यमं मध्ययामयोः। तथा। मध्यमप्रहरमात्रे वि
ज्ञेयातु महानिशेति स्मृत्यंतरात्। कल्पतरौ मदनरत्ने चैवं। कामधेनौ गार्ग्येस्तु महानिशा तु विज्ञेया मध्यमं प्रह

रद्धपमित्याह। वृद्धशातातपस्तु महानिशा द्वे घटिके रात्रौ मध्यमयामयोरित्याह। वेदपाठपरमेतदित्यन्ये। महानि-
शायामन्यतरांते त्वतीयदिने पारणं। अपरेह्णीति पारणोत्तरदिनपरत्वात्। जयंत्यामुभयांतापेक्षणं दिना ऊर्ध्वं तत्त्वे-
तु महानिशातो वीगन्यतरांतलाभे महानिशानिषेधः। महानिशायामेव लाभे तत्रैव पारणमिति सर्वं चेदं जयंतीपरं स-
योगस्यापोष्यत्वात्। जन्माष्टम्यां तिथ्यंतमात्रे पारणं। अशक्तौ तु वह्निपुराणे। भांते कुर्यात्तिथेर्वापि शस्तं भारत पारण-
मिति। गारुडे विष्णुधर्मे च। जयंत्यां पूर्वविद्धायामुपवासं समाचरेत्। तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणमिति। अ-
शक्तौ तु तिथ्यंते तिथिभांते वा पारणं यत्रेनोदितं। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं। स एवोत्सवांतः। तिथ्यंते-
वोत्सवांते वा व्रती कुर्वीत पारणमिति कालादर्शोक्तेश्चेति संक्षेपः। अष्टम्यां विशेषो हेमाद्रौ भविष्ये। ततोष्टम्यां तिलैः
स्नातो नद्यादौ विमले जले। सुदेशे शोभने कुर्याद्देवक्याः सूतिकागृहं। तन्मध्ये प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृ-
ता। कांचनी राजती ताम्री पैत्तली मृन्मयी तथा। वार्क्षी मणिमयी चैव वर्णकैर्लिखितापि वा। सर्वलक्षणसंपूर्णा प-
र्यंके च पटावृते। देवकीं तत्र चैकस्मिन्प्रदेशे सूतिकागृहे। प्रसुतां च प्रसूतां च स्थापयेन्मंजकोपरि। तत्र बालकं सु-
प्तं पर्यंके स्तनपायिनीं। यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे। तद्वच्च कल्पयेत्पार्श्वे प्रसूतवरकन्यकां। कश्यपो

35 वसुदेवोयमस्थितिश्चैवदेवकी। शेषोवैबलभद्रोयंयशोदादितिरन्वभूत्। नंदःप्रजापतिर्दक्षोगर्गश्चापिचतुर्मुखः। गोधेनुः
कुंजरश्चैवदानवाःशस्त्रपाणयः। लेखनीयाश्चतत्रैवकालियोयमुनाह्रदे। इत्येवमादियत्किंचिच्छक्यंतेचरितेमम॥
लेखयित्वाप्रयत्नेनपूजयेद्भक्तितत्परः। मंत्रेणानेनकौंतेयदेवकींपूजयेन्नरः। गायद्भिःकिन्नराद्यैःसततपरिवृ
तावेणुवीणानिनादैःशृंगारादर्शकुंभप्रवरकृतकरैःकिंकरैःसेव्यमाना। पर्यंकेस्वास्तृतेयामुदिततरमुखीपुत्रि
णीसम्यगास्तेसादेवीदेवमाताजयतिसुतनयादेवकीकांतरूपा। पादौसंवाहयंतीश्रीर्देवक्याश्चरणांतिके। निषण्णा
पंकजेपूज्यानमोदेव्यैश्रियैइति। शंखतोयंसमादायसपुष्पकुशचंदनं। जानुभ्यांधरणींगत्वाचंद्रायार्घंनिवेद
येत्। अर्द्धरात्रेवसोर्धारेपातयेद्गुडसर्पिषा। नाडीवर्द्धापनंषष्ठीनामादेःकरणंमम। ततोमंत्रेणवैदद्याच्चंद्राया
र्घ्यंसमाहितः। क्षीरोदार्णवसंभूतअत्रिनेत्रसमुद्भव। गृहाणार्घ्यंशशांकेमंरोहिण्यासहितोमम। ज्योत्स्नापत
तेनमस्तुभ्यंनमस्तेज्योतिषांपते। नमस्तेरोहिणीकांतअर्घ्यंनःप्रतिगृह्यतां। यथापुत्रंहरिंलब्ध्वाप्राप्तात्वंनिर्वृ एमः
तिंपरां। तामेवनिर्वृतिंदेहिसुपुत्रंदर्शयस्वमे। इतिदेवक्यर्घ्यः। ततःपुष्पांजलिंदत्वायामेयामेप्रपूजयेत्। प्रभा
तेब्राह्मणान्शक्त्याभोजयेद्भक्तिमान्नरः। ॐनमोवासुदेवायगोब्राह्मणहितायच। शांतिरस्तुशिवंचास्तुइत्युक्त्वा

मोविसर्जयेत्॥ इदं प्रतिमासं कृष्णाष्टम्यामप्युक्तं मदनरत्ने वह्निपुराणे॥ प्रतिमासं च ते कृष्णाष्टम्यां यः करिष्यर
ति मम चैवाखिलान्कामान्स संप्राप्स्यत्यसंशयं॥ तथा॥ अनेन विधिना यस्तु प्रतिमासं नरेश्वर॥ करोति वत्सरं कृ
ष्णे यावदागमनं हरेः॥ दद्याच्छय्यां ससंकृष्णो गोमीरतत्तैरलंकृतां॥ इति जन्माष्टमीव्रतम्॥ ॥ ॥ ॥ ॥
भाद्रमावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः॥ अयातयामास्ते दर्भा
विनियोज्याः पुनः पुनः॥ नभाः श्रावणः॥ तेन दर्शान्तमासे जन्माष्टम्यनंतरदर्शो लभ्यते॥ मदनरत्ने तु॥ मासे नभस्य
मावास्या तस्यां दर्भोच्चयो मत इति मरीचिवाक्यमुक्तं॥ नभस्यो भाद्रपदः॥ तेन महालयांतर्गतदर्शो लभ्यते॥ गोर
१८ णमुख्यचांद्राभ्यामेकएव दर्श इत्यन्ये॥ ॥ भाद्रशुक्लतृतीयायां हरितालिकाव्रतम्॥ तत्र परा ग्राह्या॥ मुहूर्त
मात्रसत्वेपि दिने गौरीव्रते परा॥ शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति माधवोक्तेः॥ आयायां मधुश्राव
णिका कज्जली हरितालिका॥ चतुर्थीमिश्रिता स्त्रीभिर्दिवा नक्तं विधीयते॥ तृतीया नभसः शुक्ला मधुश्रावणि
का स्मृता॥ भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिकेति दिवोदासोदाहृतवचनाच्च॥ भाद्रशुक्लचतुर्थ्यां सिद्धि
विनायकव्रतम्॥ तत्र मध्याह्नव्यापिनी ग्राह्या॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप इति हेमाद्रौ भविष्योत्तर

36 दैवज्ञोक्तेः। मदनरत्नेऽप्येवं। परदिने एकदेशेन साकल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षे पूर्वैव ग्राह्या। तथा च बृहस्पतिः। च-
तुर्थी गणनाथस्य मातृविद्धा प्रशस्यते। मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनीति। मातृविद्धा प्रशस्ता स्याच्चतुर्थी
गणनायके। मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते। इति माधवीये स्मृत्यन्तराच्च। तत्र गणेशरूपं स्कान्दे। एकदं-
तं शूर्पकर्णं नागयज्ञोपवीतिनं। पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकमिति। इयं रविभौमयोरतिप्रशस्ता।
भाद्रशुक्ले चतुर्थी या भौमेनार्केण वा युता। महती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नर इति निर्णयामृते वाराहोक्तेः॥
अत्र चंद्रदर्शनं निषिद्धम्। तथा चापरार्के मार्कंडेयः। सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चंद्रदर्शनं। मिथ्याभिदूषणं कु-
र्यात्तस्मात्पश्येन्न तं सदेति। चतुर्थ्यां न पश्येदित्यन्वयः। प्रधानक्रियान्वयलाभात्। तेन चतुर्थ्यामुदितस्य पंच-
म्यां न निषेधः। गौडास्त्वेवमाहुः। पराशरोऽपि। कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शनम्। मिथ्याभिदूषणं कु-
र्यात्तस्मात्पश्येन्न तं तदा। तद्दोषशान्तये सिंहः प्रसेनमिति वै पठेत्। इति। श्लोकस्तु विष्णुपुराणे। सिंहः प्रसेनमव- रामः
धीत्सिंहो जांबवता हतः। सुकुमारक मा रोदीस्तव ह्येष स्यमंतक इति। भाद्रशुक्लपंचमी ऋषिपंचमी। सा म-
ध्याह्नव्यापिनी ग्राह्या। पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये हारीतोक्तेः। दिनद्वये तत्त्वे हे

माद्रिमते परा। सिता परयुता स्यात् पंचमीति दीपिकोक्तेः। माधवमते सर्वा। युग्मवाक्यान्निर्णयस्तु युक्तः। ऋषिपंचमी प
ष्ठीयुतेति दिवोदासः। अत्र ऋषीन् प्रतिमासु पूजयित्वाऽकृष्टभूमिजशाकेन वर्त्तनम्। एवं सप्त वर्षाणि कृत्वा सप्त कुं
भेषु प्रतिमाः संपूज्य परेऽह्नि तन्मंत्रेणाष्टोत्तरशतं तिलाहुतीर्हुत्वा सप्त ब्राह्मणान् भोजयेदिति निर्णयामृते। भाद्रशु
क्लषष्ठी सूर्यषष्ठी सा सप्तमीयुतेति दिवोदासः। शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम्। प्राशनं पंचगव्यस्य अश्व
मेधफलाधिकमिति वचनात्। कल्पतरौ भविष्ये। यां भाद्रपदे मासि षष्ठीस्यां भरतर्षभ। योऽस्यां पश्यति गांगेय
न्दं दक्षिणापथवासिनम्। ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः। गांगेयः स्वामिकार्त्तिकेयः। भाद्रशुक्लाष्टमी दूर्वा
ष्टमी सा सर्वा ग्राह्या। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। सर्वे विद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ बृहद्य
मोक्तेः। शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत्। दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयत इति पुराणसमुच्चया
च्चाय यत्तु अनुकृत्तैरे हि एतष्टम्यां सर्वा वा यदि वा परा। दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेदिति तत्रैव परा का
र्य्येत्युक्तम्। तत्सर्वे दिनेऽन्ये ज्येष्ठादियोगे द्रष्टव्यम्। दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता तथा। ऐंद्रर्क्षे श्रजिता
दूर्वा हंति सप्तस्तानि नान्यथा। भर्त्तुरायुर्हरेन्मूले तस्मात्तां परिवर्जयेदिति। तत्रैव तन्निषेधात्। इदमगस्त्योदये। क

37 न्यार्के चैव न कार्य्या। शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी। सिंहार्क एव कर्त्तव्या न कन्यार्के कदाचन। सिंहस्थे सोत्तमा सूर्ये
ऽनुदिते मुनिसत्तमे। इति मदनरत्ने स्कान्दोक्तेः। अगस्त्य उदिते मा तु कन्यायां दग्धतोऽन्यथा। वैधव्यं पुत्रशोकं च दशवर्षा
णि पंच चेति तत्रैव दोषोक्तेश्च। भाद्रशुक्लाष्टम्यामगस्त्योदये भाविनि सति श्रावणशुक्लाष्टम्यामेव कुर्यादिति हेमा
द्रिः। दीपिकाप्येवं। इदं च व्रतं स्त्रीणां नित्यं। या न पूजयते दूर्वां मोहादिह यथाविधि। त्रीणि जन्मानि वैधव्यं ल
भते नात्र संशयः। तस्मात् संपूजनीया सा प्रतिवर्षं वधूजनैरिति पुराणसमुच्चयात्। यदा ज्येष्ठादिकं विनाष्टमी
न लभ्यते। तदा तत्रैवोक्तं। कर्त्तव्या चैकभक्तेन ज्येष्ठामूलं यदा भवेत्। दूर्वामभ्यर्चयेद्भक्त्या न वंध्यं दिवसं नये
दिति। अत्र विधिर्मदनरत्ने भविष्ये। शुचौ देशे प्रजातायां दूर्वायां श्रीफलोत्तम। स्थाप्य लिंगं ततो गंधैः पुष्पैर्दूर्वे
स्समर्चयेत्। दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्त्रिलोचने। दूर्वाष्टमीं यो विधिवत्पूजयेच्छ्रद्धयान्वितः। मंत्रस्तु। त्वं
दूर्वेऽमृतजन्मासि वंदितासि सुरासुरैः। सौभाग्यं संततिं देहि सर्वकार्यकरी भव। यथा शाखाप्रशाखाभिर्विस्तृ राम:
तासि महीतले। तथा ममापि संतानं देहि त्वमजरामरमिति। अत्रानग्निपक्वं भक्षयेत्। अनग्निपक्वमश्नीयाद
न्नं दधि फलं तथा। अक्षारलवणं ब्रह्मन्नष्टम्यां मधुरान्वितमिति तत्रैव भविष्योक्तेः। भाद्रपदेऽधिमासे स

तिनिर्णयदीपे स्कांदे। अधिमासे तु संप्राप्ते नभस्यउदये मुनेः। अर्वाग् पूर्वो व्रतं कार्य्यं परतो नैव कुत्रचित्। अ
त्रैव ज्येष्ठापूजोक्ता माधवीये स्कांदे। मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता। या तिथिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपू
जनमिति। इयं ज्येष्ठा योगवशेन पूर्वापरा वा ग्राह्या। दिनद्वययोगे परा। पूर्वोक्तिरात्रियोगेऽप्येवं। नवम्या सह कार्य्या
स्यादष्टमी नात्र संशयः। मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता। या तिथिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपू
जनमिति तत्रैवोक्तेः। अस्यापवादः। यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः। तस्मिन्नह्नि विधेयं स्याज्जा च
सूनां च पूर्ववासरे। इदं केवलतिथौ नक्षत्रे चोक्तं। तत्राद्यं केवलतिथौ कार्य्यं। अंत्यं केवलर्क्षे। तदुक्तं
मात्स्ये। मत्स्योक्तिके तिथावुक्तं यज्ज्येष्ठादेवतं व्रतं। प्रतिज्येष्ठाव्रतं यच्च विहितं केवलोडुनि। तिथावेवाच
रेदाद्यं द्वितीयं केवलर्क्षे करेत्। अतएव मदनरत्ने भविष्ये नक्षत्रमात्र उक्तं। मासि भाद्रपदे पक्षे शुक्ले
ज्येष्ठा यदा भवेत्। एणो जागरणं कृत्वा एभिर्मंत्रैश्च पूजयेदिति। दाक्षिणात्यास्त्वृक्षे एव कुर्वंति। हेमाद्रौ।
स्कांदे। मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता। यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति।
तथा। मैत्रेण वाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत्। मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति। मैत्रेस्तु। एवं चेहित्वं

38 महाभागे सुरासुरनमस्कृते। ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भवेत्यावाह्य तामग्निवर्णामिति। संपूज्य ज्येष्ठायै ते
नमस्तुभ्यं श्रेष्ठायै ते नमो नमः। शर्वायै ते नमस्तुभ्यं शाकंभर्यै ते नमो नमः। ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्य-
वादिनि। एह्येहि त्वं महाभागे अर्घ्यं गृहाण सरस्वतीत्यर्घ्यः। भाद्रशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कु-
र्यात्। अमाकासितपक्षेष्विति दिवोदासोदाहृतवचनात्। उपोष्यैकादशीं मोहात्पारणं श्रवणे यदि। कु-
रुते हन्ति तत्पुण्यं द्वादशद्वादशीभवमिति तत्रैव स्कांदात्। अस्य तत्रैव प्रतिप्रसवः। मार्कंडेयः। विश्र-
वणमहीपाल श्रवणं वर्द्धते यदि। तिथिक्षयेन भोक्तव्यं द्वादशीं लंघयेन्न हीति। केचित्तु। यदा त्वपरिहा-
र्यो योगस्तदा श्रवणमन्त्यं त्रेधा विभज्य मध्यमविंशतिघटिकायोगं त्यक्त्वा पारणं कार्यं। तदुक्तं विष्णु-
धर्मे। श्रवणमध्ये परिवर्तमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यमिति। केचित्तु। चतुर्धा विभज्य मध्यपाद-
द्वयं वर्ज्यमाहुः। अत्र मूलं चिंत्यं। अत्रैव विष्णुपरिवर्तनोत्सवं कुर्यात्। संध्यायां विष्णुं संपूज्य प्रार्थयेत्। मं- रामः
त्रस्तु [illegible] तिथितत्वे उक्तः। ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव। पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधवेति।
अत्रैव [illegible] ध्वजोत्थापनमुक्तमपरार्के [illegible]। द्वादश्यां तु सिते पक्षे मासि प्रोष्ठपदे तथा। शक्रमुत्थाप-

ये ह्याजन् विष्णुश्रवणे वासवे । इयमेव श्रवणद्वादशी । तत्रैकादश्यां द्वादश्यां श्रवणयोगे सैवोपोष्या । एकाद
शी द्वादशी च वैष्णव्यमपि तत्र चेत् । तद्विष्णुशृंखलं नाम विष्णुसायुज्यकृद्भवेदिति विष्णुधर्मोक्तेः । नारदीये
पि । संस्पृश्यैकादशीं राजन् द्वादशीमपि संस्पृशेत् । श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति । द्वादशी श्रवण
स्पृष्टा स्पृशेदेकादशीं यदि । स एव वैष्णवो योगो विष्णुशृंखलसंज्ञित इति हेमाद्रौ मात्स्योक्तेश्च । दिनद्वये द्वाद
शी श्रवणयोगे पूर्वा । निर्णयामृते तु वत्सरसपर्वादेर्मर्यादा पठितम् । द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदी
ति । तेन हेमाद्रिमते एकादश्याः श्रवणयोगाभावेपि तद्युतद्वादशीयोगमात्रेण विष्णुशृंखलं भवति निर्णयामृ
तमते तु । श्रवणस्यैकादशीद्वादशीभ्यां योगे एव विष्णुशृंखलं नान्यथेति । यदा निशीथानंतरं सूर्योदयावधि वा
कलामात्रमपि श्रवणर्क्षं भवति तदापि पूर्वैव । तदुक्तं तत्रैव नारदीये इमां प्रकृत्य । तिथिनक्षत्रयोर्योगो योगश्चै
व नराधिप । द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिक इति । योगः शिवराज्यादौ विष्कंभयोगादिः । द्वादशी श्रव
णस्पृष्टा कृत्स्ना पुण्यतमा तिथिः । न तु सा तेन संयुक्ता तावत्येव प्रशस्यत इति मदनरत्ने मात्स्याच्च । दिवोदासीये तु
। रात्रेः प्रथमपादे चेच्छ्रवणे हारिवासरे । न दाहवीमुपवसेत्प्रातर्भोते च पारणमित्युक्तं । इदं तु निर्मूलत्वात्पूर्वविरोधा

39 च्चोपेक्ष्यं ॥ इयं तु बुधवारेति प्रशस्ता । बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् । अत्यंतमहती सा स्याद्दत्तं भवति चाक्षयमि
ति हेमाद्रौ स्कांदात् । यानि तु पठंति । उत्तराषाढसंमिश्रा श्रवणमध्याह्नगापि वा । आसुरी सैव नारास्या इति पुलस्त्यपुरा
क्तेः । उदयव्यापिनी ग्राह्या श्रवणद्वादशी संयुता । विद्धर्क्षसंयुता सा चेन्नैवोपोष्या शुभेप्सुभिरित्यादीनि वचनानि
तानि निर्मूलानि । यदपि स्मृत्यर्थसारे । उदयव्यापिनी ग्राह्येत्युक्तं । यच्च बृहन्नारदीये । उदयव्यापिनी ग्राह्या श्रव
णद्वादशी व्रते इति । तद्यदा शुद्धाधिका द्वादशी वरदिने एवोदये श्रवणयोगः पूर्वेद्युश्च तद्भिन्नकाले योगस्तत्परं ।
दिनद्वये उदययोगे पूर्वैव संपूर्णत्वात् । श्रवणद्वादशीव्रतं तु द्वादश्याः श्रवणयुक्ताया अलाभे एकादश्यां श्रव
णयुक्ताया लाभे तत्रैव कार्य्यं । यन्न प्राप्यते ऋक्षं द्वादश्यां वै श्रवणं क्वचित् । एकादशी तदोपोष्या पापघ्नी श्रव
णान्वितेति मदनरत्ने नारदीयोक्तेः । यदा परेव ऋक्षयुता न तु पूर्वा । तत्र पक्षे नोपवासद्वयं कार्य्यं । एकादशीमुपो
ष्यैव द्वादशीं समुपोषयेत् । न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति भविष्योक्तेः । यत्तु विष्णुधर्मे । पारणां
तं व्रतं ज्ञेयं । व्रती नैव विप्रभोजनम् । असमाप्ते व्रते पूर्वं नैव कुर्य्याद्व्रतान्तरमिति तदेतद्भिन्नपरं । अत्र गौडाः । शृ रामः
णु राजन्परं काम्यं श्रवणद्वादशीव्रतमिति स्थूलशीर्षवचनात् । काम्यमेवेदम् । तेनाशक्तस्य नित्यैकादशीव्र

तमेवेतिमन्यंते। द्वादश्यामुपवासेन श्रुद्धात्मा नंतपसर्वेशः। चक्रवर्तित्वमतुलं संप्राप्नोत्यनुलोमियमितितोडवि
वेधेमार्कंडेयोक्तेश्च। दाक्षिणात्यास्तु। एकादश्यां नरो मुक्तो द्वादश्यां समुपोषणात्। व्रतद्वयफलं तेषु लभ्ये सर्वप्राप्नो
त्यसंशयमिति वाराहवामनपुराणोक्तेः। श्रवणद्वादशीव्रतमेवेत्याहुः। भुक्तेतिफलाद्याहारपरं न त्वन्नपरं। अ
न्नाश्रितानि पापानि निर्हृतिनिषेधात्। उपवासद्वयं कर्तुं न शक्तो तिनरोम्यदिः। अथ मेकि फलाहारी अन्नाहारो परेह
नी। नित्यं वो दासीयेम विष्णोक्तेः। अशक्तो तु गृहीतैकादशीव्रतो यस्तत्र स्तुक्तं मात्स्ये। द्वादश्यां शुक्लपक्षे तु नक्षत्रं
श्रवणं यदा। उपोष्यैकादशीं तत्र द्वादश्यां जयेत् हरिमिति। सजयेत् नूपवसेदित्यर्थः। अगृहीतैकादशीव्रत
श्चेदेकादश्यां मुक्त्वा द्वादश्यामुपवसेत्। एवमेकादश्यां मुक्त्वा द्वादशीं समुपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्रा
प्नोत्यसंशयमितिनारदीयोक्तेः। पारणं तु उभयांतेऽन्यतरांते वा कुर्यात्। तिथिनक्षत्रनियमे तिथिभांते च पारण
मिति स्कांदात्। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। पारणं तु न कर्तव्यं यावन्नैकस्य संक्षय इति नारदीयादि
ति हेमाद्रिः। यद्यप्यत्र नक्षत्रमात्रांते पि पारणं प्रतिभाति तथापि तिथिमात्रांते ज्ञेयं। न तु नक्षत्रांते तिथिमध्ये पि। याः
काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति विष्णुधर्मे श्रवणांत

मात्रे पारणं निषिद्धात्वा रोहिण्यां तु । भांते कुर्यात्तु पारणं । तिथ्यंते वा । इति विष्णुपुराणे तदंते पारणं तु । न त्वेवेव मस्ती तिनक्षत्रयोस्तु
केऽस्मात् इति मदनरत्ने । असंभवे तु । तिथ्यंते तिथिभांते वा पारणं यत्र चोदितम् । यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं
४० तिरेयम् । यत्तु मदनरत्ने द्वादश्यां हि द्वौ श्रवणऋक्षौ वा श्रवणांत एव पारणं कुर्यात् । पारणं तिथिवृद्धौ तु द्वादश्यां तु
उसंज्ञया तां द्वादश्यां कुर्यात् त्रयोदश्यां तत्र दोषो न विद्यते इति वह्निपुराणादित्युक्तम् । तत्सकरणादेतस्यामेव श्रवणे
युक्तैकादश्यां विहितविजयैकादशीव्रतपरं न तु श्रवणद्वादशीपरमिति मदनरत्ने । यो ऽस्तु श्रवणद्वादशीपर
मार्ङः । अत्र विधिर्मदनरत्ने विष्णुधर्मे । तस्मिन्दिने महापात्रं न यत्र क्वचन संगमे । तथा । दध्योदनयुतं तस्मां
जलपूर्णं घटं द्विजे । वस्त्रसंवेष्टितं दत्वा छत्रोपानहमेव च । न दुर्गतिमवाप्नोति [illegible] इति । मंत्रस्तु म
विष्णो । घटे जनार्दनरूपमभिधाय । नमो नमस्ते गोविंद बुधश्रवणसंज्ञक । अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो
भव । प्रीयतां देवदेवेशो मम संशयनाशनः । वामनावतारनिमित्तोपवासस्तु व्रतहेमाद्रौ भविष्ये । द्वादश्यां सि(तभ्रः
विधिः प्रोक्तः श्रवणेन युधिष्ठिर । सर्वपापप्रशमनः सर्वसौख्यप्रदायकः । एकादशी यदा सास्याच्छ्रवणेन स
मन्विता । विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदेत्युपक्रम्य । अथ कालेव जतिथ्येगते सा गुर्विणी भवेत् । सुपुत्रे

नवमे मासि पुत्रं सा वामनं हरिमित्याद्युक्त्वा। एतत्सर्वं समभवदेकादश्यां युधिष्ठिर। तेनेष्टा देवदेवस्य सर्वथा विजया
तिथिः। एषा व्युष्टिः समाख्याता एकादश्यां मया तव। पूर्वमेव समाख्याता द्वादशी श्रवणान्विते तूपसंहारादेकादश्या
मेवाव्युष्टिः फलं। भागवतेष्टमस्कंधे तु द्वादश्यां वामनोत्पत्तिरुक्ता। श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः
। ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणं। द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप। विजया नाम सा प्रोक्ता यस्यां
जन्म विदुर्हरेः। श्रोणायां चंद्रेऽभिजिच्छ्रवणप्रथमांशः। गौडाश्चैवं। अत्र कल्पभेदाद्व्यवस्था। तद्विधिश्च हे
माद्रौ वह्निपुराणे। नदीनां संगमे स्नात्वा याद्वच्चेपेदत्र वामनं। सौवर्णं वस्त्रसंयुक्तं द्वादशांगुलमुच्छ्रितं। ततो विधि
वत्संपूज्य। हिरण्मयेन पात्रेण दद्यादर्घ्यं प्रयत्नतः। नमस्ते पद्मनाभाय नमस्ते जलशायिने। तुभ्यमर्घ्यं प्रयच्छा
मि बालवामनरूपिणे। नमः कमलकिंजल्कपीतनिर्मलवाससे। महाहवरिपुस्कंधघृष्टस्कंधाय चक्रिणे। नमः
शार्ङ्गसीरबाणपालये वामनाय च। यज्ञभुक्फलदात्रे च वामनाय नमो नमः। देवेश्वराय देवाय देवसंभूतिकारिणे। प्र
भवे सर्वदेवानां वामनाय नमो नमः। एवं संपूज्ये पित्वा तं द्वादश्यामुदये रवेः। मंत्रोच्चारसहितं तं तु ब्राह्मणाय निवेदयेत्। वा
मनः प्रतिगृह्णाति वामनोहं ददामि ते। वामनं सर्वतोभद्रं द्विजाय प्रतिपादयेदिति। अनेन मह्नोप्याह। श्रवणद्वादश्यां जना

ह्नेननामाविष्णुःस्तूयते। श्रवणैकादश्यां वामनावतार इति श्रवणयुतमध्ये ह्येकादश्यलाभे तु दशमी विद्धापि श्रवणे
युता कार्या। दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः। श्रवणेन तु संयुक्ता सा चेत्स्यात्सर्वकामदेति वह्निपुराणे। द्वि
तु मे मदनरत्ने। इज्या च मध्याह्ने कार्या। अक्रोमध्ये वामनो रामरामाविति सर्वोक्तवचनात्। भागवताच्च। अत्रैव
दुग्धव्रतं संकल्पयेत्। न दुग्धं दुग्धमात्रं युजे माक्षीति। अत्रेदं चिंत्यते। दुग्धव्रते पायसादि वर्ज्यं न वेति। नेति केचित्
नहि प्रकृतिवर्जने विकारवर्जनं युक्तं। दधिघृतादीनामपि वर्जनापत्तेः। न च यत्र प्रकृतिरसोपलंभस्तद्वर्जनमिति
वाच्यं। मांसविकाररसोष्ट्रदध्यादेरप्यवर्जनापत्तेः। तस्माद्दध्यादिवत्पायसादि भक्ष्यमेवेति। अत्र ब्रूमः। यत्र विकारे प्र
कृतिरसोपलंभस्तत्प्रत्यभिज्ञानात्तत्र विकारस्यापि निषेधः। अस्ति च मांसविकारे मांसप्रत्यभिज्ञा मांसत्वान पाया
त्। यत्तु औष्ट्रदध्यादेरनिषेधापत्तिरिति। तन्न। औष्ट्रमिति विकारतद्धिते न निषेधात्। तथा च विज्ञानेश्वरः।
औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकमित्यत्र औष्ट्रमिति विकारतद्धिताच्छ्रुतेर्मूत्रादीनामविनिषेध इत्या रामः
हान्नन्वेवं संधिन्यनिर्दशावत्सागोपयः परिवर्जयेदिति संधिन्यादिक्षीरनिषेधेऽपि दध्यादिग्रहणं स्यात्। सत्यं
श्रातं वचनेन परं निषेधः। तदाहापरार्के शंखः। क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः। सप्तरात्रं व्रतं कुर्यात्प्र

यत्नेन समाहित इति। व्रतं गोमूत्रयावकं। तस्मात्पायसे दुग्धरसोपलंभाद्वर्जनम्। अत एवामिक्षायां दधिसत्वे
ऽपि माधुर्योपलंभात्पयोरूपत्वमुक्तं मीमांसकैः। तदुक्तं। पय एव घनीभूतमामिक्षेत्यभिधीयत इति। दध्यादि-
षु तदभावादवर्जनमिति। इति दुग्धव्रतम्॥ ॥भाद्रशुक्लचतुर्दश्यामनंतव्रतम्। तत्र त्रिमुहूर्त्तव्याप्योदयिकी
ग्राह्येति माधवः। तदुक्तं। उदये त्रिमुहूर्त्तापि ग्राह्यानंतव्रते तिथिरिति। मध्याह्ने भोज्यवेलायामिति कश्यपायां
श्रवणादुपरि हि देवेभ्यो धारयतीति वर्द्धिघि कल्पनात्। इत्यादिव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीयेव वचनान्मध्या-
ह्नव्यापिनी ग्राह्येति दिवोदासः। अतापमार्त्तण्डेप्येवं। निर्णयामृते तु घटिकामात्राप्योदयिकी ग्राह्युक्ता। तथा भाद्रपदस्यांते चतु-
र्दश्यां द्विजोत्तम। पौर्णमास्याः समायोगे व्रतं चानंतकं चरेदिति भविष्योक्तेः। मुहूर्त्तमपि चेत्प्राह्ने पूर्णिमायां चतुर्दशी। संपू-
र्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति स्कांदाच्चेति। अत्र मूलं चिंत्यं। तत्त्वं तु विध्यर्थवादयोर्भिन्नार्थत्वे एकवाक्यतापु-
तायोगात्संदिग्धेषु वाक्यशेषादिति न्यायेन पूर्वापरवाक्यमध्याह्नव्यापिन्येव मुख्या माधवस्तु सामान्यवाक्यान्निर्णय-
कुर्वन्भ्रांत एव। अनंतव्रतस्य पुराणांतरे स्वभावान्निबंधांतरे स्वभावाच्च वचनं निर्मूलमेवेति। ह्हे प्योदयिकत्वे पूर्णत्वा-
त्तद्वैतिमुक्तं। । अथागस्त्यार्घ्यः। तत्कालो व्रतहेमाद्रौ भविष्ये। कन्यायामगते सूर्ये अर्वाग्वै सप्तमे दिने। कन्यायां सम

तुंगाश्ते सूर्य्येकालो निवर्त्तते। तेन उदयोत्तरं सप्तदिनमध्य इत्यर्थः। यस्यादेशस्य समरणाद्दुदयाद्य मससदा तव्यमेतत्सकलं नरेण। याव
५२ त्समाः सप्तदश स्युर्वा स्युरष्टौ दूर्भमप्यत्र वेदं तिके चिंतायमस्यागस्त्यस्य। उदयकालश्च देवोदासीय उक्तः। उदेति याम्यां हरिसंक्रमा
द्दे वेरेकाधिके विंशतिमे ह्यगस्त्यः। सप्तमे स्ते दूष संक्रमात्त्व प्रयाति गर्गादिभिरित्यभाणि। अत्र विधिर्विष्णुरहस्ये। काशपुष्प
मयीं रम्यां कृत्वा मूर्त्तिं तु वारुणेः। प्रदोषे विन्यसेत्तां तु शर्णकुंभेस्वलंकृतां। कुंभस्थां ह्यर्चयेत्तां तु पुष्पधूपविलेपनैः। दध्यक्षतैर्व
लिं दद्याद्रात्रौ कुर्यात्प्रजागरं। प्रजा च वत्समानीय अर्घ्यमंत्रेण कार्य्या। प्रभाते तां समादाय याया सह्युलपजलाशयं। निष्ण वसाने
तोयपस्य पत्र्जलं ते प्रति मां मुनेः। अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः। मात्स्ये तु। अंगुष्ठमात्रपुरुषं तथैव सौवर्णमस्या
यतवाऊर्द्धदंडं। पूर्वं काशमयीत्वमशक्तो। चतुर्भुजं कुंभमुखे निधाय धान्यानि सप्तांकुरसंयुतानि। सकाशपुष्पा तत्स्थ
क्तिपुत्तं मंत्रेण दद्याद्द्विजपुंगवाय। धेनुं वज्रजवतीरवतीं च दद्यात्सवस्त्रघंटाभरणां द्विजाय। अभिविद्यो विरूढैः सप्तधान्यैः
वं प्राप्य पात्रं निधायापि तैः। सौवर्णेरौप्यपात्रेण ताम्रवंशमयेन वा। मूर्ध्नि स्थितेन नम्रेण जानुभ्यां धरणीगतः। विष्णुरहस्ये। अग एकः
गस्त्यः खनमानेति पठन्मंत्रमिमं मुनेः। अर्घ्यं दद्यादगस्त्याय शूद्रेऽमंत्रविधिस्त्वयम्। काशपुष्पप्रतीकाश वह्निमारुतसं
संभव। मित्रावरुणयोः पुत्र कुंभयोने नमोस्तुते। विंध्यवृद्धिक्षयकर मेघतोयविषापहार रत्नवल्लभ देव लंकावासन

मोस्तु ते। वातापिर्भक्षितो येन समुद्रः शोषितः पुरा। लोपामुद्रापतिः श्रीमान् योसौ तस्मै नमो नमः। येनोदिते न पापानि
विलयं यांति व्याधयः। तस्मै नमोस्त्वगस्त्याय सशिष्याय सपुत्रिणे। अगस्त्यः खनमानेति विप्रोर्घं विनिवेदयेत्। राजपु
त्रि महाभागे ऋषिपत्नि वरानने। लोपामुद्रे नमस्तुभ्यम् अर्घ्यं मे प्रतिगृह्यताम्। दत्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्जये
त्। अर्चितस्त्वं यथाशक्त्या नमोगस्त्य महर्षये। ऐहिकामुष्मिकीं दत्वा कार्यसिद्धिं व्रजस्व मे। विसर्जयित्वागस्त्यं तं विप्राय
प्रतिपादयेत्। अगस्त्योयमनस्योस्तु अगस्त्योस्मिन् घटे स्थितः। अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः। दानमंत्रः।
अगस्त्यः सप्तजन्मार्घं नाशयत्वाश्वयोरयम्। अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने। प्रतिग्रहमंत्रः। विप्रुरहस्येत्स
जेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसम्। होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलम्। होमश्चार्घ्यमंत्रेणाज्येन भविष्ये·
दत्वार्घं सप्तवर्षाणि क्रमेणानेन पांडव। ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः। वैश्ये च धान्यनिष्पत्तिः शूद्र
श्च धनवान् भवेत्। यावदायुश्चयः कुर्यात्स परं ब्रह्म गच्छति। इत्यगस्त्यार्घ्यः। ।भाद्रपौर्णमास्यां प्रपितामहीसंरो
स्त्रीनुद्दिश्य श्राद्धं कार्यम्। तदुक्तं हेमाद्रौ ब्राह्मे मार्कण्डेययोः। नांदीमुखानां प्रथमं कन्याराशिगते रवौ। पौर्णमास्यां तु
कर्त्तव्यं वराहवचनं यथेति। नांदीमुखत्वं चोक्तं ब्राह्मे। पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पि

तरः परिकीर्तिताः ।तेभ्यः पूर्वतरा येच प्रजावंतः सुखैधिताः ।ते तु नांदीमुखा नांदीसमृद्धिरिति कथ्यते ।एतच्च मत्स्यस्मृत्युक्तेः ।

५३ पत्न्याश्राद्धप्रसक्तेन्महालयपक्षे चावश्यकमिति प्रयोगपारिजाते ।अत्र मातामहा अपि कार्याः ।पितरो यत्र पूज्यंते तत्र मातामहा अपीति धौम्योक्तेः ।पितृशब्दस्य च जनकपरत्वे वृद्धवचनविरोधेन पितृमात्रापन्नपरत्वात् ।वार्षिके तु वचनान्निवृत्तिः ।

न च जीवत्पितृकस्यान्वष्टक्यां मातृश्राद्धेन त्रयापत्तिः ।इष्टापत्तेः ।अत एव सउकश्राद्धेषु स्वमातृमातामहयोर्दद्यादिति मदनरत्नकालादर्शौ ।एतज्जीवत्पितृकश्राद्धे वक्ष्यामः ।केचित्तु अजहत्स्वार्थलक्षणया पित्रादयो यत्र मातामहास्तेनात्रेनेत्याहुः ।न चात्र नाम्नां नांदीश्राद्धधर्मातिदेशः ।वैष्णवादिशब्दवद्देवतापरस्य कर्मनामत्वाभावात् ।नापि नांदीमुखत्वं पितृविशेषणम् ।पारिभाषिकत्वादिति दिक् ।तथा निर्णयदीपे गार्ग्यः ।पौर्णमासीषु सर्वासु निषिद्धं पिंडपातनम् ।वर्जयित्वा प्रौष्ठपदीं यथादर्शस्तथैव सेति ॥ ॥ ॥ ॥इति श्रीमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिंधौ भाद्रपदमासः ॥ ॥ ॥ ॥ श्रीः ॥ श्रीः ॥ ॥

एमः

रुणोदयवेलायां त्रयोदश्यां यदा भवेत्। दर्शे वा मंगलस्नानं दुःखशोकभयप्रदमिति कालादर्शे त्रयोदशीनिषेधाच्च।
तेनायमर्थः। यथाग्निहोत्रे यावज्जीवं सायंप्रातःकाले मुख्यापकाले स्यगुरुत्वं। तथात्र चतुर्दशी चतुर्थयामायामारु
णोदयचंद्रोदयानामुत्तरोत्तरस्य व्याप्त्यलाघुरुत्वमिति। यदपि दिवोदासीये। त्रयोदशी यदा प्रातः क्षयं याति चतुर्द
शी। रात्रिशेषे त्वमावास्या तदाभ्यंगो त्रयोदशीति वचनं तद्धेमाद्रिनिर्णयामृताद्यलिखितत्वेन निर्मूलं। समूलत्वेप्य
रुणोदये चतुर्थयामावायप्रकाशसत्त्वपरमिदं। अतएव सर्वत्रनारायणेन तथा कृष्ण चतुर्दश्यामिति चतुर्थया
ममात्रे स्नानमुक्तं। ज्योतिर्निबन्धे नारदोपि। इषासित चतुर्दश्यामिंदुक्षये तिथावपि। ऊर्जादौ स्वातिसंयुक्ते तदा दी
पावली भवेत्। कुर्यात्संलग्नमेतच्च दीपोत्सवदिनत्रयं। यत्तु त्रयोदशीमध्ये स्नानमाज्ञत्वे श्यामाश्यं न विघ्नः। अरु
णोदयतोन्यत्र रिक्तायां स्नाति यो नरः। तस्याब्दिकभवो धर्मो नश्यत्येव न संशय इति। दिवोदासीये भविष्यवचनं।
तन्मुख्यकालचतुर्दश्यभावे पितत्रेवस्नानव्यमिस्त्वपरमिति सर्वे सिद्धम्। चतुर्घटिकात्मको रुणोदय इति तत्रैवोक्तं
। मदनरत्ने पाद्मे। अपामार्गमथो तुंबीं प्रपुन्नाटमथापरं। भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै। प्रपुन्नाट
श्चक्रमर्दः। मंत्रस्तु। सीतालोष्ठसमायुक्त सकंटकदलान्वित। हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति। अ
स्यामेव प्रदोषे दीपान्दद्यादित्युक्तं हेमाद्रौ स्कांदे। ततः प्रदोषसमये दीपान्दद्यान्मनोरमान्। ब्रह्मविष्णुशिवादी

37 नोमवनेषु मवेषु चेति। दिवोदासीये पिंड्राद्ये। अमावास्याचतुर्दश्योः प्रदोषे दीपदानतः। यममार्गांधकारेभ्यो मुच्यते कार्त्ति
के नरः। तेउ तिथ्योस्तु हर्वै क्रिप्रदोषे दीपान्दत्त्वा परेद्युः स्नायादिति दिवोदासीये उक्तं। अत्र नरकोद्देशेन चतुर्वर्त्तियुक्तं दी
पदानं कार्यं। तत्र मंत्रः। दत्तो दीपश्चतुर्दश्यां नरकप्रीतये मया। चतुर्वर्त्तिसमायुक्तः सर्वपापापनुत्तये। तत्रैव लेगे माषप
त्रस्य शाकेन भुक्त्वा तत्र दिने नरः। प्रेताख्यायां चतुर्दश्यां सर्वपापैः प्रमुच्यते। अत्र यमतर्पणमुक्तं मदनपारिजाते
वृद्धमनुना। दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणं। मदनरत्ने ब्राह्मे। अपामार्गस्य पत्राणि भ्रामयेच्छिरसोपरि।
ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय
च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः इति। तर्पणप्रकारस्तु हेमाद्रौ
।एकैकेन तिलैर्मिश्रान्दद्यात्त्रीस्त्रीन् जलांजलीन्। संवत्सरकृतं पापं तत्क्षणादेव नश्यति। तथा मदनरत्ने स्कांदे।
दक्षिणाभिमुखो भूत्वा तिलैः सव्यं समाहितः। देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः। तथा। यज्ञोपवीतिना का
र्यं प्राचीनावीतिनाप्यथवेति। इदं जीवत्पितृकेनापि कार्यं। जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति पाद्मोक्तेः
अत्र भीष्मतर्पणमप्युक्तं दिवोदासीये तत्प्रकारस्तु माघे वक्ष्यते॥ इति नरकचतुर्दशी। ।कार्त्तिकस्यामावा
स्यायां प्रातरभ्यंगं कुर्यात्। तदुक्तं कालादर्शे मत्स्यपुराणे युगादौ कृतनाभ्यंगाद्दिमंगलैः। भक्त्या संपूजयेद्देवीम

लक्ष्मीविनिवृत्तये। अस्य व्याख्याने। आदिशब्दात्तैलगुदकस्नानादेरुपसंग्रहः। तदुक्तं पुष्करपुराणे। स्वाति-
स्थिते रवाविंदुर्यदि स्वातिगतो भवेत्। पंचत्वगुदकस्नायी कृताभ्यंगविधिर्नरः। नीराजितो महालक्ष्मीमर्चयञ्छ्रि-
यमश्नुते। आश्वयुग्दर्शे इति दर्शशब्दः प्रत्यूषस्वातियुक्ततिथिपरः। तदुक्तं ब्राह्मे। ऊर्जे शुक्ले द्वितीयायां तिथि-
षु स्वातिरूत्तेगे। मानवो मंगलस्नायी नैव लक्ष्म्या वियुज्यते। तत्रैव। इषे भूते च दर्शे च कार्त्तिकप्रथमे दिने। यदा
स्वाती तदाभ्यंगस्नानं कुर्याद्दिनोदये। कश्यपसंहितायां तु दीपावलीदर्शप्रक्रमे। इंदुक्षयेपि संक्रांतौ रवौ पाते-
दिनक्षये। तत्राभ्यंगो न दोषाय प्रातः पापापनुत्तये। इति स्वातियोगं विनाप्यभ्यंग उक्तः। मात्स्ये। दीपैर्नीराजनादत्र-
सैषा दीपावली स्मृता। अत्र विशेषो हेमाद्रौ भविष्ये। दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्। प्रदोषसमये लक्ष्मीं
पूजयित्वा ततः क्रमात्। दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च। तत्रैवाभ्यंगमभिधाय। एवं प्रभातसमये त्वमावास्यां
नराधिप। कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः। दीपान्दत्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि। स्वलंकृते-
न भोक्तव्यं सितवस्त्रोपशोभिना। अयं प्रदोषव्यापी ग्राह्यः। तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः। उल्काहस्ता-
नराः कुर्युः पितृणां मार्गदर्शनमिति ज्योतिषोक्तेः। दिनद्वये सत्त्वे परः। दंडैकरजनीयोगे दर्शः स्यात्तु परेहनि। तदा
विहाय पूर्वेद्युः परेह्नि सुखरात्रिकेति तिथि [illegible] तु प्रदोषस्य कर्मकालत्वात्। अर्धरात्रे

मम स्यैव लक्ष्मीराश्रयितुं गृहान्। अतः स्वलंकृता लिप्ता दीपैर्जाग्रज्जनोत्सवाः। सुधाधवलिताः कार्याः पुष्पमालोपशो
२४ भिता इति। व्यासोक्तेश्च प्रदोषार्द्धरात्रव्यापिनी मुख्या। एकैकव्याप्तौ परैव। प्रदोषस्य तु मुख्यत्वाद् अर्द्धरात्रे तु हेयाभावाच्च
। यस्तु अपराह्ने प्रकर्त्तव्यं श्राद्धं पितृपरायणैः। प्रदोषसमये राजन् कर्त्तव्या दीपमालिकेति क्रमः। स संपूर्णतिथावेव सा
मेरनुवादो न विधिः। तत्तत्कर्मकालव्याप्तेर्बलवत्वात्। संपूर्णतिथौ सा स्यात् खंडतिथावत्रास्या विध्यनुवादविरोधाच्चेत्तु
क्तं। अत्रैव दर्शेऽपररात्रेऽलक्ष्मीनिःसारणमुक्तं भविष्ये। एवं गते निशीथे तु जने निद्रार्द्धलोचने। तावन्नग
रनारीभिः शूर्पडिंडिमवादनैः। निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणात्। कार्त्तिकशुक्लप्रतिपदि गोक्रीडनमुक्तं
निर्णयामृते। अस्यामेव रात्रौ बलेः पूजोक्ता हेमाद्रौ भविष्ये। कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः। पूजां कुर्यान्नृ
पः साक्षाद्भूमौ मंडलके शुभे। बलिमालिख्य दैत्येंद्रं वर्णकैः पंचरंगकैः। गृहस्य मध्ये शालायां विशालायां ततोऽर्च
येत्। लोकश्चापि गृहस्यांतः शय्यायां शुक्लतंदुलैः। संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्। मंत्रस्तु पाद्मे।
बलिराज नमस्तुभ्यं दैत्यदानववंदित। इंद्रशत्रोऽमरारातेविष्णुसान्निध्यदो भवेति। तथा बलिमुद्दिश्य दी
यंते दानानि कुरुनंदन। यानि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितमिति। तदेतत्सर्वं विद्धायां प्रकर्त्तव्यं। पूर्वविद्धा
प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः। माधवेऽपि बल्युत्सवं चरन्वै विष्णुरूपवासवदाचरेदिति।

निर्णयामृतेपि। याकुहूः प्रतिपन्मिश्रा तत्र गाः पूजयन्नृपः। पूजनात्त्रीणि वर्द्धंते प्रजा गावो महीपतिरिति। तथा। भ
द्रायां गोकुलक्रीडा मदे प्रोक्ता वै विनृपति। भद्रायां द्वितीयायां। तथा। प्रतिपद्युग्निकरणं द्वितीयायां तु गोचर्चनं। छत्रच्छे
दं करिष्यते विततनाशं कुलक्षयमिति। तथा। प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतं। परविद्धेषु यः कुर्यात्पुत्रदारधनक्ष
यः इति देवलवचनाच्च। एतेषु विधिप्रतिषेधाः पूर्वदिने प्रतिपदः सायाह्नव्यापित्वे द्वितीयादिने चंद्रदर्शनसंभवे च
ज्ञेयाः। गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमाः। सोमो राजा पशून्हंति सुरभीपूजकांस्तथेति पुराणसमुच्चयात्। दि
नद्वये सायाह्नव्यापित्वे तु परैव ग्राह्या। वर्द्धमानतिथौ नंदा यदा सार्द्धत्रियामिका। द्वितीया वृद्धिगामित्वादुत्तरा तत्र
चोच्यते इति। तथा। त्रियामगा दर्शतिथिर्भवेच्चेत्सार्द्धत्रियामा प्रतिपद्विवृद्धौ। दीपोत्सवस्ते मुनिभिः प्रदिष्टे अतो
न्यथा पूर्वयुते विधेये इति पुराणसमुच्चयादिति निर्णयामृतकारः। सार्द्धत्रियामिकेत्यनेन चंद्रदर्शनाभाव उक्तः।
द्वितीयायाः पंचघामत्वे चतुर्घटिकारूपापराह्नव्याप्त्यभावे चंद्रदर्शनसंभवात्। द्वयं त्वेतद्वचनद्वयं पूर्वविद्धासंभ
वे वेदितव्यमिति भूमः। दिनद्वये प्रतिपदः सायाह्नव्याप्त्यभावे तु पूर्वैव। रात्रौ वलिपूजाविधानेन कर्मकालव्यापित्वा
त्। परदिने चंद्रोदये च तन्निषेधादिति दिक्। मदनरत्ने तु पूर्वविद्धायां गोक्रीडा। नीराजनमंगलमालिके तूत्तरत्र

39 कार्यो कार्त्तिके शुक्लप्रतिपदि तु विधानद्वितयं भवेत्। नारीनीराजनं प्रातः सायं मंगलमालिका। यदा त्वप्रतिपत्स्वल्पा नारीनी-
राजनं भवेत्। द्वितीयायां तदा कुर्यात्सायं मंगलमालिकामिति ब्राह्मोक्तेः। लभ्यते यदि वा प्रातः प्रतिपत् घटिकाद्वयं। तत्र
स्यां नीराजनं कार्यं सायं मंगलमालिकेति भविष्योक्तेः। प्रातर्वा यदि लभ्येत प्रतिपद् घटिका शुभा। द्वितीयायां तदा
कुर्यात् सायं मंगलमालिका। कार्त्तिके शुक्लपक्षादौ त्वमावास्या घटीद्वयं। देशभंगभयान्नैव कुर्यान्मंगलमालिका-
मिति देवीपुराणोक्तेश्च। अत्र विशेषो हेमाद्रौ ब्राह्मे। बलिप्रतिपदं प्रक्रम्य। तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मान-
वैः। तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं जयः। पराजयो विरुद्धश्च लाभनाशकरो भवेत्। दयिताभिश्च सहितैर्ने-
या सा च भवेन्निशेति। अत्र गोवर्द्धनपूजादि मार्गपाली सृजनादि चोक्तं हेमाद्रौ निर्णयामृते च स्कांदे। प्रातर्गोव-
र्द्धनं पूज्य द्यूतं चापि समाचरेत्। भूषणीयास्तथा गावः पूज्याश्चावाहदोहनाः। गोवर्द्धनश्च गोमयेन कार्यः शिखरेण वा।
मंत्रस्तु। गोवर्द्धन धराधार गोकुलत्राणकारक। बहुबाहुकृतच्छाय गवां कोटिप्रदो भव। गोमंत्रस्तु। लक्ष्मीर्या
लोकपालानां धेनुरूपेण संस्थिता। घृतं वहति यज्ञार्थे मम पापं व्यपोहतु। तत्रैव स्कांदे। ततोऽपराह्णसमये पूर्व-
स्यां दिशि भारत। मार्गपालीं प्रबध्नीयात् तुंगस्तंभे थ पादपे। कुशकाशमयीं दिव्यां लंबकैर्बहुभिर्मुने। दर्श-

पित्वा गजानश्वान्स्नायमस्मात्त लेनयेत् । कृते होमे द्विजेन्द्रैस्तु वध्यान्मार्गपालिकां । नमस्कारं ततः कुर्यान्मं
त्रेणानेन सुव्रत । मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे । विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे । नीराजनं भा
चतत्रैव कार्यं राष्ट्रजयप्रदं । राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः । मार्गपालीं समुल्लंघ्य नीरुजः सुखःसु
खान्विताः । तत्रैवादित्यपुराणे । कुशकाशमयीं कुर्याद्यष्टिकां सुनवां दृढां । तामेकतो राजपुत्रा हीनवर्णास्तथान्य
तः । गृहीत्वा कर्षयेयुस्तां यथासारं मुहुर्मुहुः । जयेत्र हीनजातीनां जयो राज्ञस्तु वत्सरमिति । यमद्वितीयातु
प्रतिपद्युता ग्राह्येत्युक्तं निर्णयामृतादौ । यमद्वितीया मध्याह्नव्यापिनी पूर्वविद्धा चेति हेमाद्रिः । अत्र विशेषो हेमा
द्रौ स्कांदे । ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमं । स्नानं मत्या भानुजायां यमलोकं न पश्यति । ऊर्जे शुक्ल
द्वितीयायां पूजितस्तर्पितो यमः । वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छति वांछितम् । तथा भविष्ये प्रथमाश्रावणे मा
सि तथा भाद्रपदे परा । तृतीया श्वयुजे मासि चतुर्थी कार्तिके भवेत् । श्रावणे कलुषा नाम तथा भाद्रे च गीर्मला । आ
श्विने प्रेतसंचारा कार्तिके याम्यका मता इत्युक्ता । प्रथमायां व्रतं द्वितीयायां सरस्वतीपूजा तृतीयायां श्राद्धमुक्तं च
तुर्थ्यामुक्तं । कार्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर । यमो यमुनया पूर्वं भोजितः स्वगृहे र्चितः । अतो यमद्वि

तीयेयं त्रिषु लोकेषु विश्रुता। अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः। स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं। दानानि च प्र
देयानि भगिनीभ्यो विधानतः। स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः। सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः। प्रति
पन्ना मातामभगिन्य इति हेमाद्रिः। पितृव्यभगिनीहस्तात् प्रथमायां युधिष्ठिर। मातुलस्य सुताहस्ताद्द्वितीयायां तथा नृप।
पितृमातुः स्वसुः कन्ये तृतीयायां तयोः करात्। चतुर्थ्यां सह जायायाश्च भगिन्या हस्ततः परम्। सर्वासु भगिनीहस्तात् भो
क्तव्यं बलवर्द्धने। यस्यां तिथौ यमुनया यमराजदेवः संभोजितः प्रतिजगत्स्वसृसौहृदेन। तस्यां स्वसुः करतलादि
ह यो भुनक्ति प्राप्नोति रत्नसुखधान्यमनुत्तमं सः। गौडास्तु। यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत्। अर्घ्यश्चात्र
प्रदातव्यो यमाय सहजद्वयैः। मंत्रस्तु। एह्येहि मार्त्तंडजपाशहस्त यमान्तकालोकधरामरेश। भ्रातृद्वितीयाकृतदेव
पूजां गृहाण चार्घ्यं भगवन्नमस्ते। भ्रातस्तवानुजाताहं भुंक्ष्व भक्तमिदं शुभम्। प्रीतये यमराजस्य यमुनाया विशेष
तः। ज्येष्ठाग्रजाते इति वदेदिति स्मार्ताः। इत्यन्नदानमित्यध्याहुः। ब्रह्माण्डपुराणेपि। या तु भोजयते नारी भ्रातरं युग्म
केतिथौ। अर्चयेच्चापि तांबूलैर्न सा वैधव्यमाप्नुयात्। भ्रातुरायुःक्षयो राजन्न भवेत्तत्र कर्हिचित् इति। ।
कार्त्तिकशुक्ले नवमी युगादिः। सा पूर्वाह्णिकी ग्राह्या शुक्लपक्षस्थत्वात्। अत्र पिंडरहितं श्राद्धं कर्त्तव्यमन्यत्प्रागुक्तम्।

अत्रैव विष्णुत्रिरात्रमुक्तं हेमाद्रौ पाद्मे। कार्त्तिके शुक्ले नवमीमवाप्य विजितेंद्रियः। हरिं विधाय सौवर्णं तुलस्या सहि
तं विभुं। पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयं। ततो यथोक्तविधिना कुर्याद्वैवाहिकं विधिमिति। ।कार्त्तिकशु
क्लैकादश्यां भीष्मपंचकव्रतमुक्तं नारदीये। अतो नरैः प्रयत्नेन कर्त्तव्यं भीष्मपंचकं। कार्त्तिकस्यामले पक्षे स्नात्वा
सम्यग्धृतेस्थितः। एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकमिति। तद्विधिरुक्तः। गोमयेन स्नात्वा मौनी पंचामृतैः पंच
गव्येर्विष्णुं संस्नाप्य संपूज्य। पायसं निवेद्य द्वादशाक्षरमष्टोत्तरशतं जप्त्वा। ॐ नमो विष्णवे इति षडक्षरेण घृता
क्तान् यवान् व्रीहीन् स्वाहान्तेनाष्टोत्तरशतं हुत्वा भूमौ स्वपेत्। एवं पंचदिनेषु कुर्यात्। विशेषस्त्वाद्येऽह्नि हरेः पादौ संपूज्य
त्रिर्गोमयं प्राश्य। द्वितीयेऽह्नि बिल्वपत्रैर्जानुनी संपूज्य गोमूत्रं। त्रयोदश्यां भृंगराजेन। नाभिं संपूज्य क्षीरं। चतुर्दश्यां
करवीरैः स्कंधं संपूज्य दधि प्राश्य। पौर्णमास्यां होमांते लोहीं पापप्रतिमां खड्गचक्रहस्तां कृष्णवस्त्रवेष्टितां प्रस्थ
तिलोपरि स्थाप्य कृत्वा धर्मराजनामभिः करवीरैः संपूज्य। यदन्यजन्मनि कृतमेतज्जन्मनि वा पुनः। तत्सर्वं प्रशमं
यातु मत्पापं तव पूजनात् इति पुष्पांजलिं दत्त्वा। कृष्णप्रतिमां च संपूज्य विप्रान् संभोज्य दक्षिणां दत्वा पंचगव्यं प्रा
श्य पौर्णमास्यां नक्तं भुंजीतेति लघुनारदीये। पंचगव्यप्राशनं षडक्षरेणेति हेमाद्रिः। हेमाद्रौ भविष्येऽपि तु शाकैर्मु

मन्नैवोपंचाहं वर्त्तनमुक्तं । अंतेषु क्रमः । यद्भीष्मपंचकमिति प्रथितं पृथिव्यामेकादशीप्रभृति पंचदशीनिरुद्धं ।
५। भुक्त्यन्नभोजनपरस्य नरस्य तस्मिन्निष्टं फलं दिशति पांडवशार्ङ्गधन्वेति । तथा पाद्मे । पंचाहं पंचगव्याशी भीष्मायार्घ्यं
च पंचसु । अहः स्थपितया दद्यान्मंत्रेणानेन सुव्रत । सत्यव्रताय शुचये गांगेयाय महात्मने । भीष्मायैतद्ददाम्यर्घ्य
माजन्मब्रह्मचारिणे । वैयाघ्रपद्यगोत्रायेति च । सव्येनानेन मंत्रेण तर्पणं सार्ववर्णिकमिति । । कार्त्तिकशु
क्लद्वादश्यां पारेवतीनक्षत्रयोगरहितायां पारणं कार्यं । तदुक्तं । हेमाद्रौ । आभाकासितपक्षेषु मैत्रश्रवणरेवती । सं
गमे न हि भोक्तव्यं द्वादशाद्यादशीर्हरेदिति । यदा तु रेवतीयोगरहिता द्वादशी सर्वथा न लभ्यते तदा रेवत्याश्चतुर्थ
पादं वर्जयेत् । वचनं तु प्रागुक्तं । लघुनारदीये । कार्त्तिके शुक्लपक्षस्य कृत्वा वैकादशीं नरः । प्रातर्दत्वा शुभान्कुं
भान्प्रयाति हरिमंदिरं । मदनरत्ने वाराहे । एकादशी सोमयुता कार्त्तिके मासि भामिनि । उत्तराषाढसंयोगे अनं
ता सा प्रकीर्त्तिता । तस्यां यत् क्रियते भद्रे सर्वमानंत्यमश्नुते । अस्यामेव रात्रौ देवोत्थापनमुक्तं हेमाद्रौ पाद्मे । ए
कादश्यां च शुक्लायां कार्त्तिके मासि केशवं । प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वित इति मदनरत्ने भविष्ये ।
कार्त्तिके शुक्लपक्षे तु एकादश्यां तथा सुत । मंत्रेणानेन राजेंद्र देवमुत्थापये द्विजः । रामार्चनचंद्रिकादौ तु द्वाद

यथामुक्तमप्यापारणोहं सर्वरात्रे घंटादीन्वादयन्मुहुरिति। अत्र देशाचारतो व्यवस्था। तत्रैव देवदेवस्य स्नानं पूर्वं
महद्भवेत्। महाक्ष्णो ततः कृत्वा देवमुत्थापयेत्सुधीः। मंत्रोक्तं वाराहपुराणे उक्तः। ओं ब्रह्मेन्द्ररुद्राग्निकुबेर
सूर्यसोमादिभिर्वंदितवंदनीय। बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेन सुखेन देव। इयं तु द्वादशी देव प्र
बोधार्थं विनिर्मिता। त्वयैव सर्वलोकानां हितार्थं शेषशायिना। उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते। त्वयि
सुप्ते जगत्सुप्तं जगत्प्रायप्रबोधे दिदं। उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव। गता मेघा वियच्चैव निर्मलं निर्म
लादिशः। शारदानि च पुष्पाणि गृहाण मम केशव। इदं विष्णुरिति त्र्यचो मंत्र उत्थापने हरेरिति। एवं देवमुत्थाप्य तदग्रे
चातुर्मास्यव्रतसमाप्तिं कुर्यात्। तदुक्तं भारते। चतुर्थों न्हयवेचीर्णं चातुर्मास्यव्रतं नरः। कार्तिके शुक्लपक्षे तु द्वादश्यां
तत्समापयेत्। लघुनारदीये। चातुर्मास्यव्रतानां च समाप्तिः कार्तिके स्मृता। मंत्रस्तु निर्णयामृते सनत्कुमारेणोक्तः।
इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति। अथ वाराहोक्तो बोधिनीवि
धिः। एकादश्यां रात्रौ कुंभे घृतपात्रोपरि हेममाषमितं मत्स्यं पंचामृतेन स्नाप्य कुंकुमपीतवस्त्रयुगपुष्पा
द्यैः संपूज्य मत्स्यादिदशावतारान्संपूज्य जागरणं कृत्वा प्रातर्देवमाचार्याय वस्त्राद्यैः संपूज्य। जगदादि

जगद्रूपो जगदादिरनादिमान्। जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दन इति नत्वा दक्षिणां दत्वा ब्राह्मणान् भोजयेद्
५२ ति। तथा ब्राह्मे। महातूर्यरवै रात्रौ भ्रामयेत्स्पन्दने स्थितं। उत्थिते देवदेवेशे नगरे पार्थिवः स्वयं। चतुरो वार्षिकान्मा
सान् नियमं यस्य यत्कृतं। कथयित्वा द्विजेभ्यस्तद्दद्याद्भक्त्या सदक्षिणं। यस्य भद्रस्य नियमः कृतस्तद्द्रव्यं दद्यादि
त्यर्थः। इदं शुक्लास्तादावपि कार्यं। आश्विने चेत्पूजा मन्त्रेन कारयेत्। कार्त्तिकशुद्दशीपौर्णमासीषु मन्वादिः। सा ह(
र्वाह्निकी ग्राह्या। अन्यस्यामुक्तं। ।कार्त्तिकशुक्ले चतुर्दश्यां वैकुण्ठसंज्ञा सा विष्णुपूजा यां रात्रिव्यापिनी ग्राह्या।
तदुक्तं हेमाद्रौ भविष्ये। कार्त्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप। सोपवासस्तु संपूज्य हरिं रात्रौ जितेन्द्रिय इति।
अस्यामेव विश्वेश्वरप्रतिष्ठादिनत्वात् तत्सीस्यर्थं यदोपवासादि क्रियते तदारुणोदयव्यापिनी ग्राह्या। तदुक्तं त्रि
स्थलीसेतौ सनत्कुमारसंहितायां। वर्षे च हेमलंबाख्ये मासे श्रीमति कार्त्तिके। शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं
प्रति। महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिके। स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयदिति। तत्पूर्वदिने चो
पवासः कार्यः। ततः प्रभाते विमले कृत्वा पूजां महाद्भुतां। दंडपाणेर्महाधाम्नि वनेऽस्मिन्कृतपारण इति। तत्रैवोक्तेः
शिवरहस्येऽपि पूजा जागराद्युक्तो क्तं। ततो रुणोदये जाते स्नात्वा स्नात्वा च भस्मना। संध्यां समाप्य विश्वेशमाभ्य

द्यापनविधि। मद्भक्तान्भोजयामास्तु ऋषयो वु मनुक्तन्निति। अत्र कार्त्तिकव्रतोद्यापनमुक्तं पाद्मे कार्त्तिक
माहात्म्ये। अथोर्ज्जव्रतिनः सम्यगुद्यापनविधिं शृणु। ऊर्जे शुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती। तुलस्या उपरि
ष्टात्तु कुर्यान्मंडपिकां शुभां। तुलसीमूलदेशे च सर्वतोभद्रमेव च। तस्योपरिष्टात्कलशं पंचरत्नसमन्वितं। पूज
येत्तत्र देवेशं सौवर्णं गुर्वनुज्ञया। रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः। ततस्तु पौर्णमास्यां वै सपत्नीका
न् द्विजोत्तमान्। त्रिंशन्मितानथैकं वा स्वशक्त्या वा निमंत्रयेत्। अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं। तत
तो गां कपिलां दद्यात्पूजयेद्विधिवद्गुरुमिति। कार्त्तिकी पौर्णमासी परा ग्राह्या। अमापौर्णमास्योः पर इति दीपि
कोक्तेः। अत्र विशेषो हेमाद्रौ ब्राह्मे। पुण्या महाकार्त्तिकी स्याज्जीवेंदोः कृत्तिकासु च। तथा। आग्नेयं तु यदा ऋ
क्षं कार्त्तिक्यां भवति क्वचित्। महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा। यदा तु याम्यं भवति ऋक्षं तस्यां तिथौ क्व
चित्। तिथिः सा विमहापुण्या मुनिभिः परिकीर्त्तिता। प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप। सा महाका
र्त्तिकी प्रोक्ता देवानामपि दुर्लभा इति। पाद्मे। विशाखासु यदा भानुः कृत्तिकासु च चंद्रमाः। स योगः पद्मको
नाम पुष्करे त्वतिदुर्लभः। पद्मकं पुष्करे प्राप्य कपिलां यः प्रयच्छति। स हित्वा सर्वपापानि वैष्णवं लभते पदं।

यमः। कार्त्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते। माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः। अस्यामेव सायंका
ले मत्स्यावतारो जात इत्युक्तं पाद्मे कार्त्तिकमाहात्म्ये। वरान्दत्वा यतो विष्णुर्मत्स्यरूपी भवेत्ततः। तस्यां दत्तं कृतं जप्तं
43 तदक्षय्यफलं स्मृतमिति। अत्र त्रिपुरोत्सव उक्तो भार्गवार्चनदीपिकायां। पौर्णमास्यां तु संध्यायां कर्त्तव्यस्त्रिपुरो
त्सवः। दद्यादनेन मंत्रेण प्रदीपांश्च सुरालये। कीटाः पतंगा मशकाश्च वृक्षा जले स्थले ये विचरंति जीवाः। दृष्ट्वा
प्रदीपं न च जन्मभागिनो भवंति नित्यं श्वपचा हि विप्राः। अत्र वृषोत्सर्गो विशेषात्तः। तदुक्तं मात्स्ये। कार्त्तिक्यां यो वृ
षोत्सर्गं कृत्वा नक्तं समाचरेत्। शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतमिति। अत्र कार्त्तिकेयदर्शनमुक्तं काशी
खंडे। कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनं। सप्त जन्म भवेद्विप्रो धनाढ्यो वेदपारगः इति। इति श्रीभट्टक
मलाकरकृते निर्णयसिंधौ कार्त्तिकमासः॥ ॥वृश्चिकेर्वाः षोडशघटिकाः पुण्याः। शेषं
प्राग्वत्। मार्गशीर्षकृष्णाष्टमी कालाष्टमी सा रात्रिव्यापिनी ग्राह्या। मार्गशीर्षसिताष्टम्यां कालभैरवसन्निधौ। उपो
ष्य जागरं कुर्वन् सर्वपापैः प्रमुच्यते इति काशीखंडात् रात्रिव्रतत्वावगतेः। रुद्रव्रतेषु सर्वेषु कर्त्तव्या संमुखी तिथिरिति
ब्रह्मवैवर्त्ताच्च। दिनद्वये रात्रौ रात्रिव्याप्तावुत्तरैव। भैरवोत्पत्तेः प्रदोषकालीनत्वादिति केचित्तन्न। शिवरहस्ये म

ध्याह्ने भैरवोत्पत्तेः श्रवणात्। तथा च तत्रैव। नित्ययात्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ। विलुप्तकर्म ब्रह्मणा रु
द्रे वत्साते उक्तं। तदीयरूपादनवध्यान्मतः। श्रीकालभैरवः। आविरासीत् तदा लोकान् भीषयन्निव। तिलान् पीतिः। अत्र
त्रोपवासएव प्रधानमित्युक्तं तत्रैव। उपोषणं स्यात्तमर्घ्यदानमिह स्मृतं। तथा जागरणं रात्रौ पूजायाम चतु
ष्टये। संध्यायामपि पूजैवोक्ता। तेन मध्याह्नव्यापिनी युक्ता। दिनद्वये प्रातः संपूर्णायां वा तथा प्रोक्तं वैवं पूर्वोक्तवच
नात्। पारणं तु प्रातरेव। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणेतिवचनात्। अत्र च कालभैरव पूजोक्ता त्रिस्थ
लीसेतौ। कृत्वा च विविधां पूजां महासंभारविस्तरैः। नरो मार्गसिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत्। तथा। तीर्थे
कालोदके स्नात्वा तर्पणमत्वरः। विलोक्य कालराजानं निरयादुद्धरेत् पितॄनिति। इयं च कार्त्तिकस्य नंतरगौणचा
न्द्राभिप्रायेण। मार्गशीर्षशुक्ल पंचम्यां नागपूजोक्ता हेमाद्रौ स्कांदे। शुक्ला मार्गशिरे पुण्या श्रावणे या च पंचमी।
स्नानदानैर्बहुफला नागलोकप्रदायिनीति। इयं नागपूजायां षष्ठीयुतैव ग्राह्या। पंचमी नागपूजायां कार्या षष्ठी
समन्विता। तस्यां तु तुषिता नागा इतरा सचतुर्थिकेति मदनरत्ने वचनात्। मार्गशीर्षशुक्ल षष्ठी चंपाषष्ठीति म
हाराष्ट्रेषु प्रसिद्धा। सोत्तरा युता युता ग्राह्या। षण्मुन्योरिति युग्मवाक्यात्। श्वोऽह्नि देविकं कुर्यादिति वचनाद

स्पच्चदैवकर्मत्वादियमेव योगविशेषेण चंपेत्युच्यते। तदुक्तं ब्रह्माण्डपुराणे मल्लारिमाहात्म्ये। मार्गे भाद्रपदे शुक्लाष
ष्ठी वैधृतिसंयुता। रविवारेण संयुक्ता सा चंपेतीह कीर्तितेति। विशाखाभौमयोगेन सा चंपेतीह विश्रुतेति मदनरत्ने
पाद्मः। मार्गशीर्षमले पक्षे षष्ठ्यां वारेंऽशुमालिनः। शततारागते चंद्रे लिंगं स्याद्दृष्टिगोचरमिति। इयं योगवशेन पू
र्वापरा वा कार्या। चंपाषष्ठी सप्तमीयुतेति दिवोदासः। इयमेव स्कंदषष्ठी सा पूर्वायुता। कृष्णाष्टमी स्कंदषष्ठी शिव
रात्रिश्चतुर्दशी। एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति मृगृक्ते। अपरेह्नि त्र्याद्यायामामध्ये पारणं भवेद्
दम्। अन्यथोत्तरैवेति दिवोदासः। अक्षपर्यंतं षष्ठी शुसेनाविदारकं स्कंदं महासेनं महाबलं। रुद्रोमाग्निजषड्व
क्त्रं गंगागर्भं नमोस्तु ते इति राजतं स्कंदं संपूज्य विप्राय दद्यादिति दिवोदासः। मार्गशीर्षशुक्ले चतुर्दश्यां पिशाच
मोचनतीर्थे श्राद्धं त्रिस्थलीसेतौ भट्टैरुक्तं। तस्य प्रातः वैशाख्यस्य पित्राद्युद्देश्यकत्वे पार्वणत्वादपराह्णव्यापिनी
ग्राह्या। अज्ञातनामपित्राद्युद्देश्यत्वे त्वेकोद्दिष्टत्वान्मध्याह्नव्यापिनीति। कुलधर्मव्रतादौ तूत्तरैव। मार्गशी
र्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः। तदुक्तं स्कांदे सह्याद्रिखंडे। मार्गशीर्षे तथा मासि दत्रामेकिसुविमिल्ले। मृगर
शीर्षयुते पौर्णमास्यां तस्य च वासरे। जनया मास देदीप्यमानं पुत्रं सती शुभम्। तं विष्णुमागतं सा त्वा स्वत्रि

नो माकरोत्स्वयं। दत्तवान्स्वस्य पुत्रत्वाद्दत्तात्रेय इतीश्वरमिति। इयं प्रदोषव्यापिनी तिथिः। मार्गपौर्णमासानंतरा
ष्टमी अष्टका। एवं पौषादिमासत्रयेपि। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वेत्याश्व
लायनोक्तेः। एकस्यामष्टम्यां वैकाकार्येति हरदत्तः। क्वचित्त्वं च प्रयुक्ता। प्रोष्ठपद्याष्टका भूयः पितृलोके भविष्यसी
ति पाद्मवचनात्। तत्सर्वेसप्तमीषु पूर्वेद्युः तत्परनवमीष्वन्वष्टकासु च श्राद्धं युक्तं कालादर्शे। मार्गशीर्षे च पौषे च
माघे प्रोष्ठे च फाल्गुने। कृष्णपक्षे च पूर्वेद्युरन्वष्टक्यं तथाष्टका इति। यत्तु विष्णुः। अमावास्यास्तिस्रोऽष्टकास्तिस्रोन्व
ष्टका इति। यच्च कौर्मे। अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिष्विति। तच्चतुर्थ्या अनावश्यकत्वार्थं। याचा
प्यन्या चतुर्थी स्यात्तां च कुर्यात्प्रयत्नत इति वायुब्रह्मांडपुराणात्। श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यत इति
विष्णूक्तेरिति शूलपाणिः। शाखाभेदाद्व्यवस्थेति तत्त्वं। वायुब्रह्मांडयोः। आद्यापूपैः सदा कार्या मांसैरन्या सदा
भवेत्। शाकैः कार्या तृतीया स्यादेष द्रव्यगतो विधिः। पौषादिक्रमः। अन्वष्टका तु प्रागेव निर्णीता। तत्राष्टम्या प
राह्णव्यापिनी ग्राह्या। अर्घ्याच्छादनपर्यंतं श्राद्धं पार्वणवद्भवेदित्याश्वलायनकारिकोक्तेरपराह्णकालत्वा
च्चापार्वणस्यापूर्वेद्युरन्वष्टका श्राद्धयास्तु अष्टम्यनुरोधेन निर्णयः। अत एव सूत्रं। पूर्वेद्युः पितृभ्यो दद्यात्ताश्च

45 परेद्युरन्वष्टक्यमिति च। अत्र च कामकालौ विश्वेदेवौ। इष्टिश्राद्धे क्रतूदक्षौ वष्टम्यां कामकालकाविति सायणीये धृ
तोक्तेः। अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं स्मृतिविधाने। एभिर्द्युभिर्जपेन्मंत्रं शतवारं तु तद्दिने। आन्वष्टक्यं यदा श्रा
द्धं संपूर्णं याति सर्वथेति। अष्टकौ त्वाश्वलायनः। अथ श्वोभूतेऽष्टकाः पशुना स्थालीपाकेन वाप्यनडुहो यवस
माहरेदग्निना वा कक्षमुपोषेदेषा मेऽष्टकेति न त्वेवानष्टकः स्यादिति। मार्गशीर्षादिषु मलमासे सति तत्राष्ट
कानकार्या। चतुर्णामिति ग्रहणादित्युक्तं नारायणवृत्तौ। कौवकगृह्येति। महालयाष्टकाश्राद्धोपाकर्माद्यविक
र्मेयत्। स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले इति। मार्गादिरविवारेषु काम्यव्रतमुक्तं हेमाद्रौ। तत्र मत्स्यपु
त्र राणे निसंग्रहे सौरधर्मे। पत्रैस्त्रिलं तुलस्यास्त्रिपलमथ घृतं मार्गशीर्षादिमस्यं मुष्टीनां त्रिस्तिलानां त्रिपलद
धितथा दुग्धकं गोमयं च। त्रिलं तोयांजलीनां त्रिमरिचकमथो त्रिः पलाः सक्तवः स्युर्गोमूत्रं शर्करासद्वविरि
ति विधिनाभानुवारे क्रमेण॥ इति श्रीभट्टकमलाकरकृते निर्णयसिंधौ मार्गशीर्षः॥ ॥
धनुःसंक्रमे परा षोडश घटिकाः पुण्याः। अन्यत्सागवत्। अत्रोत्सर्जननिर्णयो वक्ष्योपाकर्मप्रसंगात्सा
गेवोक्तः। कल्पतरौ भविष्ये। पौषमासि यदा देवि शुक्लाष्टम्या बुधो भवेत्। तत्स्नानं जपो होमस्तर्पणं विप्र

भोजनं। मत्स्यीतये हृतं देवि प्रानसाहस्रिकं भवेत्। अत्रैव रोहिण्याद्यो योगे तु त्पतनमत्वं तत्रैव ज्ञेयम्। पौषश्च लै
कादशीमन्वादिः साचोक्ताप्राक्। पौषपौर्णिमानंतरः सप्तम्यष्टमीनवम्यो ष्टकाख्याः प्रागुक्ताः पौषामावास्याया
मर्द्धोदयो योगविशेषः। तदुक्तम्मदनरत्ने महाभारते। अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः। अर्द्धोदयः
सविज्ञेयः कोटिसूर्यग्रहैः समः इति पुष्यमाघयोर्मध्यवर्त्तिनी पौषी पौर्णमास्युत्तरामावास्येत्यर्थ इति भट्टाः।
पुष्यस्य माघस्य चेत्यर्थ उक्तो मदनरत्ने। तन्न। हेमाद्रिविरोधात्। तत्र हि माघ एवोक्तः। तथा। दिवैव योगः श
स्तोयं न तु रात्रौ कदाचनेति। इदमर्धमन्यनिबंधेष्वभावान्निर्णयामृतमात्रोक्तेर्निर्मूलमेव। तेन हेमाद्र्यादि
मते रात्रावर्द्धोदयो भवत्येव। केचित्तु किंचिदूनो महोदय इत्याहुस्तन्निर्मूलं। हेमाद्रौ मदनरत्ने च स्कांदे। मा
घामायां व्यतीपाते चादित्ये विष्णुदैवते। अर्द्धोदयं तद्विख्यातः सहस्रार्कग्रहैः समं। तत्रैव। माघमासे कृष्णपक्षे
पंचदश्यां रवेर्दिने। वैष्णवेन तु ऋक्षेण व्यतीपाते सुदुर्लभे। व्रतं कुर्यादित्यग्रे न्वयः। तत्रैवं ब्रह्मविष्णुमहेशा
नां सौवर्णीः पलसंख्यया। प्रतिमास्तु प्रकर्त्तव्यास्तदर्द्धेन द्विजोत्तम। सार्द्धशतत्रयं शंभोर्द्रोणानां ति लप
र्वतः। कर्त्तव्यो पर्वतो विष्णुरुद्रयोः सुवर्णसंख्यया। शंभुरत्र ब्रह्मा। शय्यात्रयं ततः कुर्यादुप स्कर

46

समन्वितां तिलैर्होमं कृत्वा प्रतिमां दद्यादित्युक्तं। स्कांदे। अर्द्धोदये तु संप्राप्ते सर्वं गंगासमं जलं। शुद्धात्मा नो०पु
द्विजाः सर्वे भवंति ब्रह्मसंमिताः। यत्किंचिद्दीयते दानं तद्दानं मेरुसन्निभमिति। अत्र दानविशेषो निर्णयामृते ष्टते
स्कांदे। चतुःषष्टिपलमुख्यममत्रं तत्र कारयेत्। चत्वारिंशत्पलं वाथ पंचविंशतिरेव वा। अमत्रं पात्रं। तच्च कांस्य
मयमित्युक्तं तत्रैव। एवं सुघटितं कार्यं कांस्यभाजनमुत्तममिति। तथा। निधाय पायसं तत्र पद्ममष्टदलं लिखे
त्। पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकं। तदभावे तदर्द्धं वा तदर्द्धं वापि कारयेत्। भूमौ तु तंडुलैः शुद्धैः कृत्वाष्ट
दलमुत्तमं। अमत्रं स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकं। तेषां स्मृत्वा ततः कुर्याद्गंधमाल्यैस्तु शोभनैः। वस्त्रादिभि
रलंकृत्य ब्राह्मणाय निवेदयेत्। मंत्रस्तु। सुवर्णं पायसान्नं तं पद्मादेतत्त्रयीमयं। आपत्तेस्तारकं यस्मात्तन्मह्या
ण द्विजोत्तम। समुद्रमेखलां पृथ्वीं सम्यग्दत्तु यत्फलं। तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तममिति। इति
श्रीभट्टकमलाकरकृते निर्णयसिंधौ पौषः॥ ॥ ॥ अथ माघस्नानं। तत्र विष्णुः। तुलाम
करमेषेषु प्रातःस्नायी सदा भवेत्। हविष्यं ब्रह्मचर्यं च माघस्नानं महाफलं। इति सौरमास उक्तः। ब्राह्मे तु
सावनमास उक्तः। एकादश्यां शुक्लपक्षे पौषमासे समारभेत्। द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समाप्य

नमिति। पाद्मे विष्णुरहस्ये एकादश्यां शुक्लामारभ्य स्वयं द्विजो व्रतपरः। माघमासं निराहारस्त्रिकालं स्नानमा
चरेत्। त्रिकालमर्चयेद्विष्णुं त्यक्तभोगो जितेन्द्रियः। माघस्यैकादशीं शुक्लां यावद्विद्याधरोत्तमेति। त्रिकालस्नानं मासो
पवासं विषयां निराहार इत्युक्तेः। पृथ्वीचंद्रोदये त्वन्यथोक्तं। विष्णुः। दर्शं वा पौर्णमासीं वा आरभ्य स्नानं न माचरेत्। पु
ण्यापापहानि त्रिंशत्तु मकरस्थे दिवाकर इति। अत्र दर्शमिति शुक्लादिमुख्यचांद्राभिप्रायेण। अयं तु पक्षोऽनेदानीं प्रच
रति। अत्राधिकारिणो भविष्ये। ब्रह्मचारी गृहस्थो वा वानप्रस्थोथ भिक्षुकः। बालवृद्धयुवानश्च नरनारीनपुंसकाः। र
स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलं। पाद्मे। सर्वेधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप। ब्राह्मे। उष्णोदके न वा स्ना
नमशक्यः सति कुर्वते। दृष्टं सुसर्वगात्रेषु उष्णोदनं विशिष्यते। वैलवामन्ते गोडनिबंधे। पौष्यां तु समतीतायां याव
द्भवति पूर्णिमा। माघमासस्य तावद्धि स्नानविधिर्विधीयते। पितॄणां देवतानां च मूलकं नैव दापयेत्। ब्राह्मणो मूल
कं भुक्त्वा चरेच्चांद्रायणं व्रतम्। अन्यथा याति नरकं तत्र विट् शूद्र एव च। वर्जनीयं प्रयत्नेन मूलकं मदिरोपमं। यद
ा तु माघो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वयं स्नानं तन्नियमाश्च कर्त्तव्याः। मासोपवासच
ांद्रायणादि तु मलमास एव समापयेत्। तदुक्तं दीपिकायां। नियतत्रिंशद्दिनत्वाच्छुभे मासे प्रारभ्य समापयेत मलि

ने मासोपवासव्रतमिति। मासोपवासपदं चांद्रायणादेरुपलक्षणं स्नानारंभे च मंत्रा विष्णुनोक्ताः। तत्र चोत्थाय नियमं
47 गृह्णीयाद्विधिपूर्वकं। माघमासमिमं पूर्णं स्नास्येहं देव माधव। तीर्थेस्मिन्स्वजले नित्यमिति संकल्प्य चेतसीति। ग्रसहं
मंत्रमप्यपाठे। दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च। प्रातःस्नानं करोम्यद्य माघे पापविनाशनं। मकरस्थे
रवौ माघे गोविन्दाच्युत माधव। स्नानेनानेन मे देव यथोक्तफलदो भव। इमं मंत्रं समुच्चार्य स्नायान्मौनसमन्वि
त इति। अथ स्वहं सूर्यार्घ्यमंत्रमप्यथ्वीवंगोदयेपाठे। सवित्रे प्रसवित्रे च परं धाम जले मम। त्वत्तेजसा परिभ्रष्टं पा
पं यातु सहस्रधेति। स्नानकालश्च सूर्योदयः। त्रिस्थलीसेतौ। संप्राप्ते माघमासे तु तपस्विजनवल्लभे। क्रोशंति सर्वे
वारीणि समुद्गच्छति भास्करे। पुनीमः सर्वपापानि त्रिविधानि न संशय इति नारदीयोक्तेः। मकरस्थे रवौ यो हि न स्ना
त्यभ्युदिते रवाविति। माघमासे रटंत्यापः किंचिदभ्युदिते रवाविति च पाद्मवचनात्। यो माघमासे तु वसिस्सूर्ये करा
भितप्तस्नानं समाचरति चाकृत्वा दीनवाहे। उद्धृत्य सप्त पुरुषान्पितृमातृवंश्यान्स्वर्गं प्रयास्यमरदेहधरो नरो।
सोऽतिभविष्योत्तरवचनाच्च। ब्राह्मे त्वरुणोदय उक्तः। अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः। माधवं प्रियु
मं ध्यायन्यः स्नाति सुरपूजित इति। तथा। अरुणोदयमारभ्य प्रातःकालावधि प्रभो। माघस्नानव्रतं पुण्यं क्रमात्त

त्रावधारणा। उत्तमं तु सनक्षत्रं लुप्ततारं तु मध्यमं। सवितर्युदिते भूप ततो हीनं प्रकीर्तितमिति। तेनात्र शास्त्रेषु पेदाया
व्यवस्था। इदं च स्नानं प्रशस्तं। कास्पाः शतगुणं प्रोक्तं गंगायां मुनिसंगमे। सहस्रगुणिता सापि भवेत्तत्र पश्चिमवाहिनी
। पश्चिमाभिमुखी गंगा कालिंद्या सह संगता। हंति कल्पकृतं पापं सा माघे नृप दुर्लभेत्यादि पाद्मादिवचोभ्यः। विस्त
रस्तु पितामहकृतप्रयागसेतौ ज्ञेयः। ब्राह्मे। यत्र कुत्रापि वा माघे प्रयागस्मरणान्वितः। करोति मज्जनं तीर्थे स लभे
द्गांगमज्जनं। तथा समुद्रेऽपि प्रशस्तं। तदुक्तं पृथ्वीचंद्रोदये प्रभासखंडे। माघे मासि च यः स्नायाल्लेरं तत्पर्ये लोभा
वतः। पौंडरीकफलं तस्य दिवसे दिवसे भवेत्। माघस्नानं काम्यमेवेति केचित्। विष्णुपादिवाक्ये सदावश्यपक्षान्नित्यसकाम्यमि
ति तु युक्तं। मासपर्यंते स्नानासंभवे तु त्र्यहमेकाहं वा स्नायात्। महामाघीपुरस्कृत्य सत्स्नोतत्र दिनत्रयमिति लिंगात्।
। अस्मिन्योगे त्वशक्तोऽपि स्नायाद्दिदिनत्रयं। प्रयागे माघमासे तु त्र्यहस्नातस्य यत्फलं। नाश्वमेधसहस्रेण त
त्फलं लभते भुवीत्यादिपाद्मादिवचनात्। अत्र मकरसंक्रमरथसप्तमीमाघीति त्र्यहमित्येके। माघशुक्लदश
मीसप्तम्यौ मकरश्चेति त्र्यहमित्यपरे। माघस्याद्यं त्र्यहमिति केचित्। त्रयोदश्यादीति बहवः। महामाघीपुरस्कृत्य सत्
स्नोतत्र दिनत्रयमिति पाद्मोक्तेः। एतस्यार्थवादत्वाद्यत्किंचिद्दिनत्रयमिति मद्राः। तत्त्वे तु संदिग्धेषु वाक्य

णे चादिति न्यायात्त्रयोदश्याद्येवेति । प्रयागं विना पिपाद्ये । अस्मिन्योगे त्वशक्तोपि स्नायादपि दिनत्रयं माघस्नाने नियमास्तु ना
५८ रदीये । नवह्निं सेवये स्नातोप्यस्नातो पि वरानने । होमार्थं सेवयेद्वह्निं शीतार्थं न कदाचन । अहन्यहनि दातव्यास्तिलाः शर्कर
यान्विताः । अनभ्यंगी वरारोहे सर्वं मासं नयेद्व्रती । तथा । अशक्तः शरीरस्य यः कुर्यात्स्नानमाचरेत् । पदे पदेऽश्वमेधस्य फलं प्रा
प्नोति मानवः । तथा । शंखचक्रधरं देवं माधवं नाम पूजयेत् । वह्निं ज्ञात्वा विधानेन ततस्त्वेकाशनो भवेत् । भूशय्या ब्रह्मचर्ये
ण शक्तः स्नानं समाचरेत् । अशक्तौ ब्रह्मचर्यादौ स्वेच्छा सर्वत्र कथ्यते । तिलस्नायी तिलोद्वर्ती तिलहोता तिलोदकी । ति
लभुक् तिलदाता च षट् तिलाः पापनाशना इति । तथा । प्रयागासंभवे कोऽपि दशाश्वमेधोत्तरस्य प्रयागतीर्थे स्नानमुक्तं
काशीखंडे । कारपुञ्जे प्रयागे ये तपसि स्नांति मानवाः । दशाश्वमेधजनितफलं तेषां भवेद्ध्रुवमिति । स्नानोत्तरं मदनपारि
जाते विष्णुः । काष्ठमौनेन नमस्कृत्य पूजयेत्पुरुषोत्तमं । अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतेः । भविष्ये तैलमामल
कं चैव तीर्थे देयास्तु नित्यशः । ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनां । एवं स्नानावसाने तु भोज्यं देयमवारितं । भोज
येद्द्विजदंपत्यं भूषयेद्वस्त्रभूषणैः । कंबलाजिनरत्नानि वासांसि विविधानि च । चोलकानि च देयानि प्रच्छादनपटास्त
था । उपानहौ तथा गुप्तमोचकौ पापमोचकौ । अनेन विधिना देयान्माधवः प्रीयतामिति । पाद्मे । भूमौ शयीत होतव्यमाज्यं
तिलसमन्वितं । तथा । अन्नं चैव यथाशक्त्या देयं माघे नराधिप । सुवर्णरक्तिकामात्रं दद्याद्वेदविदे तथा । माघांते भुर

५८

विष्णोर्बोनारदीये। माघावसाने सुभगे षड्रसं भोजनं स्मृतं। सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरंजनः। इदं पात्योवीसंसीसू
क्ष्मेसप्तधान्यसमन्विते। त्रिंशत्तु मोदकादेयाः शर्करातिलसंयुता इति। अत्रैकादश्यां विधानेन व्रतस्योद्यापनं तत्र येतिपा
द्मवचनात्। एवं कृत्वोपवासं हरिजनादिकं कृत्वा परेऽह्नि तिलचर्वाज्यैरष्टोत्तरशतं होमं कृत्वा सवित्रे प्रसावित्रेतिश्वावित्रेतिमं चे
त्रमुक्त्वा दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते। परिपूर्णं कुरुष्वेह माघस्नानमुपः पतेरितिहमापयेदितिसंक्षेपः।
मकरसंक्रान्तौ तु हेमाद्रिमते परा अष्टत्वारिंशद्धटिकाः पुण्याः। त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिका इति ब्रह्मवै
वर्तात्। माधवमते तु विंशतिः। त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः परे। तिष्ठक्ष्व सिद्ध्युक्तेः। यदा तु सूर्यास्तात्पूर्वं संक्रां
तिर्भवति तदोभयमते पूर्वमेव पुण्यकालः। रात्रौ तु प्रदोषे निशीथे वा मकरसंक्रमे माधवमते द्वितीयदिने पुण्यं।
यद्यस्तमयवेलायां मकरं याति भास्करः। प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनीति वृद्धगर्गवचनात्। अस्तमयः
प्रदोषः। प्रदोषे पूर्वरात्रे। कार्मुकं तु परित्यज्य झषं संक्रमते रविः। प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनीति भविष्यो
क्तेश्चातदा भोगः परेऽहनीति हेमाद्रिः प्रायः। कालादर्शे निर्णयामृत मदनरत्नपारिजातादयोऽप्येवमूचुः। दाक्षिण
त्यास्त्वेवमेवाद्रियंते। यत्तु हेमाद्रिणाऽद्धोवाराहीयपार्श्वे द्वितीयस्तत्पार्श्वे। यथा प्रदोषे पूर्वेद्युस्तथार्धरात्रे परे

५९ म्नौ स्युक्तम् । तस्मै न मोक्ष तेन परेह्नि पुण्यं पूर्वं कुंभ्रदोषे इति । दिनद्वये पुण्ये निरासार्थमर्धरात्रग्रहणं । हेमाद्रिस्तु तत्
थे सारे नंतमहत्वादिमते तु निशीथात्पूर्वं पश्चाद्वा संक्रांतौ पूर्वदिने परदिने वा पुण्यं । धनुर्मीनावतिक्रम्य कन्यां च कुं
मिथुने तथा । पूर्वापरविभागेन रात्रौ संक्रमणं यदा । दिनांते पंच नाड्यस्तु तदा पुण्यतमाः स्मृताः । उदये पि तथा पंच
दैवे पित्र्ये च कर्मणीति स्कांदवचनात् । पूर्वापरविभागेनेति मकरकर्कभिन्नविषयं । पूर्वोक्तवचो विरोधादिति म
दनरत्ने उक्तं । षडशीतिमुखे तीते अतीते चोत्तरायणे । इत्यादि विरोधाच्च । तेन पूर्वी वैकवाक्यतया ऽयमर्थः । रात्रौ
पूर्वभागे मकरसंक्रमे परे ऽह्न्युदये पंच नाड्यः पुण्याः । रात्राव परभागे कर्कसंक्रमे पूर्वदिनांते पंच नाड्य इति ।
एवं सर्वेषामविरोधः । मकरे सामान्येन परदिने पुण्यत्वे पि पुण्यातिशयार्थमिदं । यत्तु देवलपस्तपार्श्वो त्या
सन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः । रात्रौ संक्रमणे भानोर्विषुवत्ययने दिवेति । अत्र माधवः । अयने दि
वा जाते तदर्धं पुण्यं । कर्के पूर्वं मकरे परं । एतन्मध्यं दिनायनपरमिति । हेमाद्रिस्तु रात्रौ विषुवत्यासन्नदिना
र्धं पुण्यमयने त्वासन्नदिने पुण्यं । दिने इति पाठे उभयत्र दिनार्धं पुण्यमित्याह । एतद्देवोक्तं दीपिकायां । अ
थायनमधः । अर्धान्निशीथाद्भवेत् । यद्यासन्नमहोरात्रदर्धं मध्यवा पुण्यमिति । तत्त्वं तु आसन्नसंक्रममितस्य

विषुवत्स्वेवमन्वयः । अयने रात्रौ सत्ति दिने पुण्यं । कस्मिंल्लिप्यपेक्षायां कर्के पूर्वं मकरे परे इति वाक्यांतरवश
त् । आदर्शे उच्यमानेन कोपि विरोधः । यत्त्वनंतभट्टः । अयनसंक्रमणं भानोर्निशीथात्प्राग्यदा भवेत् । अयनं विषु
वं तत्र प्राग्दिनोतिमनाडिकाः । पंच पुण्यतमाः पश्चान्निशीथाच्चे ज्जवेत्तथा । आद्याः परदिनस्यापि तद्वदित्येष
निर्णय इति । अपरार्के प्येवं । अस्तं गते यदा सूर्ये झषं याति दिवाकरः । प्रदोषे वार्धरात्रे वा तदा पुण्यं दिनद्वयमि
ति बौधायनवचनात् दिनद्वयं वा पुण्यकालः । तदा पुण्यं दिनोत्तरमिति मदनरत्ने पाठः । गुर्जरप्राच्योदीच्यास्त्वि
दमेवाद्रियन्ते । अत्रापि पूर्ववद्व्यवस्थेयं । तिथितत्त्वादिगौडग्रंथास्तु प्रदोषार्धरात्रभिन्ने रात्रेः पूर्वभागे पूर्वदिने
अपरभागे च परदिने पुण्यमन्यसंक्रांतिवत् । विशिष्यतयोर्निर्देशात् । प्रदोषश्च । प्रदोषोस्तमयादूर्ध्वं घटि
काद्वयमिष्यते इति वत्सोक्तः इत्याहुः तन्न । अस्तं गते इति त्रितयवैयर्थ्यापत्तेः । अतः प्रदोषपदेन तद्भिन्नैव
रात्रिरुच्यते अत एव यावन्नोदयते रविरिति हेमाद्र्यादिभिर्दक्षिणायने पूर्वत्र रात्रौ संक्रमे पूर्वदिनमुक्तं
वत्सोक्तिरप्यध्ययनादिपरा । इह तु त्रिमुहूर्त एव प्रदोषः । मकरे दानविशेषो हेमाद्रौ स्कांदे । धेनुं तिलमयीं रा
जन् दद्याद्यस्तूत्तरायणे । सर्वान्कामानवाप्नोति विंदते परमं सुखं । विष्णुधर्मे । उत्तरे त्वयने विप्रा वस्त्रदानं म(

हाफले। तिलहस्तिमनड्वाहं दत्वा रोगैः प्रमुच्यत इति। शिवरहस्येपि। तस्यां कृष्णतिलैः स्नानं कार्य्यं चोद्वर्तनं शुभैः। तिलादेयाश्च वि
50 प्रेभ्यः सर्वदैवोत्तरायणे। तिलतैलेन दीपाश्चदेयाः शिवगृहे शुभाः। कल्पतरौ कालिकापुराणे। होमं तिलैः प्रकुर्वीत सर्वदै
वोत्तरायणे। तान्योदेवाय विप्रेभ्यो हाटकेन समं ददेत्। उत्तरायणमासाद्य नरः कृष्णास्तु स्वर्गो चति। तथा मकरे स्नानाद्धि राकाम
भवती सुक्ते प्राक्। माघा माघां योगविशेषोऽर्द्धोदयः प्रागेवोक्तः। माघकृष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ यमेनाग्नि पि३
नर्कोभ्युदिते काले माघकृष्णचतुर्दशी। स्नातः संतर्प्य तु यमं सर्वपापैः प्रमुच्यत इति। माघशुक्लचतुर्थी सा प्रदोषव्या
पिनी ग्राह्या। माघशुक्ले चतुर्थ्यां तु नक्तव्रतपरायणाः। ये त्वां ढुंढे वैष्यंति ते च्योः सुरासुरद्विषामिति काशीखंडा
त्। माघमासे चतुर्थ्यां तु तस्मिन्काल उपोषितः। अर्चयित्वा तु यो देवि जागरं तत्र कारयेदिति भविष्यलीसेतौ लैंगाच्चे
। इयमेव कुंदचतुर्थी। सा प्रदोषव्यापिनी ग्राह्या। माघशुक्ले चतुर्थ्यां तु कुंदपुष्पैः सदाशिवं। संपूज्य यो हि नक्ताशी।
स प्राप्नोति श्रियं नर इति कालादर्शो कौर्मोक्तेः। माघशुक्लपंचमी श्रीपंचमी तदुक्तं हेमाद्रौ वाराहे। माघशुक्लचतु
र्थ्यां तु वरमाराध्य च श्रियः। पंचम्यां कुंदकुसुमैः पूजां कुर्यात्समाहितः। इयं माघवसन्तेष्वैवो। हेमाद्रिमते परा। चैत्र
शुक्ले श्रीपंचमीति दिवोदासः। माघशुक्लसप्तमी रथसप्तमी। सा अरुणोदयव्यापिनी ग्राह्या। सूर्यग्रहणतुल्या

तुष्शुक्लामाघस्य सप्तमी। अरुणोदयवेलायां तस्यां स्नानं महाफलं॥ इति चंद्रिकायां विष्णुवचनात्। अरुणोदयवेला
यां शुक्लामाघस्य सप्तमी। प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समा॥ इति वचनाच्च। यत्तु दिवोदासीये। अवला सप्त
मी दुर्गा शिवरात्रि र्महाभरः। द्वादशी वत्सपूजायां सुवेदा अग्युता सदेति षष्ठीयुतत्वमुक्तम्। तद्यदा पूर्वेद्युर्घटि
काद्वयं षष्ठी सप्तमी च परेद्युः दयवर्जमारुणोदयात् पूर्वं समाप्यते तत्परं ज्ञेयं। तत्र षष्ठ्यां सप्तमी हे यत्र वेदपा
रुणोदये स्नानं कार्यं। मदनरत्ने भविष्योत्तरे। माघे मासि सिते पक्षे सप्तमी कोटिभास्कराः। कुर्युः स्नानार्घ्यदानाभ्यां
मायुरारोग्यसंपदः। अत्र विधिर्हेमाद्रौ भविष्ये। कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं। रात्र्यंते चालयेथास्त्वं द
त्वा शिरसि दीपकं। तथा जले प्रकम्पानकेन चाल्यते यावत् तावत् स्नानं समाचरेत्। सौवर्णे राजते पात्रे भक्त्या लाबुम
ये ऽथवा। तैलेन वर्त्तिदीप्तं वा महारजनरंजिता। महारजनेन कुसुंभं। समाहितमना भूत्वा दत्त्वा शिरसि दीपकम्। भास्क
रं हृदये ध्यात्वा इमं मंत्रमुदीरयेत्। नमस्ते रुद्ररूपाय रसानां पतये नमः। वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते। ज
ले परिहरेद्दीपं ध्यात्वा संतर्पदेवताः। चंदनेन लिखेत्पद्ममष्टपत्रं सकर्णिकं। मध्ये शिवं सपत्नीकं अरुणेन च सं
युतं। पूर्वादिदलेषु रविभानुविवस्वद्भास्करसवितृअर्कसहस्रकिरणसर्वात्मकान्संपूज्य गृहं गच्छेदिति। स्नानमंत्र

५१

श्रीकाशीखंडे ॥ यद्यज्जन्मकृतं पापं मया जन्मसु सप्तसु। तन्मे रोगं च शोकं च माकरी हंतु सप्तमी॥ एतज्जन्मकृतं पापं यच्च जन्

मांतरार्जितं। मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः॥ इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके। सप्तव्याधिसमायु

क्तं हर माकरि सप्तमि॥ एतन्मंत्रत्रयं जप्त्वा स्नात्वा पादोदके नरः। केशवादित्यमालोक्य क्षणान्निष्कलुषो भवेत्॥ आदि

वो दासीय मदनरत्ने चा॥ इक्षुदंडेन जलं चालयित्वा सप्तार्कपत्राणि च शिरसि निधाय पूर्वोक्तैर्मंत्रैः स्नात्वा तिलपि

ष्टमयाष्ट्वेहैमं सूर्यं संरूप्य विधाय दद्यात्॥ अर्घ्यमंत्रो मदनरत्ने। सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन। सप्तमीस

हितो देव गृहाणार्घ्यं दिवाकर॥ ततः जननी सर्वलोकानां सप्तमी सप्तसप्तिके। सप्तव्याहृतिके देवि नमस्ते सूर्यमंड

ले इति प्रार्थयेत्॥ सौरागमे। अर्कपत्रैः सबदरैर्दूर्वाक्षतसचंदनैः। अष्टांगविधिना चार्घ्यं दद्यादादित्यतुष्टये॥ अ

त्र स्नानविशेषो हेमाद्रौ भविष्ये॥ ताम्रपात्रे यथाशक्त्या प्रस्थमेयेवा यथाभक्तिमान्॥ स्थापयेत्तिलपिष्टं च सघृतं सगुडं

तथा॥ कांचनं तालकं कृत्वा न्यसेत्तस्य तिलपिष्टजम्॥ संच्छाद्य रक्तवस्त्रेण पुष्पैर्धूपैरथार्चयेत्॥ दानमंत्रस्तु आ

दित्यस्य प्रसादेन प्रातःस्नानफलेन च॥ दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु तालकं॥ तालकं कर्णाभरणमिति तत्रैवो

क्तं॥ दीपपात्रमिति हेमाद्रौ॥ तत्रैव भविष्योत्तरे। एवंविधं रथवरं रविवाजियुक्तं हैमं च हेम प्रतदीधितिनाऽसमेतम्॥

दद्याच्च माघसितसप्तमिवासरे यः सोऽसंगचक्रगतिरेव महीं भुनक्ति। इयं मन्वादिरपि। इयं च शुक्लपक्षस्थत्वात् पौ
र्वाह्णिकी ग्राह्या। यदा माघो मलमासो भवति तदा मासद्वये मन्वादिश्राद्धं कुर्यात्। मन्वादिकं तैर्थिकं च कुर्यान्मा
सद्वयेऽपि चेति स्मृतिचंद्रिकोक्तेः। माघशुक्लाष्टमी भीष्माष्टमी। तदुक्तं हेमाद्रौ पाद्मे। माघे मासि सिताष्टम्यां सतिलं
भीष्मतर्पणं। श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिन इति। भारतेऽपि। शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो
जलं। संवत्सरकृतं पापं तत्क्षणादेव नश्यतीति धवलनिबंधे स्मृतिः। अष्टम्यां तु सिते पक्षे भीष्माय तु तिलोदकं। अ
न्नं च विधिवद्दद्युः सर्वे वर्णा द्विजातयः। सर्ववर्णोक्तेर्द्विजातय इति संबोधनं। तर्पणमंत्रस्तत्रैव। भीष्मः शांतनवो वी
रः सत्यवादी जितेन्द्रियः। आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियां। वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च। अ
पुत्राय ददाम्येतज्जलं भीष्माय वर्मणे। वसूनामवताराय शंतनोरात्मजाय च। अर्घ्यं ददामि भीष्माय आबालब्रह्म
चारिणे इति। एतच्च जीवत्पितृकस्यापि भवति। जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति पाद्मोक्तेरिति जीव
त्पितृनिर्णये पितृचरणैरुक्तं। एतच्चापसव्येन कार्यमिति दिवोदासीये। अत्र श्राद्धं काम्यं। तर्पणं तु नित्यं। ब्राह्मणा
द्याश्च ये वर्णा दद्युर्भीष्माय नो जलं। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम इति मदनरत्ने वचनात्। माघशु

ला दादशी भीष्मद्वादशी। त्वया कृतमिदं वीर त्वन्नाम्ना भविष्यति। सा भीष्मद्वादशी ह्येषा सर्वपापहरा शुभेति हे
माद्रौ पाद्मवचनात्। इयं पूर्वयुतायुग्मवाक्यात्। माघी पौर्णिमा परेत्युक्तं प्राक्। तथा हेमाद्रौ ब्राह्मे। मघास्थयोश्च
जीवेंद्वोर्महामाघीति कथ्यते। तत्रैव ज्योतिषे। मेषष्ठे यदा सौरिः सिंहे च गुरुचंद्रमाः। भास्करः श्रवणर्क्षे च म
हामाघीति सा स्मृता। तथा भविष्ये। वैशाखी कार्त्तिकी माघी तिथयोतीव पूजिताः। स्नानदानविहीनास्ता न नेयाः
पांडुनंदन। तथा। तिलपात्राणि देयानि कंचुकाः कंबलास्तथेति। माघपौर्णिमानंतरमष्टमी माघीकृष्णाष्टका तन्नि
र्णयः पूर्वेद्युरन्वष्टकानिर्णयश्च प्रागुक्तः। तथा च तत्राष्टकास्वशक्तावियमावश्यकी हेमंतशिशिरयोश्चतुर्णा
मपरपक्षाणामष्टमीष्वष्टका एकस्यां वेत्याश्वलायनोक्तेः। तथा माघाष्टकां त्रक्रम्य तामेकाष्टकेत्याचक्षत इत्या
पस्तंबवचनाच्चेत्यादिप्रयोगपारिजातेस्तेयं। इति भट्टकमलाकरकृते निर्णयसिंधौ माघः समाप्तः॥ ॥
कुंभे पूर्वाः षोडश घटिकाः पुण्याः शिवभागवत। फाल्गुनकृष्णाष्टम्यां विशेषः कल्पतरौ। फाल्गुनस्य च मासस्य कृ
ष्णाष्टम्यां महीपते सुत्युपक्रम्या जाता दाशरथेः पत्नी तस्मिन्नहनि जानकी। उपोषितो रघुपतिः समुद्रस्य तटे त
दा। रामपत्नी च संपूज्या सीता जनकनंदिनीति। फाल्गुनी चतुर्दशी शिवरात्रिः। सा च केषुचिद्वचनेषु प्रदोष॰

व्यापिनी ग्राह्येत्युक्तं। केचित्तु निशीथव्यापिनी। तत्राद्यामाधवीये वा यवीये। त्रयोदश्यस्तगे सूर्ये चतसृष्वेव ना
डिषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत्। स्कन्देऽपि। प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी। रात्रौ जागर
णं यस्मात्तस्मात्तां समुपोषयेत्। अत्र प्रदोषो रात्रिः। उत्तरार्द्धे तस्या हेतुत्वोक्तेः। कामिकेऽपि। आदित्यास्तमये काले अस्ति चे
द्यचतुर्दशी। तद्रात्रिः शिवरात्रिः स्यात् सा भवेदुत्तमोत्तमेति। द्वितीयापि तत्रैव नारदसंहितायां। अर्द्धरात्रयुता यत्र माघ
कृष्णचतुर्दशी। शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत्। स्कन्देऽपि। भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा। शि
वरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति। ईशानसंहितायां। माघकृष्णचतुर्दश्यामादिदेवो महानिशि। शिवलिंगतयोद्भू
तः कोटिसूर्यसमप्रभः। तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः। अर्द्धरात्रादधश्चोर्द्ध्वं युक्ता यत्र चतुर्दशी। तत्ति
थावेव कुर्वीत शिवरात्रिव्रतं व्रती। नार्द्धरात्रादधश्चोर्द्ध्वं युक्ता यत्र चतुर्दशी। नैव तत्र व्रतं कुर्यादायुरैश्वर्यहानितः। अ
र्द्धरात्रश्च द्वितीययामोत्यघटी : तृतीययामाद्यघटीद्वयरूप इति माधवः। वचनेतूक्तं प्राक्। एवं सति पूर्वेद्युरेवोभयव्या
प्तौ परैव। त्रयोदशीयदादेवि दिनभुक्तिप्रमाणतः। जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी तिस्कान्दोक्तेः। दिन
भुक्तिरस्तमयः। जयंती शिवरात्रिश्च कार्ये भद्राजयान्विते इति स्कान्दाच्च। दिनद्वये निशीथव्याप्तौ तु हेमाद्रिमते परैव। अ

र्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत्। पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैरिति पाद्मवचनात्। मदनरत्नेप्येवं। गौ
डास्त्वप्येवमाहुः। निर्णयामृते तु सर्वापि शिवरात्रिः प्रदोषव्यापिन्येव। अर्द्धरात्रवाक्यानि कैमुतिकन्यायेन प्रदोषस्तावका
53 नीत्युक्तं। तन्न। अर्द्धरात्रस्य पूर्वे॰ कर्मकालत्वोक्तेः। परदिने प्रदोषनिशीथोभयव्याप्तिसत्त्वात्परैवेति तु माधवः। इद
मेव च युक्तं प्रतीमः। परेद्युः प्रागुक्तार्द्धरात्रस्यैकदेशव्याप्तौ पूर्वेद्युः संपूर्णतद्व्याप्तौ च सत्यां परेद्युः प्रदोषनिशीथोभय
योगे पूर्वोक्तसंपूर्णव्याप्तेः पूर्वैव यथार्द्धरात्रयस्यां तु लभ्यते या चतुर्दशी तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः
। तद्रूर्ध्वाधोन्विता भूता सा कार्या व्रतिभिः सदेति माधवमते शानसंहितोक्तेः। पूर्वेद्युर्निशीथस्य परेद्युः प्रदोषस्य चैके
कव्याप्तौ तु पूर्वैव। जयायोगस्य प्राशस्त्यात्। तत्रैवोक्तं नागरखंडे। माघफाल्गुनयोर्मध्ये असिताया चतुर्दशी। अनंगे
नसमायुक्ता कर्त्तव्या सा सदा तिथिरिति। पाद्मेपि। अर्द्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत्। पूर्वविद्धैव कर्त्तव्या
शिवरात्रिः शिवप्रियैरिति। स्कान्देपि। भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा। शिवरात्रिव्रतं तत्र कुर्याज्जागरणं
तथेति। महतामपि पापानां दृष्टा वै निष्कृतिः पुरा। न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवामिति स्कान्दे दर्शयोग
स्य निंदितत्वाच्च। यदा चतुर्दशी पूर्वेद्युर्निशीथात्पूर्वं समाप्ता परेद्युश्च निशीथादर्वागेव समाप्ता तदा पूर्वेद्यु परेद्युरे

कव्याप्तिसत्त्वात्स्वरेव। माघासितभूतदिनं हि राजन्नुपैति योगं यदि पंचदश्याः। जयाप्रयुक्तां न तु जातु कुर्याच्छि-
वस्य रात्रिं प्रियकृच्छिवस्येति वचनात्। एवं दिनद्वये प्रदोषव्याप्त्यभावे निशीथव्याप्तिसत्त्वात्पूर्वैव। तेन दिनद्वये निशी-
थव्याप्तौ प्रदोषव्याप्त्या निर्णयः। दिनद्वये प्रदोषव्याप्तौ निशीथेन निर्णयः। एकैकव्याप्तौ तु निशीथेन निर्णय इति। इ-
यं च रविभौमसोमवारे शुभशिवयोगे चातिप्रशस्ता। हेमाद्रौ तीर्थखंडे लैंगे। फाल्गुनस्य चतुर्दश्यां कृष्णपक्षे समाहि-
ताः। कृत्तिवासेश्वरं लिंगमर्चयंति शिवं शुभे। ते यांति परमं स्थानं सदाशिवमनामयं। शिवरात्रिपारणे तु विरुद्ध-
वाक्यानि दृश्यंते। स्कांदे। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी। एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भ-
वेदिति। जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्त्तव्या तिथिभांते च पारणमिति। तिथिमध्येपि
पारणं स्कांदे उक्तं। उपोषणं चतुर्दश्यां चतुर्दश्यां च पारणं। कृतैः सुकृतलक्षैश्च लभ्यते वाथवानवा। ब्रह्मांडोद-
रमध्ये तु यानि तीर्थानि संति वै। संस्नातानि भवंतीह भूतायां पारणे कृते। तिथीनामेव सर्वासामुपवासव्रतादिषु
। तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीमिति। अत्र यामत्रयादर्वाक् चतुर्दशीसमाप्तौ तदंते तदूर्ध्वगामिन्यां
तु प्रातस्तिथिमध्य एवेति। हेमाद्रिमाधवादयो व्यवस्थामाहुः। तन्न। तिथ्यंते तिथिभांते वा पारणं यत्र चोदि

तं। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं तिथ्यादिसामान्यवचनैरेव व्यवस्थासिद्धेरुभयविधवाक्यवैयर्थ्य
54 स्याद् दुष्परिहरत्वात्। वयं तु तिथ्यंते पारणं भवेदिति कूर्मादिविषयमेव न तु शिवरात्रिविषयं। न
दुपादानं तु सर्वेषु तत्वमात्र कथनार्थम्। कथमन्यथा स्कांदे एव भून्यहद्दयवाक्यवत् त्रियामध्ये पारणं विधा
नं घटते। तस्माद्दिना शिवचतुर्दश्यामिति पर्युदस्त शिवरात्र्याः सर्वप्रकारेषु तिथिमध्य एव पारणेति ब्रूमः।
शिष्टाचारोऽप्येवमेव। दीपिकायां तु रात्रावपि तिथ्यंते एवोक्तं। व्रततिथेरंते निशीथेपि वाऽश्नीयादिति। मदनर
त्नकालादर्शयोस्तु। सा प्रस्तमयपर्यंतव्यापिनी चेत्परेहनि। दिवैव पारणं कुर्यात् पारणे नैव दोषभागिति तु
क्तं। तन्न। तिथिमध्ये पारणाविधानान्निषिद्धफलयोगाच्च तिथ्यंतानपेक्षत्वाद्दोषाप्रशास्त्रोक्तौ चतुर्थपादासंग
तेः। तेनेदं शिवरात्रिभिन्नव्रतपरं द्रष्टव्यं। इदं व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च। तथा च माधवीये स्कां
दे। परात्परतरं नास्ति शिवरात्रिः परात्परं। न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरं। जंतुर्जन्मसहस्रेषु भ्रमते
नात्र संशयः इति। अकरणे प्रत्यवायश्रुतेः। वर्षे वर्षे महादेव नरो नारी पतिव्रता। शिवरात्रौ महादेवं नित्यं भ
क्त्या प्रपूजयेदिति वीप्साश्रुतेः। अर्णवो यदि वा शुष्येत् क्षीयते हिमवानपि। चलेत्स्थाने कदाचिद्धि निश्चलं हि

शिवव्रतमितिशब्दवचनाच्चनित्यता। मममकस्तु यो देवि शिवरात्रिमुपोषकः। गणत्वमक्षयं दिव्यमक्षयं शिवशा
सनं। सर्वान् भुक्त्वा महाभोगान् ततो मोक्षमवाप्नुयादिति स्कांदात्। काद्दशाष्टिकमेतत्स्याच्चतुर्विंशाष्टिकं तु वेति त
त्रैवेशानसंहितावचनात्काम्यता। तत्रैव। शिवरात्रिव्रतं नाम सर्वपापप्रणाशनं। आचण्डालमनुष्याणां भुक्तिमु
क्तिप्रदायकं। अत्र जागरोपवासपूजाः समुदिताः व्रतं न तु प्रत्येकं। समुदितानां फलसंबंधात्। यत्तु। अथवा शिवरा
त्रिं च पूजाजागरणेनैव तत्। तथा। अखण्डितव्रतो यो हि शिवरात्रिमुपोषयेत्। सर्वान् कामानवाप्नोति शिवेन सह
मोदते। कश्चित्तु पुण्यविशेषेण व्रतहीनोपि यः पुमान्। जागरं कुरुते तत्र स रुद्रसमतां व्रजेदित्यादि स्कांदं तद
नुकल्पतादशक्तपरं। माघेतर प्रतिमासशिवरात्रिस्तु शिवरात्रिशब्दस्य माघकृष्णचतुर्दश्यामेव रूढत्वात्।
माघमासस्य शेषे या प्रथमा फाल्गुनस्य च। कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्तितेति हेमाद्रौ वचनाच्च। नायं
निर्णयस्तत्रैतिरात्रौ यामचतुष्टये पूजाविधानाद्यस्मिन् दिने धिकारात्रिव्याप्तिः साग्राह्या। साम्येतु पूर्वैवेति हे
माद्रिरुद्विवानाव्यस्तत्तस्तु। प्रतिमासकृष्णचतुर्दश्यामपि। सर्वकामफलप्रदं कृष्णचतुर्दश्यां शिवव्रतमितुप
क्रम्य। चतुर्दश्यांष्टकं कर्तव्यं शिवरात्रिव्रतं शुभमिति हेमाद्रौ कालोत्तरे शिवरात्रिप्रकरणे प्रयोगस्तु कौण्डपाचनाग्नि

होत्र नित्याग्निहोत्रधर्मोऽव्रतधर्मप्राप्तिः स्यादेव । अतः प्रदोषनिशीथोभयव्याप्त्यैव निर्णय इति वयं प्रतीमः । अमा
55 रंभो हेमाद्रौ स्कान्दे । आदौ मार्गशिरे मासि दीपोत्सवदिनेपि वा । गृह्णीयान्माघमासे वा वादरेण वसुपोषयेत् । ए
वं द्वादशवर्षेषु वादरेणैव तत्पोधनान्नं वरयेदिति शेषः । चतुर्दश्यां वा विप्रानाचार्यं वृत्वा । कुंभोपरि न्यसेद्देव
मुमयासहितं शिवं । सौवर्णीं प्यथवा राज्ये हुवृषभे संस्थिते शुभे । इत्युक्तं । हैमीमूर्तिं सदृश्य स्थिरं चलं वा लिं
गं पंचामृतसहस्रशतंतद्धान्यतरकुंभैः संस्नाप्य संपूज्य जागरणं कृत्वा परेद्युस्तिलान्सहस्रं शतं वा हुत्वा
विप्रेभ्यो वस्त्राणि द्वादशगाश्च दत्वाचार्याय धेनुं शय्यां च दत्वा विप्रान्भोजयेदिति मदनरत्ने उक्तं । माघामावास्या
युगादिः । तदुक्तं । माघमासे त्वमावास्येति । अन्नं त्वागवत् । तथान्योपि विशेषो विष्णुपुराणे । माघासिते पंचदशी कदा
चिदुपैति योगं यदि वारुणेन । ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यते सा इति । वारुणं शतभिषा ।
श्राद्धं च कुंभादित्येऽस्तेय मिति हेमाद्रिः । भारते । काले धनिष्ठा यदि नाम तस्मिन् भवेत्तु भूपाल तदा पितृभ्यः । दत्तं तिला
न्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैरिति । फाल्गुनीपौर्णमासी होलिका । सा च सायाह्नव्यापिनी
ग्राह्या । सायाह्ने होलिकां कुर्यात्पूर्वाह्णे क्रीडनं गवामिति वचनादिति निर्णयामृते उक्तं । ज्योतिर्निबंधे तु

प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा। संवत्सरं च तद्राष्ट्रं पुरं दहति साद्भुतं। प्रदोषव्यापिनी ग्राह्या पौर्णि-
मा फाल्गुनी सदा। तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे। इति नारदवचनात्प्रदोषव्यापिनी तूक्ता। हेमाद्रौ
मदनरत्ने च भविष्ये। ~~पुराणसमुच्चये भद्रायां दीपिता होला राष्ट्रभंगं करोति वै। नगरस्य च नैवेष्टा तस्मात्तां परि~~
ग अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे। गोमयेनोपलिप्ते च सचतुष्के गृहांगणे। इत्यादिना तत्रैव तद्विधानाच्च
। इति नेयं पूर्वविद्धा। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनं। इति बृहद्यम
स्मृतिवचनोक्तेश्च। दिनद्वये प्रदोषव्याप्तौ परैव। पूर्वदिने भद्रासत्त्वात्। तत्र च होलिकानिषेधात्। तदुक्तं निर्ण-
यामृते मदनरत्ने च पुराणसमुच्चये। भद्रायां दीपिता होला राष्ट्रभंगं करोति वै। नगरस्य च नैवेष्टा तस्मात्तां
परिवर्जयेत्। तथा। भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हंति ग्रामं दहति फाल्गु-
नी। तथा। दिनार्द्धात्परतोपि स्यात्फाल्गुनी पौर्णिमा यदि। रात्रौ भद्रावसाने तु होलिका दीप्यते तदा। इति। यदा
तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च पूर्णिमा क्षयवशात्सायाह्नकालात्प्रागेव समाप्यते तदा पूर्वदि-
ने संपूर्णरात्रौ भद्रासत्त्वात् तत्रैव तत्पुच्छे वा तदभावे निशीथोत्तरं कुर्यात्। सार्द्धयामत्रयं वा स्याद्द्वितीयदि

वसेयदा। प्रतिपद्दर्शमानात्तु तदा सा होलिका स्मृतेति भविष्यवचनादिति निर्णयामृतकारः। मदनरत्नेऽप्येवं। य
त्तु वह्नौ वह्निं परित्यजेदिति भविष्ये। वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः। तदुक्तं भिन्नविषयमिति
तत्रैवोक्तं। अन्ये तु तस्यां भद्रामुखं त्यक्त्वेति। प्रदोषव्यापिनी न स्याद्यदा पूर्वदिने तदा। भद्रामुखं वर्जयित्वा र
होलिकायाः प्रदीपनमिति नारदवचनात्। निशागमे प्रपूज्येत होलिका सर्वदा बुधैः। न दिवा पूजयेत् ढुंढां पू
जिता दुःखदा भवेदिति दिवोदासीये वचनात्। यामत्रयोर्ध्वयुक्ता चेत् प्रतिपत्तु भवेत्तिथिः। भद्रामुखं परि
त्यज्य कार्या होला मनीषिभिरिति विद्याविनोदाभिधानाच्च। भद्रामुखं विहाय पूर्वदिन एव कार्येत्याहुः। भ
द्रामुखं तु नाड्यस्तु पञ्च वदनं गलकस्तथैकेति रत्नमालोक्तं ज्ञेयं। शिष्टाचारोऽप्येवमेव। अत्र चेच्चन्द्रग्रहणं त
दा ततोऽर्वाक्स्थिति भद्रावर्जपौर्णमास्यां होलिकादीपनं। अथ परेऽह्नि ग्रस्तोदयस्तदा पूर्वदिने भद्रावर्जरात्रि
चतुर्थयामे विष्टिपुच्छे वा होलिका कार्या। ग्रहोत्तरं प्रतिपत्सत्त्वात्तत्पूर्वं च दिवा होलानिषेधादिति दिवोदा
सचन्द्रप्रकाशौ। वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्त्वे कर्मकालस्पर्शे चतुर्थयामादिगौणकालग्र
हणे मानाभावाद्भद्राभावाच्च ग्रहणकाल एव होला कार्या। न च सर्वेषामेव वर्णानां सूतकं राजदर्शने। स्ना

त्वा कर्माणि कुर्वीत श्रुतमन्नं विवर्जयेदिति निषेधात्कथं सूतके होलेति वाच्यं । तस्योर्द्धरात्रशेषत्वात् । हुत्वा मंत्र
स्तु । अस्य कृत्वा भयसंत्रस्तैः कृता त्वं होलि बालिशैः । अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भवेति । यत्तु वार्त्तिककारै
र्होलिकायामाचारप्राप्तेत्युक्तं । तत्र हेमाद्र्युदाहृतभविष्यवचनान्यसिद्धानि कृत्वा चिंतास्ते याज्ञात्त्यं धिकर
णवत् । अज्ञातापि ज्ञानी मलमासेन भवति । इयं मन्वादिरूपा सा तु सर्वोत्कीर्त्या ग्राह्या । मलमासे सति मन्वादिश्रा
द्धं मासद्वये कार्यमित्युक्तं प्राक् । कृत्यचिंतामणौ ब्राह्मे । नरो दोलागतं दृष्ट्वा गोविंदं पुरुषोत्तमं । फाल्गुन्यां संयतो
भूत्वा गोविंदस्य पुरं व्रजेत् । चैत्रकृष्णप्रतिपद्दिवसंतोत्सवः साचोदयिकी ग्राह्या । प्रवृत्ते मधुमासे तु प्रतिपद्युदि
ते रवौ इति भविष्योक्तेः । दिनद्वये तथात्वे पूर्वा वत्सरादौ वसंतादौ बलिराज्ये तथैव च । पूर्वविद्धैव कर्त्तव्या प्रति
पत्सर्वदा बुधैः इति वृद्धवसिष्ठवचनात् । अत्र विशेषो हेमाद्रौ भविष्ये । चैत्रमासि महाबाहो पुण्ये तु प्रतिपद्दिने
। यस्तत्र श्वपचं दृष्ट्वा स्नानं कुर्यान्नरोत्तमः । न तस्य दुरितं किंचिन्नाधयो व्याधयो नृपेति । तथा । प्रवृत्ते मधुमा
से तु प्रतिपद्युदिते रवौ । कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः । वंदयेद्धोलिकाभूतिं सर्वदुःखोपशांतये ।
मंत्रश्च । वंदितासि सुरेंद्रेण ब्रह्मणा शंकरेण च । अतस्त्वं पाहि नो देवि विभूते भूतिदा भवेति । अत्र चूतकुसुमप्रा

णमुक्तं तत्रैव पुराणसमुच्चये। वृत्ते तुषारसमये सितपंचदश्यां प्रातर्वसंतसमये समुपस्थिते च। संप्राश्य चू
तकुसुमं सह चंदनेन सत्यं हि पार्थ पुरुषोथ समाः सुखी स्यात्। मंत्रस्तु। चूतमग्र्यं वसंतस्य माकंदकुसुमं तव।
सचंदनं पिबाम्यद्य सर्वकामार्थसिद्धये इति। चैत्रामावास्या मन्वादिः। साऽपराह्णव्यापिनी ग्राह्या हस्तस्य प्रद
स्यत्वात्। इति फाल्गुनः। एवं निरूपितमिदं गहनं तु कालतत्त्वं विचार्य्य वचनैश्च नयैश्च सम्यक्। तद्दोषदृ
ष्टिमपहाय विवेचनायं विद्वद्भिरस्त्वविरतं प्रणतोस्मि तेषु। मया सद्वासवायदिह गदितं मंदमतिना किमे
तच्छक्यं वाध्यवसितुमपि स्वल्पमतिना। तदेवं यत्किंचिच्छ्रुतिमिह विख्यातमहिमा प्रतापोयं सर्वो विक
सति तु पित्रोश्चरणयोः। योभूद्भट्टतंत्रगहनार्णवकर्णधारः शास्त्रांतरेषु निखिलेष्वपि मर्मभेत्ता। योत्र श्र
मः किल कृतः कमलाकरेण श्रीतो मुनास्तु स कृती तु धरामरकुलः॥ ॥इति श्रीनारायणभट्टसूरि
सूनुरामकृष्णभट्टसुतदिनकरभट्टानुजभट्टकमलाकरकृते निर्णयसिंधौ संवत्सरकृत्यं नाम द्वितीयः प
रिच्छेदः॥२॥ २ २ २ २ २ २ ॥

धर्म

॥ कन्यासंक्रमे परा: षोडशघटिका: पुण्या: शेषं प्रागवत्। अथ महालय:। न च दृष्टध्वी चेंद्रोदये हदमनु:। आषाढी
मवधिं कृत्वा पंचमं पक्षमाश्रिता:। कांक्षंति पितरः क्लिष्टा अन्नमप्यन्वहं जलं। कन्यायोगे पुण्यतमत्वमाह श्रा
द्धायनि:। कन्यास्थार्कान्वित: पक्ष: सोत्यंतं पुण्य उच्यते इति। अत्र विशेषमाह दमनु:। मध्ये वा यदि वाप्य
न्ते यत्र कन्यां व्रजेद्रवि:। स पक्ष: सकल: श्रेष्ठ: श्राद्धषोडशकं प्रति। तथा ब्रह्माण्डमार्कण्डेययो:। कन्यागते सवि
तरि दिनानि दशपंच च। पार्वणेनेह विधिना श्राद्धं तत्र विधीयते। तथा तत्रैव षोडशदिनान्युक्तानि। कन्या
गते सवितरि यान्यहानि तु षोडश। क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत्। अत्र हेमाद्रि:। षोडशत्वं त्रे
धा व्याचख्यौ। तिथिवृद्ध्या पक्षस्य षोडशदिनत्वं श्राद्धदृष्ट्या पर्यमिलेक: पक्ष:। भाद्रपदे मयासहेति द्विती
य:। आश्विनशुक्लप्रतिपत्सहेति तृतीय:। अन्त्य एव तु युक्त:। अह: षोडशकं यत्तु शुक्लप्रतिपदा सह।
तं इदं यावित्रेषेण सापि दर्शात्मिका स्मृतेति देवलोक्ते:। अत्र पंच पक्षा:। तदुक्तं हेमाद्रौ ब्राह्मे। आषाढ्यु
क्तपक्षे तु श्राद्धं कार्यं दिने दिने। त्रिभागहीनपक्षं वा त्रिभागं त्वर्द्धमेव वा। दिने दिने इति पक्षपर्यंतत्वमुक्तं।
त्रिभागहीनमिति पंचम्यादिपक्ष:। भोजं गीति थिमारभ्य यावद्वृश्चिकसंगमं इति वाक्यात्। अर्द्धमिति दशम्या

द्विप्रहरं त्रिभागमितिदशम्यादिः। त्रिभागहीनमिति चतुर्दशीसहितप्रतिपदादिं चतुष्टयवर्जनाभिप्रायेणेति
कल्पतरुः। अत्रादिनपदं तिथिपरं। वीप्सया तत्तत्तीयतिथिलंभ्यादृष्टा व्यतीतावधेरेकेनिनपंचदशतिथिव्या
प्तेस्याद्वेसिद्ध्यति। तेन चतुर्दश्यां निषेधोन्यस्मलपक्षपरइतिगौडाः। तन्न। आग्रायणं प्रा स्त्रहतस्यैव चतुर्दशीपाम
हालये इत्यादिविरोधात्। यत्त्वकस्मिन्नरलम त्वयलोपेन तृतीयभागहीनं षष्ठ्यादिपक्षेतत्तृतीयभागमे
कादश्यादि। तद्वर्जयोदश्यादि। उत्तरोत्तरलघुकालोक्तेरिति। तन्न। गौतमादिवचनेन मूलकल्पना
लाघवात्। पक्षमित्यनन्ययापत्तेश्च। पंचम्यूर्द्ध्वं च तत्रापि दशम्यूर्द्ध्वं ततोप्यतीति विष्णुधर्मोक्तेः। षष्ठ्याद्ये
कादश्यादि पक्षा वापि ज्ञेया वितितत्वं। कालादर्श(?)वापक्षाद्यादि च दर्शांतं पंचम्यादिदिगादि च। अष्ट
म्यादि यथाशक्ति कुर्यादापरपक्षिकम्। पक्षादिः प्रतिपत्। दिग् दशमी। दर्शान्तमिति सर्वत्र। गौतमोपि। अ
पापरपक्षे श्राद्धं पितृभ्यो दद्यात् पंचम्यादि दर्शांतमष्टम्यादि दशम्यादि सर्वस्मिन्वेति। तथैकस्मिन्नपि दि
ने श्राद्धमुक्तं हेमाद्रौ नागरखण्डे। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे।
तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवमिति। अत्र शक्तौ एकं पराव्यवस्थेति प्रांचः। तन्न। तत्र द्वाचकपदाभावात्। त्रयो

दर्शपादिवद्वहएव नित्यः । तत्रैव नित्यं दाक्षतेः ब्राह्मे एवकारेण तस्यैव पंचमपक्षायोगव्यवच्छेदोक्तेरिति गौडाः । तन्न ।
एकस्मिन्नपीतिविरोधात् । तेन फलभूमार्थिनान्यानि कार्याणीति तत्त्वम् । तत्र चतुर्दश्यां आद्याभावे पंचम्यादिदश
म्यादिपक्षौ । तत्सत्वे षष्ठ्याद्येकादश्यादिकौ एवं चतुर्दश्यभावे द्वादश्यादिः । तत्सत्वे त्रयोदश्यादिरिति व्यवस्था । वि
धवायास्तु विशेषः स्मृतिसंग्रहे । चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि । स्वभर्तृश्वशुरादीनां मातापित्रोस्त
थैव च । ततो मातामहानां च श्राद्धदानमुपक्रमेत् । तथा श्वश्रूणां च विशेषेण मातामह्यास्तथैव चेति । अशक्तौ तु स्मृ
तिरत्नावल्यां । स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यस्तथैव च । विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता । विधवा स्वयं
संकल्पं कृत्वान्यब्राह्मणद्वारा कारयेदित्युक्तं । प्रयोगपारिजाते । सकृन्महालये चवर्ज्यतिथ्याद्युक्तो । दृष्टी चंद्रोद
यमाधवप्रयोगपारिजातादिषु वसिष्ठः । नन्दायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु । एषु श्राद्धं न कुर्वीत गृही
पुत्रधनक्षयात् । जन्मभं न तस्य वैधृतिरेव त्रिजन्मानि ह्रद्र गार्ग्यः । प्राजापत्ये च पौष्णे च पित्र्ये भार्गवे तथा । यस्तु
श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति । प्राजापत्यं रोहिणी पौष्णं रेवती पित्र्यं मघा । अन्यान्यपि प्रत्यरादीनि तत्रैव
ज्ञेयानि । केचित्तु । नंदास्वकामरव्यारम्भ निपित्र्ये कालमे । गंडे वैधृतिपाते च पिंडास्त्याज्याः सुतेप्सुभिरिति

संग्रहामन्तः प्रतिपत्षष्ठीकादश्यः। अष्टः सप्तमी। कामत्रयोदशी। आरो भौमः। भृगुः शुक्रः। शनिः कृत्तिको
पित्र्यं भं मघा। कालभं भरणी। अत्र पिंडास्यान्याद्स्याऊः। तत्र मूलं मृग्यम्। एतच्च सकृन्महालयविषयं। सकृन्
महालये काम्ये पुनः श्राद्धे खिलेषु च। अतीतविषये चैव सर्वमेतद्विचिंतयेदिति पृथ्वीचन्द्रोदये नारदोक्तेः। अ
स्नापवादमाद्रे पृथ्वीचंद्रोदये च। अमापाते भरण्यां च द्वादश्यां पक्षमध्यके। तथा तिथिं च नक्षत्रं वारं च न वि
चारयेत्। पराशरमाधवीये मदनपारिजातादिषु चैवम्। निर्णयदीपिकायां तु पितृमृताहेनि निषिद्धदिनेपि
सकृन्महालयः कार्य इत्युक्तं। आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। मृताहनि पितुर्यो वै श्राद्धं दास्यति मा
नवः। तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवमिति नागरखंडोक्तेः। या तिथिर्यस्य मासस्य मृताहे तु प्रवर्त्तते।
सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः। तिथिच्छेदेन कर्त्तव्यो विनाशो वंयहेच्छया। पिंडश्राद्धं च कर्त्तव्यं वि
च्छित्तिं नैव कारयेत्। अशक्तः पक्षमध्ये तु करोत्येकदिने यदा। निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधीति र
कात्यायनोक्तेश्च। अत्र मूलं चिंत्यं। तथा पक्षश्राद्धकरणे पिनंनंदादिषु पिंडनिषेध इत्याह पराशरमाधवीये
कार्ष्णाजिनिः। नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने। नैव नंदादि वर्ज्यं स्यान्नैव निंद्या चतुर्दशीति। अत्र श्रा।

द्धमित्येकवचनाद्दिने दिने इति वीप्सावशाच्च सोमयागवदेकस्याभ्यासेनैकप्रयोगपरमिदं । अतः प्रतिपत्प्रभृ
तिष्वेकां वर्जयित्वा चतुर्दशीमिति । याज्ञवल्कीयं प्रयोगभेदपरं । ननु पंचम्यादिपक्षविषयं । प्रतिपत्प्रभृतिर
त्विति विशिष्योक्तेः । निर्णयदीपे पृथ्वीचंद्रोदये मदनपारिजाते चैवं । अन्ये तु कल्पपरं याज्ञवल्कीयं । एतत्पक्षे
नैकानिंद्या चतुर्दशीति निषेधादिति गौडाः । तन्न । श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये इति विरोधात् । न त्वं तु ति
थ्यंतत्रवारादिनिषेधो यदुदाहृतः । स श्राद्धे तन्निमित्तस्यान्यानुषंगात्कृते ग्रासाविति दिवोदासीये वृद्धगार्ग्यो
क्तेः तन्निमित्ते पक्षांतरे वा ज्ञेयः । सकृन्महालये तु वचनान्निषेधः । अन्यत्र न कोपि निषेधः कार्ष्णाजिनिस्मृतेरिति । अतो
नंदादौ सपिंडकश्राद्धे पुत्रवतोप्यधिकारः । अत्रापि महालयेत्यपाहे च दर्शे पुत्रस्य जन्मनि । तीर्थे पानि व वेत्र पिंडान्र
विवारादिकेष्वपि । पूर्वोक्तनंदादिनिषेधस्तु । मृताहातिक्रमे पौर्णमास्यादिमृतश्राद्धे तन्निमित्ते च ज्ञेयः । यत्तु स्मृत्यर्थ
सारे । विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकं । पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणमिति । तस्यात्रापवादो दिवोदासी
ये बृहस्पतिः । तीर्थे संवत्सरे प्रेते पितृयागे महालये । पिंडदानं प्रकुर्वीत युगादिमरणे मघे । महालये गयाश्राद्धे मा
तापित्रोः क्षयेहनि । कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सदेति । निर्णयदीपे तु नंदादिनिषेधः पक्षमहं भिन्नश्राद्ध

विषयः। षोडशाहव्यापिश्राद्धप्रयोगे कर्त्तव्ये तु प्रत्यहं पिंडदानं कार्यमेवेत्युक्तं। तदयमर्थः संपन्नः। षोडशाहव्या
3 पिश्राद्धैकत्वेन पिंडनिषेधः। मृताहे सकृन्महालयेपि तथेति केचित्। तत्रापि निषेधस्त्वयुक्तः। प्रत्यहं श्राद्धभेदे
पि व्यतीपातादौ च तथा। अन्यत्र मृताहातिक्रमे च पिंडनिषेध इति। संन्यासिनां तु द्वादश्यां श्राद्धं कार्यं। यती
नां च वनस्थानां वैष्णवानां विशेषतः। द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषत इति। पृथ्वीचंद्रोदये संग्रहोक्तेः।
अत्र पक्षे श्राद्धकरणे गौणकालमाह हेमाद्रौ यमः। हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन्। पंचम्योरंतरे द
द्यादुभयोरपि पक्षयोः। आश्विनकृष्णशुक्लपंचम्योर्मध्य इत्यर्थः। तत्राप्यसंभवे भविष्ये। ये वंदीपान्वितार
जनस्थाता पंचदशी भुवि। तस्यां दद्यान्न चेद्दत्तं पितृभ्यो वै महालये। तत्राप्यसंभवे भारते। यावच्च कन्यातुल
योः क्रमादास्ते दिवाकरः। शून्यं प्रेतपुरं तावद्यावद्वृश्चिकदर्शनम्। ब्राह्मे। वृश्चिके समतिक्रांते पितरो दैवतैः सह
। निःश्वस्य प्रतिगच्छंति शापं दत्वा सुदारुणं। यत्तु जातूकर्ण्यः। आकोदंतिस्म पितरः पंचमं पक्षमाश्रिताः। तस्मात्त
त्रैव दातव्यं दत्तमन्यत्र निष्फलमिति। तत्फलातिशयमहानिपरं। कन्यागतस्तु वा न वेति तु यंपादेकापाठः। तेन
कन्यायोगे प्राशस्त्यमात्रं। अतः श्राद्धविवेकोक्तं श्राद्धद्वयं हेयं। इदं च श्राद्धं मलेनैव कार्यं। नामान्यादिना। मृता

हं च सपिंडं च गयाश्राद्धं महालयं। आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचित् इति स्मृतिदर्पणे गालवोक्तेः॥
अथात्र देवताः संग्रहे। तातो वा त्रितयं सपत्नीकं जननी मातामहादित्रयं सस्त्रीकं तनयादितात जननी स्वभ्रातर
स्तत्स्त्रियः। ताताम्बात्मभगिन्यपत्यधवयुक् जायापिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तत्पर
ले। अस्यार्थः। तातत्रयी पितृत्रयी। अंबात्रयी च। स्मृत्यर्थसारेपि। महालये मातृश्राद्धं पृथक् भर्त्रा सह त्रितिअ
त्र विशेषः स्मृतिदर्पणे गालवः। अनेकमातृकस्य यस्य श्राद्धे चापरपक्षिके। अर्घ्यदानं पृथक् कुर्यात् पिंडमेकं तु नि
र्वपेत्। जीवन्मातृकेस्तु सापत्नमातुरेकोद्दिष्टं कुर्यान्न पार्वणं। आब्दिकी पिकायां तु पार्वणमुक्तं। अन्वष्टकायां च यन्मा
तुर्गयाश्राद्धं महालयं। पितृपत्नीयुपच्छ्राद्धं कार्यं पार्वणवज्जवेदिति हेमाद्रौ स्मृत्युक्तेः। सस्त्रीति मातामहानां सपत्नीक
त्वेपि विभवे सति मातामहीनां पृथक् कार्यम्। महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च। तेयं द्वादशदैवत्यं तीर्थश्रो
ष्टमघासु चेति निगमोक्तेः। हेमाद्रिमते त्वेत्र नवदैवत्यमेव। महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च। नवदैवत्य
मत्रेष्टं शेषं षाट्पौरुषं विदुरिति धर्मोक्तेः। तातभ्राता पितृव्यः। जननीभ्राता मातुलः। तत्स्त्रियः पितृव्यस्त्री मा
तुलानी भ्रातृजाया। पितृष्वसृमातृष्वसृस्वभगिन्योऽपत्यभर्तृयुक्ताः। तेन सापत्न्यायै सधवायै इति। प्रयोगोत्रेयः।

एतास्तु सन्नीषु । नतनर्ज्ञोदर्दीनं । सारत्नोपात् । जाया पिता श्वशुरश्वश्रूरपत्रोपलक्षा । अत्र मूलं स्मृतिचंद्रिकायां ते
यं । अत्र पार्वणैकोद्दिष्टव्यवस्थोक्ता हेमाद्रौ पुराणांतरे । उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः । श्वशुरभ्रातृत
त्पुत्रपुत्रत्विकशिष्यकोपकाः । भगिनीस्वामिदुहितृजामातृभगिनीसुताः । पितरौ पितृपत्नीनां पितृमातृष्वसास्व
सा । सखिद्रव्यदशिष्याद्यास्तीर्थे चैव महालये । एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः । इति । इतरेषां पित्रादीनां पा
र्वणमर्घसिद्धम् । अत्र क्रमान्मलेप्याचारव्यवस्था । अशक्तौ तु षष्ठ्यां चंद्रोदये चतुर्विंशतिमते च । एकस्मिन्ब्राह्मणे
सर्वानाचार्यादीन्संभजयेत् । दशाब्दाद्दशा वा पिंडान्दद्यात् करणं तु । सएकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः । एको
द्दिष्टं दैवहीनमेकार्घैकपवित्रकम् । आवाहनाग्नौकरणरहितं त्वपसव्यवदिति । अत्रैकपाको वैश्वदेवं तंत्र
पिंडवाहिर्श्रैकमिति स्मृत्यर्थसारे उक्तं । अत्र पाणिहोमः पिंडश्च द्विजांतिक इत्याह प्रयोगपारिजाते आचार्यः । का
ष्यामभ्युदये ष्टम्यामेकोद्दिष्टमथाष्टमम् । चतुर्ष्वेषु करे होमः पिंडश्चात्र द्विजांतिक इति । पार्वणैकोद्दिष्टयोः समा
नतंत्रत्वे तु अग्निसमीप एव । अत्र धूरिलोचनौ वैश्वदेवौ । अपि कन्यागते सूर्ये काम्ये च धुरिलोचनाविति हेमाद्रा
वादित्यपुराणात् । अत्र प्रतिदिनं भिन्नप्रयोगत्वाद्दक्षिणामेवाप्रयोगेकयादंते एवं वाद दक्षिणेति हेमाद्रावुक्तं ४

एतच्च सन्यस्तपितृकादिना जीवत्पितृकेनापि कार्यम्। हरिद्वोतीर्थे च सन्यस्ते जाते च पतिते सति। येभ्य एव पिता दद्या
त्तेभ्यो दद्यात्स्वयं सुतः इति कात्यायनोक्तेः। यत्तु कौण्डिन्यः। दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं। न जीवत्पितृ
कः कुर्यात्तिलैस्तर्पणमेव चेति तत्सन्यस्तपित्राद्यतिरिक्तविषयं काम्यश्राद्धपरं च। अत्रैव जीवत्कर्तव्यं श्रीपितृकृ
त जीवत्पितृकनिर्णये ज्ञेयं। एतच्च जीवत्पितृकेन पिंडरहितं कार्यं। मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः। न जीव
त्पितृकः कुर्याद्गुर्विणीपतिरेव चेति स्मृतेस्तस्य पिंडनिषेधात्। अन्वष्टक्यमातृवार्षिकादौ तु वचनात्प्रवर्ततीति व
क्ष्यामः। तथा छागलेयः। पिंडो यत्र निवर्तेत मघादिषु कथंचन। सांकल्पं तु तदा कार्यं नियमात्सर्वदा द्विजैः। सां
कल्पस्वरूपं च वक्ष्यते। अत्र श्राद्धं गतपूर्वेण पक्षश्राद्धे प्रतिदिनं श्राद्धोत्तरं सकृन्महालये तु परेह्नि कार्यं। तदुक्तं
नारदीये। पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने। सकृन्महालये चैव परेहनि तिलोदकं। मार्कण्डेयः(?)। पक्षश्राद्धे
हिरण्ये च अनुव्रज्य तिलोदकमिति। तथा प्रयोगपारिजाते गार्ग्यः। कृत्स्ने भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत्
पितृणां प्रत्यहं कार्यं निषिद्धेह्न्यपि तर्पणं। सकृन्महालये [illegible] कार्यं संतत एव हि। इदं [illegible] दिने तिकार्यं।
तिथिवीप्तिविलोपे तु कार्यं प्रेते च सर्वदेति [illegible] विशेषे चेद्यायां [illegible] दर्के। निर

षिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितमिति । स्मृतिरत्नावल्यां विवेनाष्टकाएतत्त्व श्राद्धं मलमासेपि कार्यं ।
5 तदाह भृगुः । वृद्धिश्राद्धं तथा सोमग्न्याधेयं मलमासे यं । राजाभिषेकं काम्यं च न कुर्याद्भानुलंघिते इति । हेमा
द्रौ नागरखंडे पितृमोक्षं यन्नभस्योपाद्मलमासोमपरनभवेत् । सप्तमः पितृपक्षः स्यात्स्यान्नेव तु पंचमः । एत
स्वपित्रोर्मरणे श्राद्धमाहुः ह्लती कृतमिति त्रिस्थलीसेतौ महोदधिः इदं च नित्यकाम्यं । तुश्रानाष्टस्तपारेणपमे सूर्य
मतुलं तथा । यान्नोष्ट पंचमे दत्वा श्राद्धं काम्यं श्राद्धं तु कन्यामिति जाबाल्युक्तेः । वृश्चिके समतिक्रांते पितरो दै
वतैः सह । निःश्वस्य प्रतिगच्छंति शापं दत्वा सुदारुणमिति कार्ष्णाजिनिवचनाच्च । तदतिक्रमे प्रायश्चित्त
मुक्तं स्मार्तविधानात् उरोश्रेयस्य मेषेच दशमासद्विमासयोः । मलमासेपि यत्कृतं न तदासं प्रलीमेति न दितिद्विमास
योः कन्यातुलयोर्मलमासश्राद्धमपहीनमित्यर्थः । अत्र भरण्यां श्राद्धमाहेषु भरिस्तान्न दुक्तं पृथ्वीचंद्रोदये मात्स्ये
। भरणी पितृपक्षे तु महती परिकीर्तिता । अस्यां श्राद्धं कृतं येन सगयाश्राद्धकृद्भवेत् । पृथ्वीचंद्रोदये श्रीधरी
ये बृहस्पतिः । नभस्यापरपक्षस्य द्वितीया यदि याम्यभे । तृतीया चाग्निनाम्नि सहितानापीति दापितुः । एतत्प
ते षष्ठी योगविशेषेण कपिलासंज्ञा । तदुक्तं वाराहे । नभस्य कृष्णपक्षे तु रोहिणीपातमसुते । सुक्ता षष्ठी पुराण

यैः कपिलापरिकीर्तिता । व्रतोपवासनियमैर्भोक्ष्यरं तत्र पूजयेत् । कपिलां च द्विजाग्र्याय दत्वा क्रतुफलं लभेत् । पु
राणसमुच्चये । माघे मासे सिते भानौ चैव कर्के स्थिते । पाने कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् । अत्र दर्शितत्वेन
मन्तव्यो भाद्रकृष्णपक्षोक्तेष्वस्मिन् निर्णयामृते हेमाद्रौ च । हस्तार्कसंयोगफलातिशयार्थैः । संयोगे तु चतुर्णां वै निर
द्दिष्टापरमेष्ठिनेति तत्रैवोक्तेः । अत्र विशेषो हेमाद्रौ स्कान्दे । देवदारुं नयो वीरं कुंकुमेलां मनःशिलां । पत्रकं पद्मकं
षष्ठीं मधुगव्येन पेषयेत् । शरीरं लेपनं तेनोद्वर्तनं कल्केन स्नानं कुर्यात् स मन्त्रकं । आपस्त्वमसि देवेश ज्योतिषां पतिरेव च
। पापं नाशय मे देव वाङ्मनःकायकर्मजं । पंचगव्यकृतस्नानः पंचभंगैस्तु मार्जयेत् । पंचभंगैः पंचपल्लवैः । तथा
रत्नैर्नानाविधैर्युक्तं सौवर्णं कारयेद्रविं । शक्तितस्त्रिपलादूर्ध्वं तदर्धं कर्षतोऽपि वा । सौवर्णमरुणं कुर्याज्ज्ञोकं चै
वतपारणं । अन्यवित्तोऽपि यः कश्चित्सोऽपि कुर्यादिमं विधिं । त्रभासवडे स्थाप्य पद्मे रक्तं कुंकुमचंदनोदकसरितं । रक्त
वस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतं । रथोऽरोक्तपलस्यैव एकचक्रः सुचित्रकः । सुवर्णपलसंयुक्तो मूर्तिस्त्वर्यस्य कार
येत् । ततः सूर्यं च कपिलां च दद्यात्संकल्प्य भक्तितः इति । ततः सूर्यं च कपिलां च षोडशोपचारैः संपूज्य दद्यात् । द्व्यक्षमूर्ति
जगच्चक्षुर्वेदरात्मा दिवाकरः । कपिलासहितो देवो मम मुक्तिं प्रयच्छतु । यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी ।

प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भवेति। विशेषांतरं तत्रैव ज्ञेयमिति दिक्। इयमेव चंद्रषष्ठी। सा चंद्रोदयव्यापिनी ग्राह्या।
6 उभयत्र तथात्वे पूर्वा। तदुक्तं भविष्ये। तद्वज्जाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे। चंद्रषष्ठीव्रतं कुर्यात्पूर्ववेधः प्रशस्यते। चंद्रो-
दये यदा षष्ठी पूर्वाह्णे वापरेऽहनि। चंद्रषष्ठ्यां सिते पक्षे सेवोपोष्या प्रयत्नतः इति। गणेशस्या मामघ्वलापनेन माघाद्वर्षसंक-
ष्ट्याद्यमुक्तं। एतेन माघावर्षमोक्षपद्या ग्रपरपद्देइति। इदं समस्यादि त्रिपक्षहस्तसुकार्यमिति नारायणवृत्तिः। हरदत्त-
स्तुमपघायुक्तवर्षासुमबन्त्रयोदशी श्राद्धमिति व्याचख्यौ। पृथ्वीचंद्रोदये प्रोक्ते। आषाढ्याः पंचमे पक्षे गजयाममध्याष्ट-
मी स्मृता। त्रयोदशी गजच्छाया गयातुल्या तु पैतृके। आश्विनकृष्णाष्टम्यां महालक्ष्मीव्रतं। तत्र निर्णयामृते पुराण-
समुच्चये। श्रियोर्चनं भाद्रपदे सिताष्टमी प्रारभ्य कन्यां गते च सूर्ये। समापयेत्तत्र तिथौ च यावत् सूर्यस्तस्यार्द्धगतो
यु वस्याद् इति तत्रैव। कन्यागतेऽर्के प्रारभ्य कर्त्तव्यं श्रियोर्चनं। हस्तप्रांतदलस्यैकेन च ह्रतलसमापयेत्। पूजनीया
गजहस्त्या नामाष्टमी प्राह विप्रियः। दोषैश्चतुर्भिः संत्यक्ता सर्वसंपत्करी तिथिः। तथा पुत्रसौभाग्यराज्यायुष्यनाशिनी
सा प्रकीर्त्तिता। तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ। विशेषेण परित्याज्या नवमीदूषिता बुधैः यदीति। दोष-
चतुष्टयं तत्रैवोक्तम्। त्रिदिने चावमे चैव अष्टमीं नोपवासयेत्। पुत्रहा नवमीविद्धा। स्वघ्नी हस्तार्द्धगे रवाविति॥

त्रिदिनावमदिनलक्षणंचरत्नमालायां।यत्रैकःस्पृशतितिथिद्वयावसानेवारस्तदवमदिनंतदुक्तमार्यैः।यःस्पृष्टोऽव
तितिथित्रयस्यवारस्त्र्यहस्पृक्कथितमिदंद्वयंचनेष्टम्।एतेचसर्वेनिषेधाःप्रथमारंभविषयाः।मध्येतुसतिसंभवेश
याः।व्रतस्यषोडशाब्दसाध्यत्वेनमध्येत्यागायोगात्।इयंचंद्रोदयव्यापिनीग्राह्या।तत्रैवस्मृत्याद्युक्तेः।परदिनेचंद्रोदया
भावेत्रिमुहूर्त्तव्यापित्वेपरैवकार्या।अन्यथापूर्वैव।पूर्वावापरविद्धावाग्राह्याचंद्रोदयेसदा।त्रिमुहूर्त्तापिसापूज्या
परतश्चोर्ध्वगामिनीति।मदनरत्नेनिर्णयामृतेचसंग्रहोक्तेः।अर्धरात्रमतिक्रम्यवर्त्ततेयोत्तरातिथिः।तदातस्यांति
थौकार्यंमहालक्ष्मीव्रतंसदेति।वचनाच्चेतिसंक्षेपः।इतिमहालक्ष्मीव्रतनिर्णयः॥ ॥अथानवम्यामन्वष्टका
श्राद्धम्।तत्रकात्यायनः।अन्वष्टकासुनवभिःपिंडैःश्राद्धमुदाहृतम्।पित्रादिमातृमध्यंचततोमातामहांतकं।पृथ्वी
चंद्रोदयेब्रह्मांडे।विष्णुलोकप्रयमंदद्यान्मातृणांतदनंतरं।ततोमातामहानांचअन्वष्टक्येक्रमःस्मृतः।श्राद्धहेमाद्रौ[illegible]
गलेयः।केवलास्ताःस्त्रियःकार्याःश्राद्धावाप्तोप्रकीर्त्तिताः।अन्वष्टकासुमध्यस्थानान्याकार्यास्तुमातरः।दीपिकायांतु
मातृश्राद्धमादौकार्यमित्युक्तम्।मातृयजनंत्वन्वष्टकास्वादितइतिहेमाद्रौब्राह्मेपि।अन्वष्टकासुक्रमशोमातृपू
र्वंतदिष्यतेइति।अत्रशाखाभेदेनव्यवस्थेतिपृथ्वीचंद्रोदयः।जीवत्पितृकविषयमितिनिर्णयदीपः।इदंचजीव
त्पितृकेनापिकार्यमितिदुक्तंनिर्णयामृते।मैत्रायणीयपरिशिष्टे।अन्वष्टक्यंगयाप्राप्तौसत्यांयच्चमृतेहनि।मातुःश्रा

दं सुतः कुर्यात् पितर्यपि च जीवतीति। यद्यपि जीवत्पितृकस्य पंचाप्यन्वष्टकाऽनवरूपं कर्त्तव्यास्त थाप्यशक्तस्येयमावश्य
की। प्रोष्ठपद्यष्टकामूयः पितृलोके भविष्यसीति हेमाद्रौ पाठोक्तेः। सर्वासामेवमातृणां श्राद्धं कन्यागते रवौ। नवम्यां हि प्र
दातव्यं ब्रह्मलब्धवरा अनुत इति स्मृतेनावरूपकलोक्तेश्च। अत्र सर्वासामित्युक्तेः स्वमातरि जीवंत्यामपि सपत्नमातृभ्यो द
द्यात्। तन्मरणे सति तस्यै तान्यश्राद्धं दद्यादित्युक्तं। जीवत्पितृकनिर्णये गुरुभिः। अत्र सर्वासां नाम्नानिर्देशे नैको ब्राह्मणो
ध्येः पिंडश्च। नाम्नैकेन तु द्विवचनादिप्रयोग इत्युक्तं नारायणवृत्तौ। अन्वष्टकाश्राद्धं तत्पाठस्थगोभिलीयानां मध्यमा
यामेव न सर्वासु। अन्वष्टक्ये मध्यमायामिति गोभिलगोत्रमावितिच्छंदोगपरिशिष्टात्। अत्र भर्त्तृमरणोत्तरं हर्षमद्ध
तमातृश्राद्धं न कार्यमिति केचिद्दाज्ञः। पुनः तिच्या श्राद्धं नवम्यां कुर्यात्तन्मते भर्त्रादिलुप्यते इति। तदेतन्निर्मूलत्वान्मूर्ख
प्रतारणमात्रं। श्राद्धदीपकलिकायां। ब्राह्मे। पितृमातृकुलोत्पन्ना याः काश्चित्सुमृताः स्त्रियः। श्राद्धार्हा मातरो ज्ञेयाः
श्राद्धं तत्र प्रदीयते इति। अत्र देशाचाराद्व्यवस्था। इदं चानुपनीतेनापि कार्यं। तदुक्तं श्राद्धस्थलपाणौ मात्स्ये। अमावा
स्याष्टकाकृष्णपक्षे पंचदशीषु चेत्यपि धायय। एतच्चानुपनीतोपि कुर्यात्सर्वेष्वपर्वसु। श्राद्धं साधारणं नाम सर्वकामफल
प्रदं। भार्याविरहितोप्येतत् प्रवासस्थोपि नित्यशः। शूद्रोप्यमंत्रवत्कुर्यादनेन विधिना बुधः इति। तेन तत्साग्निरेव द
मिति परास्तं। अन्वष्टकातः पृथगेवेदं मातुः श्राद्धं पित्र्यपि परास्तं। लाघवेन तन्मूले क्यादष्टकपदाद्विशेषाच्चेति नान्य

त्रान्वष्टकाश्राद्धस्यांगस्यात्र प्रधानत्ववचनात् । एवं हेद्रिवराजसूंयांतर्गतायां पत्न्यान्नाद्यकामं यान्नयेदिति ।
फलार्थत्वं । अत्राष्टकान्वष्टकापूर्वेद्युरेव धाता । तथाग्निपुराणे । अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि । अत्र मातुः पृ
थक् श्राद्धमन्यत्र पतिना सह । आपस्तंबानां त्वष्टकासु वृद्धौ चेति भाष्यकारैः । पागदष्टकायां मातृश्राद्धं । छंदोगैस्तु त्र
मातृमातामहश्राद्धेन कार्यं । किंतु त्रिपुरुषमेव । न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते । कर्षूसमन्वितं मुक्त्वा तथाद्यं
श्राद्धषोडशं । प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति छंदोगपरिशिष्टात् । अन्वष्टकासु तेषां कर्षूविधानादि ।
तिशूलपाणिः । यत्तु । तमिस्रपक्षे नवमी पुण्या भाद्रपदे हि सा । चत्वारः पार्वणाः कार्याः पितृपक्षे मनीषिभिरिति तद्दर्शाचा
रतो व्यवस्थितं ज्ञेयं । इदं जीवत्पितृकेनापि सपिंडकं कार्यं हेमाद्रौ विष्णुधर्मोत्तरे । अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं त
थैव च । तत्सु पक्रमस्य । पिंडनिर्वपणं कार्यं तस्यामपि नृपोत्तमेति वचनं श्राद्धविधिना पिंडदाने प्राप्ते पुनरुत्कीर्तनं यस्य
जीवत्पितृगर्भिणीपतित्वादिना पिंडदानं निषिद्धं तस्य तस्याप्यर्थमिति तातचरणाः । अत्र सुवासिनीभोजनमुक्तं मार्कं
डेयपुराणे । मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं । सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत् । भर्तुरग्रे मृता ना
री सह दाहेन वा मृता । तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनीं ॥ तत्रैव मदालसावाक्यं । स्त्रीश्राद्धे पुत्रदाः स्यु

४ रलंकाराश्चयोषिते। मंजीरमेखलादामकर्णिकाकंकणादय इति। अत्राशक्तावनुकल्पमाह आश्वलायनः। अनडु-
हो यवसमाहरेदग्निनावा कक्षमुपोषेदयामेष्टकेति नत्वेवानष्टकः स्यादिति। हेमाद्रौ पितामहः। अमावास्या व्यतीपा-
तयोर्यन्मासस्याष्टकासु च। विद्याच्छ्राद्धमकुर्वाणो नरकं प्रतिपद्यते। अकरणे च प्रायश्चित्तमुक्तमृग्विधाने। एभिर्द्यु-
भिर्जपेन्मंत्रं शतवारं तु तद्दिने। अन्वष्टक्यं यदा श्नन्ति सहर्णं याति सर्वेष्विति। एतत्सद्यो द्वादश्यां विशेषमष्ट पृथ्वीचं-
द्रोदये वायवीये। संन्यासिनो वार्षिकादि पुत्रः कुर्याद्यथाविधि। महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तु तदिति। अ-
पत्रयोदशी श्राद्धं। तत्र चंद्रिकायां त्रयोदशी भाद्रपदी कृष्णा मुख्या पितृप्रिया। तृप्यंति पितरस्तस्यां स्वयं पंच ष्टांते समाः।
मघायुतायां तस्यां तु जलाद्यैरपि तोषिताः। तृप्यंति पितरस्तद्वत्वर्षाणाम युतायुतं। प्रयोगपारिजाते शंखः। प्रोष्ठप-
द्यामतीतायां मघायुक्तां त्रयोदशीं। प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन च। प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तत-
था। नृणां श्राद्धे सदा प्रीताः प्रयच्छंति पितामहाः। एतन्नित्यमपि पृथ्वीचंद्रोदये। विष्णुधर्मे। प्रोष्ठपद्यामतीता-
यां तथा कृष्णत्रयोदशीमित्युक्त्वा। एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः। श्राद्धमेतेष्वकुर्वाणो नरकं प्रति-
पद्यत इत्युक्तेः। एतच्चाविभक्तैरपि पृथक्कार्यं। तथा च हेमाद्रौ। विभक्ता वा विभक्ता वा कुर्युः श्राद्धं पृथक्सुताः॥

मघासु च ततोऽन्यत्र नाधिकारः इयम्विधाविति। अपराह्णे वा यदि वीये। हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी।
तिथिर्वैवस्वती नाम सा छाया कुंजरस्य तु। अत्र च। अपि नः सकुले भूयाद्यो नो दद्यात्त्रयोदशीं। पायसं मधुसर्पि-
र्भ्यां प्राक् छाये कुंजरस्य वेति विष्णुमनुवचने केवलत्रयोदशीश्राद्धे तु मघायुता इति कल्पतरुः। मूलपाणिस्तु केव-
लवाक्यानामर्थवादत्वाद्विधौ मघायोगश्राद्धे विधिलाघवाद्विशिष्टमेव निमित्तमित्याह। वस्तुतस्तु मधुमां-
से श्वराके अपायसेन पायसेन च। एवं नोक्तस्यतिश्राद्धं वर्षासु च मघासु चेति वसिष्ठवचने केवलमघाश्राद्धे वि-
निगमनाभावादुभयं मिलितं निमित्तं। पूर्वोक्तवचनात्त्वयोगाधिकेऽफलाधिक्यं। अत एव याज्ञवल्क्यः। तथा वर्षा-
त्रयोदश्यां मघासु च विशेषत इति। त्रयोदशीश्राद्धं नित्यं काम्यं। अत्र त्रयोदश्यां पाव ऊ पुत्रा युव मारितार्-
स्तु भवंतीत्यापस्तंबोक्तेर्युवमारित्वमपत्यदोषसहिष्णोरपत्यमात्रार्थिनः स्य। तत्तनरो ऽधनार्थिनो वाधिकार इति
कल्पतरुः। अपत्यानिंद्यानर्थिनो नाधिकारस्तत्फलांतरकामस्यैवाधिकार इति हलायुधः। एतत्पिंडरहितं
कार्यं मघायुक्तत्रयोदश्यां पिंडनिर्वपणं द्विजः। सततं तानो नैव कुर्यात् नित्यं नैकवर्योविदुरिति हस्तलपसारोक्तेः॥
इदं मलमासेऽपि कार्यं। मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकं। अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे इति।

क्राव कारणात्तोत्कैः । यानि तु संगिरः । त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः । पंचत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य नि
१ श्चितं । वामनपुराणे । त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान्गृही इत्यादिवचनानि । तानि पुत्रवद्विषयाणि वा मह
लयस्य भिन्नत्रयोदशीविषयाणि । वा काम्यश्राद्धविषयाणि वा सपिंडकश्राद्धविषयाणि वेति केचित् । हेमा
द्रिप्रमुखास्तु कवर्गश्राद्धविषयाणि । श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत् । न तत्र ह्यास्तत्र ये यस्य प्रजा हिं सं
ततिस्य ते इति कात्यायनोक्तेः । यद्यपि पितरो यत्र हन्यन्ते तत्र मातामहाश्च पीति धौम्योक्तेनैकेवलपितृवर्ग
स्य प्राप्तिस्तथापि व्यामोहादिप्राप्तनिषेधोयमित्याहुः । वयं तु पश्यामः । पुत्रवद्विषयाण्येवेति । असंतानस्तु य
स्तस्य श्राद्धं प्रोक्तं त्रयोदशी । संतानमुक्तो यः कुर्यात्तस्य वंशक्षयो भवेदिति । हेमाद्रौ नागरखंडोक्तेः । सर्ववाक्य
मप्यसंतानस्यैवैकवर्गनिषेधकमिति । अत्रेमघात्रयोदशी महालयस्तु गादिश्राद्धाणीं तत्रैव प्रयोगः । न तु
प्रसंगासिद्धिरित्यन्यत्र विस्तरः । अथ चतुर्दशी । पृथ्वीचंद्रोदये प्रचेताः । वृक्षारोहणलोहाद्यैर्विद्युज्जलविषाग्नि
भिः । नखिदंष्ट्रिविपन्नाये तेषां शस्ता चतुर्दशी । आले । युवानः पितरो यस्य मृताः शस्त्रेण वा हताः । तेन कार्यं चतुर्द
श्यां तेषां तृप्तिमभीप्सता । नागरखंडे । अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा । श्राद्धं तेषां प्रकर्त्तव्यं चतुर्दश्यां न

राधिपाः एतच्च प्रायो नाशकस्य शस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेष्टानामिति गौतमोक्तदुर्मरणोपलक्षणं । एक
योगनिर्देशात् । सर्वेषां तुल्यधर्मेणामेकस्यापि यदुच्यते । सर्वेषां तत्समं ज्ञेयमेकरूपा हि ते स्मृता इत्युशनसोक्ते
श्चात एतत्क्रियाणामेवेति वर्द्धमानः । मरीचिः । विषशस्त्रश्वापदादितिर्यग्ब्राह्मणघातिनां । चतुर्दश्यां क्रिया का
र्या अन्येषां तु विगर्हिता । ब्राह्मणघातीत्यनेन हतो न तु ब्रह्महा । तस्य पतितत्वादिति शूलपाणिः । अत्रोद्देश्यविशेष
णस्याविवक्षितत्वात् । स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं कार्यं न पार्वणमिति मदनरत्नोपाध्यायः । इदं विषादि
कहतानामेव न प्रसवादिमृतानामिति वाचस्पतिमिश्राः । यत्तु शाकटायनः । जलाग्निभ्यां विपन्नानां संन्यासे वा
गृहे पिता । श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीमिति । तस्यापश्चिताग्निजलादिमृतविषयमित्याकरे उक्तं । अतएव
वैधत्वात् सहगमनेऽपि न कार्यमिति हेमाद्रिः । एतच्चैकवद्युक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते । तच्छ्राद्धं दै
वहीनं चेत्युत्तरदारधनस्तयः । प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः । दैवयुक्तं तु तच्छ्राद्धं पित्रूणामक्षय्यं भवेत् ।
एकोद्दिष्टं दैवयुक्तमित्येवं मनुरब्रवीत् । भविष्ये पि । समत्वमागतस्यापि पितुः शस्त्रहतस्य च । चतुर्दश्यां तु कर्त्तव्य
मेकोद्दिष्टं महालये । चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणे कृते । एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिन इति संव

त्सरप्रदीपे हारीतः । विश्वेदेवाश्च तत्रापि षड्जयिताततो मलान् । ये वै शस्त्रहतास्तेषां श्राद्धं कुर्यादितं दितः । अत्रैको
10 द्दिष्टवचनानां निर्मूलत्वं । समूलत्वेपि पार्वणप्रयुक्तपरात्ति विध्यादिवचनैः प्रकरणात् । स्वसपत्नीय पार्वणावग
तेरिति शूलपाणिः । तन्न । वाक्येन प्रकरणस्य बाधात् । पित्रादीनां पार्वणाभावादीनामेकोद्दिष्टमिति गौडार्वाचः । तन्
न । पितुरित्यनेन विरोधात् । विशेषवाक्ये पर्युपपत्तेश्च । अत्र शस्त्रहतस्यैव चतुर्दश्यामिति नियमो न चतु
र्दश्यामेव शस्त्रहतस्येति । श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये । पितामहो पि शस्त्रहतश्चेदेकोद्दिष्टद्वयं का
र्यम् । तदुक्तं हेमाद्रौ स्मृत्यंतरे । एकस्मिन्द्वयोर्वैकोद्दिष्टमिति । त्रिषु शस्त्रहतेषु पार्वणमेव कार्यम् । यत्तु देव
स्वामिनोक्तं । त्रिष्वपि शस्त्रहतेषु पृथगेकोद्दिष्टत्रयं कार्यं न तु पार्वणमाहत्यवचनाभावादिति । तदयुक्तं । पित्रा
दयस्त्रयो यस्य शस्त्रेर्प्योनास्तु नुकेमात् । समूहे पार्वणं कुर्याद्दाक्षिका निर्दिश्य कश्यपगिति बृहत्पराशरोक्तेः । एक
स्मिन्वा द्वयोर्वापि विधुच्छस्त्रेणवा हते । एकोद्दिष्टं सुतः कुर्यात्त्रयाणां दर्शवद्भवेदिति स्मृत्यंतराच्चेति पृथ्वीचंद्रोद
येउक्तं । अपरार्के हेमाद्रौ चैवं । यस्त्वत्रैव शस्त्रादिना हतस्तस्य वार्षिकमेव पार्वणमेकोद्दिष्टं वा कार्यं न तु श्राद्धद्वयं ।
प्रसंगासिद्धेरिति पृथ्वीचंद्रोदये । अत्र तस्याद्याकरणेऽग्निमापरपक्षे दिनांतरे पार्वणेनैव कार्यमिति तत्रैवोक्तं । यद्य

पितास्त्रविप्रहतानां चतुर्दश्यामिदं द्विसरीसृपैः। आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेदिति छागलेयाद्यैः शस्
स्त्राद्दिहतानां श्राद्धं निषिद्धं। तथा पितामहादिहतानां श्राद्धं हत्वा कामवत्। हत्वादिपित्र्यं तु द्विपर्वणि हतानां तु न कार्यो।
यत्तु चतुर्दश्यां तत्र लीयानुमा पिंडोदकक्रिया इति ब्राह्मोत्तरकोणमिति मूलपाठः। तत्र गौणमानाभावात्सति तेना
पि कर्त्तव्यं कर्त्तव्यं पतितस्य चेति गयादिवृद्धिश्लोकविधिवलात्पतितानामपि कार्यमिति नव्यगौडाः। तत्त्वे तु समं
त्वमागतस्यैत्या द्विवर्षात्। कृतक्रियाणां कार्यं नान्येषामिति वयं प्रतीमः। यत्तु मनुः। न पैतृयज्ञियो होमो लौकि
काग्नौ विधीयते। न दर्शेन विना श्राद्धमाहिताग्नेर्विधीयते इति। अत्र सर्वं हेतुलैनोक्तं। तथापि तमेव मन्व
ते एवं वीचंत्रोदयः। आहिताग्नेः पिंडपितृयज्ञकल्पेन श्राद्धनिषेधार्थमिदं न तु तत्कल्पादर्शात्यतः गुरवः। क
स्य पक्षश्राद्धमन्यदिने शुश्रामत माहिताग्नेर्दर्शे नियम्यते इति वयं। दर्शेन पार्वणेन विना श्राद्धं न। तेन कापि वार्षि
काद्या वैकोद्दिष्टं नेति हरिहरः। इति चतुर्दशी। अमावास्याविशेषमाह पराशरः यमः। हस्ते करस्थितेनार्के तु अमावास्या
करान्विता। सा ज्ञेया कुंजरच्छाया इति बौधायनोऽपि। वनस्पतिगते सोमे या छाया प्राङ्मुखी गजच्छा
यातु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्। भारते। अजेन सर्वलोहेन वर्षाणां नियमः हस्तिच्छाया सु विधिवत्कर्णे

याजनवीजितं। आद्यं दद्यादिति संक्षेपः। आश्विनशुक्लप्रतिपदि। दौहित्रस्य मातामहश्राद्धमुक्तं हेमाद्रौ संग्रहे
जातमात्रोपि दौहित्रो विद्यमानेपि मातुले। कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते इति। इयं संगवव्यापिनी
ग्राह्येति निर्णयदीपे उक्तं। प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं। श्राद्धं मातामहं कुर्यात् सपितापि संगवे सदा।
जातमात्रोपि दौहित्रो जीवत्स्वपि च मातुले। अतः संगवयोमध्ये याप्यपूर्वा प्रतिपद्ग्राह्येति वचनात्। अत्र समू
लं विमृश्यं। इदं च मलमासे न कार्यं। स्पष्टमासविशेषव्याप्तिविहितं वर्ज्यं मलमासे इति निषेधात्। इदं जीवत्पि
तृकेनैव कार्यमिति शिष्टाः। इदं च शिष्टाचारात् सपिंडं कार्यमिति केचित्। पिंडरहितं तु युक्तं। जीवत्पितृकस्य
मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति दत्तेषु पिंडनिषेधात्। आन्व
ष्टक्यवद्विशेषवचनाभावाच्चेति संक्षेपः। इति कमलाकरभट्टकृते निर्णयसिंधौ महालयनिर्णयः। अथ आश्वि
नशुक्लप्रतिपदि नवरात्रारंभस्तन्निर्णयः। तत्र भार्गवार्चनदीपिकायां देवीपुराणे। शुभमेधा उवाच। शृणु रा
जन्प्रवक्ष्यामि चंडिकार्चनक्रमं। आश्विनस्यासिते पक्षे प्रतिपच्छुभमे दिने। इत्युपक्रम्योक्तं। शुद्धे तिथौ
प्रकर्तव्यं प्रतिपच्चोर्ध्वगामिनी। आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा। अपराह्ने च कर्तव्यं। शुद्धे तं

ततिको त्रिभिः। इदं चापराह्णे योगिन्याः प्राणस्त्व द्वितीयदिने प्रतिपद्दोषभावेऽन्वेषं। तथा तत्रैव देवीपुराणे। प्राम
रतं त्रेच देवीवचः। अमायुक्ता न कर्त्तव्या प्रतिपत्पूजने मम। मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता। आधीः
षोडशनाडीस्तत्र व्यायः कुरुते नरः। कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवं। मार्कण्डेयदेवीपुराणयोः। पूर्वविद्धा तु या
शुक्ला भवेत्प्रतिपदाश्विनी। नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता। देशभंगो भवेत्तत्र दुर्भिक्षं चोपजायते। नंदा
यादर्शयुक्तायां यत्र स्यान्मम पूजनमिति। स्कांदेपि। प्रतिपद्याश्विने मासि सा स्मृता शुभदा भवेत्। माद्धेपं चद
र्शमुख्या कृत्वा तथायुक्ता न शस्यते। विरुद्धफलदा सा हि पुत्रदारभयावहेति। तथा। वर्जनीया प्रयत्नेन अमायुक्ता तु
पार्थिव। द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा। तथा देवीपुराणे। यो मां स्रजयते नित्यं द्वितीयादिगुणान्विता। प्र
तिपच्छारदी त्वास्ता सो भुनते सुखमव्ययं। यदि कुर्यादमायुक्त प्रतिपत्स्थापनं मम। तस्य शापायुतं दत्वा भस्म
सात्करोम्यहं। आयरालं कुरुते यस्तु कलशस्थापनं मम। तस्य संपादिनाशः स्यात्पुत्रोपि न स्यतीति। अमायुक्ता
न कर्त्तव्या प्रतिपच्चंडिकार्चने। धनार्थिभिर्विशेषेण वंशहानिश्च जायते। न दर्शकलया युक्ता प्रतिपच्चंडि
कार्चने। उदये द्विमुहूर्त्तापि ग्राह्या सोदयगामिनीति। देवीपुराणे। याचाश्वयुजि मासि स्यात्प्रतिपद्भद्रयान्विता।

स्तुत्वा मन्त्रार्चनेन तस्याः प्राप्नोति यज्ञफलप्रदं । रुद्रयामले । अमायुक्ता सदा चैव प्रतिपन्निन्दिता मता । तत्र चेत् स्थापयेत् कुंभं दुर्-
भिक्षं जायते ध्रुवं । प्रतिपत्सद्वितीया तु कुंभस्थापनकर्मणीति । यद्यपि रुद्रयामलडामरं च निर्मूलं । तथाप्यविरोधा-
त्प्रचारात्तद्वचनानि लिख्यन्ते । तिथितत्त्वे देवीपुराणे । प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् । प्रातः प्रातश्च सं-
पूज्य प्रातरेव विसर्जयेत् । तत्रैव । शरत्काले महापूजा क्रियते या च वार्षिकी । सा कार्योदयगामिन्यां न तत्र तिथियु-
ग्मता । तथा । कुहूकाष्टोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिं । एतेनाप्यमायोक्ता निन्दिता नाम्पूजने इति । एषु व-
चनेषु कलशस्थापनग्रहणात् तदेव प्रथमदिने विधीयते न तूपवासादि । तस्य प्रतिपद्यप्यमावास्येति युग्म-
वाक्यात् । शुक्ला स्यात्प्रतिपत्तिथिः प्रथमतः इति दीपिकोक्तेः । शुक्ले पक्षे तु दर्शविद्धेति माधवोक्तेश्च । पूर्वदिने प्रात-
स्तदाघे मानाभावादिति केचित् । वस्तुतस्तु पूर्वोक्तवाक्येषु चण्डिकार्चनपूजनग्रहणादुपवासादेरप्यंगत्वात्तत्प्र-
धानदेवीपूजायामपि परेति युक्तम् । कलशस्थापनग्रहणं तूपलक्षणम् । अत एव देवलः । व्रतोपवासनियमे घ-
टिकैकापि या भवेत् । सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके इति । अत्र घटिका मुहूर्त्त इति गौडाः । यत्र तु पूर्वेदि-
ने संपूर्णा शुद्धा च भूत्वा परदिने वर्द्धते तत्रासंपूर्णत्वादमायोगाभावाच्च पूर्वैव । यानि च द्वितीयानिषेधकानि वचना-

योग २

निकेचित्तु तिलान्यपि मुख्याधिकानिषेधपरालिक्य दिने प्रतिपदोत्सेनासत्वेतु दर्शेऽमुनापि सर्वैर्वग्राह्यानदाह लक्ष्मः।
तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति यानि त्वमायुक्ताप्रकर्त्तव्येत्यादीनि नृसिंहप्रसाद
वचनानि तानि समूलत्वे सत्येतद्विषयाणि। अत्रेदंतत्त्वं। पूर्वोक्तसर्ववाक्यानां हेमाद्र्याद्यलिखितत्वेन निमूलत्वात्ते
ष्वान्यनिर्णयस्यानुक्तेः। सामान्यनिर्णयात्सर्वैमेव साम्नावपि गौडनिबंधेषु विशेषनिर्णयादौदयिकीग्राह्या तत्रापि
घटिकैकेत्यस्य द्विमुहूर्त्तस्तुतित्वोक्तेर्द्विमुहूर्त्ताग्राह्या। उदितेदैवतेभानावित्यत्र द्विमुहूर्त्तोतिरस्कृतेति औदयि
क्याद्विमुहूर्त्तत्वनियमात्। तेन उदये द्विमुहूर्त्ताव्याप्त्याद्यनुसारो विमुहूर्त्तमात्राकर्त्तव्येति तु द्विमुहूर्त्तस्तुतिः। अ
न्यथा द्विमुहूर्त्तविधिवैयर्थ्यात्। केचित्तु मुहूर्त्तमात्रेति वचनात् ततोन्यूनत्वे परेणैसाऊः। गौडा अप्येवं। अत्रैव
दीक्षैव प्रधानं उपवासादि तदंगं। अष्टम्यां च नवम्यां च जगन्मातरमंबिकां। पूजयित्वाश्विने मासि विशोको जाय
ते नरः इति हेमाद्रौ भविष्योक्तेः तस्या एव फलसंबंधात्। नवमीतिथिपर्यंतं पूजाजपादिकमिति तत्रैव देवीपु
राणात्। परत्काले महापूजा क्रियते या च वार्षिकीति मार्कंडेयपुराणाच्च। पूर्ववचनादष्टमीनवमीपूजैव प्र
धानमन्यत्सर्वमंगमिति गौडाः। एकाहपक्षोपि देवीपुराणे। यस्त्वेकस्यामथाष्टम्यां नवम्यामथ साधकः। पूज

येद्वरदां देवीं महाविभवविस्तरैरिति। तलं तु रजस्येन यागैः। समप्रधानायाः संहिता अप्यवेक्षेरे तयान्नाद्य कामं(
13 याजये दित्येकत्वान्मध्ये विधानान्वय याफलार्थो बहिः प्रयोगस्तथात्र नवरात्रे मध्यस्यामाः अष्टम्यां नवम्यां वा फला
र्थेः पृथक् प्रयोगः। रूपनारायणधृतदेवीपुराणे। महानवम्यां पूजेयं सर्वकामप्रदायिका। सर्वेषु वत्सवर्गेषु तद्वद्भ
क्त्या प्रकीर्त्तिता। कृत्वाप्नोति यशो राज्यं पुत्रायुर्धनसंपदः। सा च काम्या नित्या च। एवं मन्त्रैरर्पितदा देव्याः कार्यं प्र
पूजनं। विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकमिति। यो मोहाद्यवालस्याद्देवीं दुर्गां महोत्सवे न पूजयति दंभाद्वा
द्वेषाद्वाप्यथ भैरव। क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै इति कालिकापुराणे फलनिंदाश्रुतेः। वर्षे वर्षे विधात
व्यं स्थापनं च विसर्जनमिति तिथितत्त्वे देवीपुराणे च। अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये। एवं च विंध्यवासिन्या
नवरात्रोपवासतः। एकभक्तेन नक्तेन तथैवायाचितेन च। पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे। गृहे गृहे शक्ति
परैर्ग्रामे ग्रामे वने वने। स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः। वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवै
रिति। यत्तु रूपनारायणीयं भविष्ये। एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिरिति। तत्तामसपूजापरमिति। वि
नामंत्रैस्तामसी स्यात् किरातानां तु संमतेति तत्रैवोक्तेः। मदनरत्ने देवीपुराणेपि। कन्यासंस्थे रवौ शक्र शुक्लामार

मनंदिकायायाचीयपवैकाशी नक्ताशी वाप्यवरः। मूलेमोपपीत वामंत्र्य कुमारीर्भोजयेन्मुदा। वस्त्रालंका
रदानैश्च संतोष्याः प्रतिवासरं। बलिं च प्रत्यहं दद्याद्दोदनेमांसमाषवत्। त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायण
इति। नंदिकाप्रतिपदिति मैथिलाः। षष्ठीति गौडाः। तत्र च पूजनं रात्रौ कार्यं। आश्विने मासि मेघांते महिषासुर
मर्द्दिनी। निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमादिति देवीपुराणात्। संग्रहेपि। आश्विने मासि मेघांते प्रति
पद्यातिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं प्रपूजयेत्। रात्रिरूपा यतो देवी दिवारूपो महेश्वरः। रात्रिव्रत
मिदं देवि सर्वपापप्रणाशनं। सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणं। रात्रिव्रतमिदं तस्माद्रात्रौ कर्त्तव्यमिष्यते। न
क्तव्रतमिदं यस्माद्दन्यथा नरकं गतिरित्यादिवचनाच्च। रात्रिव्रतमेवाभिप्रेत्य माधवेनोक्तं तस्य नक्तव्रतत्वादि
ति। ननु रात्रिभोजनादिति। ननु मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः। [illegible]पूज्य नवदुर्गां स्वं नक्तं कुर्यात्
समाहित इति। नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतं। आरंभे नवरात्रस्य [illegible]कोदात्। माधवोक्तेश्च नक्तमेव
प्रधानमिति चेत्। न। नवरात्रोपवासात इत्यादेरनुपपत्तेः। न च पाक्षिकनक्तानुवादो यं। नित्यानित्यसं
योगविरोधात्। [illegible] जिहीर्षेद्रामपद्मे शास्त्रद्धा जुहोतीत्यस्यां[illegible] कामहोमेनुवादो घटते। नित्यवदनु

वासायोगादित्युक्तं वार्त्तिके। तथा चापि। तेनात्र तद्देवे गुणोत्तफलमिति तत्सम्यक्। ननु रात्रेः कर्मकालत्वे तद्व्यापिनी
त्वैव प्रतिपत् प्राप्नुयात्। मैवं। न्यायतः प्राप्तावपि स्मृत्युक्तवचनैर्बाधात्। यथोद्द्धृतेषु कर्मकालव्यापिनीमपि
त्यक्त्वा स्वल्पापि परैव। रामनवमीति माधुकं यथा वाक्यानि प्रमीपेक्षमाना मपि पूर्वां जन्मा ष्टमीं त्यक्त्वा रोहिणीयुक्तापा
रैवेति माधवे। नोक्तं तथा चापि। वस्तुतस्तु रात्रेः कर्मकालत्ववचसा हि माद्यब्दालिखनात्समूलत्वे दिनव्यपमेवा
त्रिकालं दुर्जयेद्दित्यादि सर्वविरोधात्। माधवो किन्तु पादिकन्त्वानुवादद्द्युक्तम्। तस्मात्सर्वपद्दोत्तुपरैव प्रति
पदिति सिद्धं। अत्र केचिन्नवरात्रशब्देन वाहोरात्रपरः। वृद्धो समाप्तिरष्टम्यां क्वासेऽसा प्रतिपन्नवमी। प्रारंभो न
वचंड्याख्यं नवरात्रमतोर्थं वदितिदेवीपुराणादित्याऊः। तन्न। अतिक्रासद्दष्ट्योर्न्यूनाधिक्यत्वापत्तेः। अत्र मूला
भावान्नेन तिथिवाचैवायम्। तदुक्तं। तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकं। अष्टरात्रेन दोषायं नवरात्रेति
थिक्षये इति। स च नवरात्र प्राष्टः। क्वचिद्ब्राह्मणयाकर्मवाची। यथा प्रारंभो नवरात्रस्येत्यत्रेतिदिक्। प्रतिपदिचवे
ध्वत्यादियोगनिषेधो मार्गवार्चनदीपिकायां। देवीपुराणे। त्वाष्ट्रवैधृतियुक्ताचेत्प्रतिपच्चंडिकार्चने। तयोरंते
विधातव्यं कलशारोपणं गृहे इति। चित्रावैधृतियुक्तापदितीयायुता चेत्सैव ग्राह्येत्युक्तं दुर्गोत्सवे। मङ्गानिता

चेत्प्रतिपत्तु लभ्यते विरुद्धयोगेऽपि संगतास्मृती। सैवापराह्णे किंतु वैधृतिविधेया पुत्रराज्यादिविहन्त्रीति य
दातु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते तदोक्तं तत्रैव कौसायनेन। प्रतिपद्याश्विने मासि भवौ वैधृतिचित्रयोः।
आद्यपादौ परित्यज्य प्रारंभेन्नवरात्रकमिति। भविष्येऽपि। चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप। त्याज्याद्यं
शास्त्रयत्वाद्यां तुरीयांशे तु पूजनमिति। रुद्रयामलेऽपि। वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनं। तस्मान्न
स्थापयेत्कुंभं चित्रायां वैधृतौ तथा। संपूर्णा प्रतिपद्येव चित्रायुक्ता यदा भवेत्। वैधृत्या वापि युक्ता स्यात्तदा मध्यं
दिने रवौ। अभिजित्तु मुहूर्त्तं यत्तत्र स्थापनमिष्यते इति। चित्रादिनिषेधे मूलं चिंत्यं। इदं कलशस्थापनं रात्रौ न
कार्यं। न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनमिति मात्स्योक्तेः। भास्करोदयमारभ्य यावत्तु दशनाडिकाः। प्रातः
काल इति प्रोक्तः स्थापनारोपणादिषु इति विष्णुधर्मोक्तेश्च। रुद्रयामले। स्नानं मांगलिकं कृत्वा ततो देवीं प्रपूजयेत्
तां शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकां। यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान्। तत्र संस्थापयेत्कुंभं वि
धिना मंत्रपूर्वकं। सौवर्णं राजतं वापि ताम्रं मृण्मयजं तु वेति। अथ पूजाविधिः। सा च जयंतीमंत्रेण नवाक्षरेण
वा कार्या। तदुक्तं दुर्गाभक्तितरंगिण्यां देवीपुराणे। कुरु देव्याः स्वमंत्रेण पूजां क्षीरघृतादिभिरिति। जयंती मंगला

कालीभद्रकालीकपालिनी। दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते। अनेनैव तु मंत्रेण जपहोमौ तु कारयेदिति। ओं
15 दुर्गे दुर्गे रक्षिणि स्वाहेति नवाक्षरः। तत्र प्रतिपदि प्रातरभ्यंगं कृत्वा देशकालौ संकीर्त्य मम मेह जन्मनि दुर्गाप्रीतिद्वारा
सर्वापच्छांतिपूर्वक दीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयस
दभीष्टसिद्ध्यर्थं शारदं नवरात्रप्रतिपदि विहितकलशस्थापनदुर्गापूजाकुमारीपूजादि करिष्ये इति संकल्प्य
महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति यवान्निक्षिप्य आकलशेष्विति कुंभं संस्थाप्य इमं मे गंगे इति जलेना
पूर्य। गंधद्वारामिति गंधं। या ओषधीरिति सर्वौषधीः। कांडात्कांडादिति दूर्वाः। अश्वत्थे व इति पंचपल्लवान्। स्यो
ना पृथिवीति सप्तमृदः। याः फलिनीरिति फलं सहिरण्यरत्नानीति पंचरत्नानि हिरण्यं च हित्वा युवा सुवासा इति
वस्त्रेण वेष्टयित्वा पूर्णा दर्वीति पूर्णपात्रं निधाय तत्र वरुणं संपूज्य जीर्णायां नूतनायां वा प्रतिमायां दुर्गामावाह्य पूजये
त्। तद्यथा। सर्वोक्तं मंत्रमुक्त्वा आगच्छ वरदे देवि दैत्यदर्पनिषूदनि। पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये। सर्व
तीर्थमयं वारि सर्वदेवसमन्वितं। इमं घटं समागच्छ तिष्ठ देवगणैः सह। दुर्गे देवि समागच्छ सान्निध्यमिह कल्प
य। बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सहेत्यावाह्य सर्वोक्तमंत्रेण षोडशोपचारैः पूजयित्वा माषभक्तबलिं कू

ष्मांडादिबलिं वा निवेदयेत्॥ ततः कुमारीपूजा। तदुक्तं हेमाद्रौ स्कांदे। एकैकां पूजयेत्कन्यामेकवृद्ध्याथ तथैव च। द्विगुणं
त्रिगुणं वापि प्रत्येकं नवकं तु वा॥ नवम्यां नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु। एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं ल
भेत्। एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत्। गंधपुष्पफलादीनां प्रीतिस्तस्या न विद्यते। तेन द्विवर्षमारभ्य दश
वर्षपर्यंता एव पूज्या न त्वन्याः। ताश्च क्रमेण कुमारिका त्रिमूर्तिः कल्याणी रोहिणी काली चंडिका शांभवी दुर्गा सु
भद्रेति नामभिः पूजा कार्या। आसां च प्रत्येकं पूजामंत्राः फलविशेषाश्च तत्रैव ज्ञेयाः। सामान्यतस्तु मंत्राक्षरमयीं
लक्ष्मीं मातृणां रूपधारिणीं। नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं। एवमभ्यर्चनं कुर्यात् कुमारीणां प्रयत्न
तः। कंचुकैश्चैव वस्त्रैश्च गंधपुष्पाक्षतादिभिः। नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः। तथा। ग्रंथिस्फुटितशी
र्णांगीं रक्तपूयव्रणांकितां। जात्यंधां केकरां काणीं कुरूपां तनुरोमशां। संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां। तथा।
ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां। लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम्। दारुणे चांत्यजातानां पूज
येद्विधिना नरः। इति। अत्र वेदपारायणमप्युक्तं रुद्रयामले। एवं चतुर्वेदविदो विप्रान्सर्वान्प्रसादयेत्। तेषां च व
रणं कार्यं वेदपारायणाय वै इति। तथा। एकोत्तराभिवृद्ध्या तु नवमी यावदेव हि। चंडीपाठं जपेच्चैव जापयेद्वा वि

स्वयं च लिखितं यत्तु शूद्रेण लिखितं भवेत् । ब्राह्मणेन लिखितं तच्चापि विफलं भवेत् २

१८ धानतः । तिथितत्त्वे वाराहीतन्त्रे । प्रणवं चादितो जप्त्वा स्तोत्रं वा संहितां पठेत् । अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः । आ-
धारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः । हस्तसंस्थापनादेव यस्माद्धि विफलं भवेत् । ऋषिछन्दादिकं न्यस्य पठेत् स्तोत्रं
विचक्षणः । स्तोत्रे न दृश्यते यत्र प्रणवं तत्र विन्यसेत् । सर्वत्र प्रणवो विज्ञेयस्त्वन्यथा विफलं भवेत् । एवं नवमीपर्यन्तं प्र-
त्यहं प्रत्यहं कुर्यात् । अत्र विशेषो हेमाद्रौ देवीपुराणे । प्रथमादिदिवसे कुर्याच्चण्डिकापूजनादिकं । द्विगुणं तद्द्वितीये
(ह्नि) त्रिगुणं तत्परेहनि । नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकमिति । एतेन नवरात्रे पूजैव प्रधानं । उपवासादि त्व-
ङ्गमिति गम्यते । तिथिह्रासे तु तिथिद्वयनिमित्तं पूजादि महालयश्राद्धवदेकदिने आवृत्त्या कार्यं । वृद्धौ तद्देवावृ-
त्तिः । ततो नवरात्रोपवासादिसंकल्पं कुर्यात् । स्वस्याशक्तावन्येन वा पूजादि कारयेत् । स्वयं वाप्यन्यतो वापि पूजयेत्
पूजयीत वेति तन्त्रं गिरौ (?) देवीपुराणात् । इदं च देवीपूजनं शुक्राद्यस्तादावपि कार्यं । तदुक्तं धर्मप्रदीपे । नष्टे शुक्रे अथ
वा जीवे सिंहस्थे च बृहस्पतौ । कार्या चैव सदेव्यर्चा प्रत्यब्दं कुलधर्मतः इति । मलमासे वचनाभावान्न भवति । अत्रैसा-
म्यवसाम्यपूजनमुक्तं मदनरत्ने देवीपुराणे । आश्वयुक्शुक्लप्रतिपत् स्वातियोगे शुभे दिने । पूर्वं मुनिवरैः सर्वानाम-
प्रथमं श्रियमाहरत् । तस्मात्साम्प्रतं नरैस्तत्र पूज्योसौ मृदुयासह । पूजनीया चतुर्वर्गान्नवमीयावदेवहि । पूर्णतिः स्व

स्थापनं कार्यं तत्रातेषां दिने दिने। धान्यं महत्यातकं कुष्ठं च वासिवार्षिकास्तथा। पंचवर्णेन सूत्रेण ग्रंथितेषां तु वंधये
त्। वायव्ये वारुणैः सौरैः शाक्तैर्मंत्रैः सवैस्तवैः। विश्वेदेवैस्तथाग्नेये होमः कार्यो दिने दिने। कल्पतरौ त्वेतदग्रे न्यद् वि।
ज्येष्ठायोगिपुरांतत्रगजाश्वाष्टोमहावलाः। पृथिवीमवहन्सर्वे सपोलवनकाननां। कुमुदे ऐरावतो पद्मः पुष्पदन्तोथ
वामनः। सुप्रतीकोंजनो नीलस्तस्मात्तांस्तत्र पूजयेत्। प्राकोद्दंतात्समारभ्य नवम्यां तं च पूर्ववत्। अश्व बद्धो मादी
स्वर्धः। अप्ययति पदादि पुविशेषो दुर्गामक्तितारिंगिण्या मभविष्ये। केशसंस्कारद्रव्याणि प्रदद्यात्सप्तिपद्दिने।
पक्षे तैलं द्वितीयायां केशसंयमहेतवे। पट्टडोरमिति गोड पाठः। दर्पणं च तृतीयायां सिंदूरालक्तकं तथा। मधुप
र्कं चतुर्थ्यां तु तिलकं नेत्रमंडनम्। पंचम्यामंगरागं च शक्त्यालंकरणानि च। षष्ठ्यां विल्वतरौ वोधं सायं संध्यासु का
रयेत्। सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत्। उपोषणमथाष्टम्यामाम शक्त्या तु पूजनं। नवम्यामुग्रचंडायाः
पूजां कुर्याद्बलिं तथा। संपूज्य प्रेषणं कुर्याद्दशम्यां सावरोत्सवैः। अनेन विधिना यस्तु देवीं प्रीणयते नरः। स्के दव
त्पालयेद्देवी तं पुत्रधनकीर्तिभिः। कृत्स्नं तत्राणि वेलैंगे। कन्यायां कृष्णपक्षे तु पूजयित्वाऽष्टमे दिवा। नवम्यां वोध
येद्देवीं महाविभवविस्तरैः। शुक्लपक्षे चतुर्थ्यां तु देवीकेशविमोक्षणं। प्रातरेव तु पंचम्यां स्नापयेत्तु शुभैर्जलैः।

षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेधिवासनं। सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणं। पूजा च जागरश्चैव नवम्यां वि-
17 धिवद्बलिः। विसर्जनं दशम्यां तु क्रीडाकौतुकमंगलैः। अत्र नवम्यां बोधनासामर्थ्ये षष्ठ्यां बोधनमिति स्मार्त्ताः। फल-
भूमार्थिनः समुच्चय इत्यन्ये। नवम्यां मंत्रः कालिकापुराणे। इषे मास्यसिते पक्षे नवम्यामार्द्रभे पिवा। श्रीवृक्षे बो-
धयामि त्वां यावत्पूजां करोम्यहं। अत्र स्त्रीव्रते विशेषः परिभाषायां ज्ञेयः। अपाशौचे विशेषो निर्णयामृते विश्व-
रूपनिबन्धे। आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके। शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः। सूतके वर्त्त-
माने च तत्रोत्पन्ने सदा बुधैः। देवीपूजा प्रकर्त्तव्या पशुयज्ञविधानतः। सूतके पूजनं प्रोक्तं दानं चैव विशेषतः। दे-
वीमुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते इति। कालादर्शे विष्णुरहस्येपि। पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः।
तत्कर्त्तव्यं नरैः शुद्धं दानार्चनविवर्जितमिति। गौडनिबंधे तिथितत्त्वेप्युक्तं। आश्विनकृष्णनवम्यादिशुक्लप-
तिपदादिषष्ठ्यादिसप्तम्यादिकैककर्म आरम्भमध्ये आशौचपातेपि न दोषः। संकल्पव्रतसत्रयोरिति विष्णूक्ते-
रिति। आरब्धं स्वयमेव कार्यं अनारब्धं त्वन्येन कारयेदिति दिवोदासः। रजस्वला त्वन्येन कारयेत्। सूतका-
दिवद्विशेषवचनाभावात्। स्त्रीणां च नवरात्रे तांबूलादिचर्वणं भवति। तदुक्तं व्रतहेमाद्रौ गारुडे। गंधालंकार

तांबूलपुष्पमालानुलेपनं। उपवासेन दुष्यन्तिदंतधावनमञ्जनमिति। एतत्सामर्थ्ये कोपवासविषयं। अन्यत्रा
त्रविशेषः। परिभाषायामुक्तेः। आश्विनशुक्लपंचम्यामुपांगललिताव्रतं महाराष्ट्रेषु प्रसिद्धं। तत्र यद्यपिक
ष्यायां कालविशेषो नोक्तस्तथापि रात्रौ जागरणं कुर्यात् गीतवादित्रनिस्वनैरिति रात्रौ जागरोक्तेः प्रक्लिप्तजाया
रात्रौ प्राशस्त्यात्सा च रात्रिव्यापिनी ग्राह्येति केचित्। वस्तुतस्तु। वचनं विना रात्रौ प्रजायामानाभावात्। जागरस्य
चांगत्वात्। युग्मवाक्यात् भुक्त्वा जागरणेन केचं द्रायधिव्रते तथा। ताराव्रतेषु सर्वेषु रात्रियोगो विशिष्यते। इति
कालहेमाद्रौ वचनाच्च पूर्वविद्धायां ग्राह्या। एतेन निशीथः पूर्वविद्धावचनमिति हेमाद्रिः। अस्य च भुक्त्वा जागरणरूपत्वा
दिति साधु प्रतीमः। भुक्त्वा जागरणं यत्रेत्येकं पदं। तस्मिन्व्रते इत्यर्थः। अन्यथा भुक्त्वेत्यसंगतेः। दिवोदा
सीयेप्येवं। आश्विनशुक्लपक्षे मूलनक्षत्रे सरस्वतीस्थापनं। यथोक्तं निर्णयामृते देवीपुराणे। मूलऋक्षे
सुराधीश पूजनीया सरस्वती। पूजयेत्सत्सहं देवयावद्वैष्णवमृक्षकं। नाध्यापयेन्न च लिखेन्नाधीयीत कदा
चन। उत्तरके स्थापिते देवि विद्याकामो द्विजोत्तमः। संग्रहे। आश्विनस्य सितपक्षे मेधाकामस्सरस्वतीं
मूले नावाहयेद्देवीं श्रवणेन विसर्जयेत्। मूलस्याद्यपादे आवाहनमिति शिष्टाः। श्रवणाद्यपादेषु वि

१४ सर्जयेत्। आदिभागो निशायां तु श्रवणस्य प्रदायते। संप्रबोधनं तद्देव्या दशम्यां च महोत्सव इति चिंतामणौ ब्रह्मां
डपुराणात्। अथ षष्ठीयोगे निर्बंधो देवीपुराणे। ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमंत्रणं। सप्तम्यां मूलयुक्तायां प
त्रिकायाः प्रवेशनम्। पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणं। उत्तरेणनवम्यां तु बलिभिः पूजयेच्छिवां। श्रवणेन
दशम्यां तु प्रणिपत्य विसर्जयेत्। कालिकापुराणे। बोधयेद्बिल्वशाखायां षष्ठ्यां देवीफलेषु च। सप्तम्यां बिल्वशा
खां तामाहृत्य प्रतिपूजयेत्। पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत्। जागरं च स्वयं कुर्याद्बलिदानं महा
निशि। प्रभूतबलिदानं तु नवम्यां विधिवच्चरेत्। विसर्जनं दशम्यां तु कुर्याद्वै शाबरोत्सवैः। धूलिकर्दमनिक्षेपैः
क्रीडाकौतुकमंगलैः। अत्र सर्वत्र तिथिनक्षत्रयोगादरो मुख्यः कल्पः। तदभावे तु तिथिरेव ग्राह्या। तिथिः शरीरं
देवस्य तिथौ नक्षत्रमाश्रितं। तस्मात्तिथिं प्रशंसंति नक्षत्रं न तिथिं विनेति विद्यापतिलिखितवचनात्। तिथिनक्ष
त्रयोर्योगे द्वयोरेवानुपालनं। योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणीति तत्रैव देवलोक्तेश्च। अत्र च पत्रीप्रवे
शात्पूर्वेद्युः सायंकाले षष्ठ्यभावे तत्पूर्वदिनेधिवासनं कार्यं। सायंकालेस्तंतासत्वे त्वधिवासनलोपः। षष्ठ्यां सा
यं प्रकुर्वीत बिल्वे हृद्येधिवासनमिति पूर्ववचनादिति कल्पतरुः। सायं प्रातिः फला[illegible]मा[illegible]यानुकर्मेणो

पद्मस्याचार्यचूडामणेः। अत्र क्रमः। बिल्वसमीपं गत्वा देवीं बिल्वं च संकल्प्य प्रार्थयेत्। तत्र मंत्रः। रावणस्य वधार्थाय रा
मस्यानुग्रहाय च। अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा। अहमप्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यतः। श्रीशै
लशिखरे जातः श्रीफलः श्रीनिकेतनः। नेतव्योसि मया गच्छ पूज्यो दुर्गास्वरूपत इति। एवं देवीमधिवास्य परदिने नि
मंत्रितबिल्वशाखापत्रीप्रवेशः। तदुक्तं हेमाद्रौ लैंगे। मूलाधावेतु सप्तम्यां केवलायां प्रवेशयेत्। युग्मायां
नवबिल्वस्य फलाम्पां शाखिकां तथा। तथैव शतिमां देव्याः स्नात्वा पुष्पं प्रवेशयेत्। अत्र चोपवासपूजोत्सवो दधि
की सप्तमीग्राह्या। ननु युग्मवाक्यात् त्पूर्वा। युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया। रवेरुदयमीक्षंते न तत्र तिर
थिर्युग्मतेति कृत्यतत्त्वार्णवोदाहृतवचनात्। भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः। तिथावुदयगामिन्यां स
र्वास्ताः कारयेद्बुध इति तिथितत्त्वे नंदिकेश्वरपुराणाच्च। दुर्गाभक्तितरंगिण्यामप्येवं। तत्रापि घटिकान्यूनत्वे
परा कार्या। व्रतोपवासनियमे घटिकैकापि या भवेदिति देवलोक्तेरिति गौडाः। दाक्षिणात्यास्तु पूर्वा वचनमहत्त्वात् पु
ग्मवाक्यात् सर्वे कुर्वंति। पत्रिकापूजा च सर्वोक्ता एव कार्या न तु मूलानुरोधात् मध्याह्नोदाविति कृत्यतत्त्वार्णवे उक्तेः प
त्रिकास्तु। रंभा कच्वी हरिद्रा च जयंती बिल्वदाडिमौ। अशोको मानवृक्षश्च — धान्यादि नव पत्रिका इति तंत्रे वाक्यैः॥

अस्यामेव सप्तम्यां देवीत्रिरात्रमुक्तं हेमाद्रौ। प्रतिपदादिनवतिथिषु उपवासादिकरणासामर्थ्ये सप्तम्यादिदिनत्रये वा कु
र्यात्। तदाह धौम्यः। आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकं। प्रतिपदाक्रमेणैव यावच्च नवमी भवेत्। त्रिरात्रं वापि कर्त्तव्यं
सप्तम्यादि यथाक्रमं। अत एव हेमाद्रौ देवीपुराणे मंगलाव्रते। आश्विने वाथवा माघे चैत्रे वा श्रावणेऽपि वा। कृत्वाष्टम्या
दिकर्त्तव्यं व्रतं शुक्लावधिं हरेः। यावच्छुक्लाष्टमी शाकेडपोष्या व्यात्तु विधानतः। दानं होमो जपः पूजा कन्याभोज्यास्त
थान्वहं। महाभैरवरूपेण अस्थिमालाधराय ये। पूजनीया विशेषेण वस्त्रैर्गीमपुरादिषु। इति मासचतुष्टये मिधा
य। अथवा नवरात्रं च सप्त पंच त्रिकं दिवा। एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात्। पूजयेताश्विने शुक्ले यावच्छुक्ला
ष्टमी भवेत्। सर्वकार्याणि सिध्यन्ति शक्रनास्यत्रसंज्ञा यद्युक्तं। दिवेत्येकरात्रमुक्तं। देवीपुराणे। नवरात्रव्रते शक्त
त्रिरात्रं चैकरात्रकं। व्रतं चरति यो भक्त्या स्तस्मै दास्याम्यवांछितं। तत्रापि सप्तम्याः पूजने पूर्वोक्तो निर्णयः। अत्र तिथि
योगपद्येतत्रैणोपवासः। तिथिद्वयनिमित्तं पूजादिकं तु भेदेन। अत्र विशेषो निर्णयामृते भविष्ये। सप्तम्यां नवगेहा
नि दारुजानि नवानि च। एकं वा वित्तभावेन कारयेत्सुसमाहितः। दुर्गागृहं प्रकर्त्तव्यं चतुरस्त्रं सुशोभनं। तन्मध्ये वेदि
कां कुर्याच्चतुर्हस्तां समां शुभां। तस्यां सिंहासनं स्थाप्य सोमं कंबलाजिनसंयुतं। तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां मां।

भुजैश्चतुर्भिः रुचिरैर्दशभिर्वा विभूषिताम् । तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखरां । अनेककुसुमाकीर्णां कपर्देन सु
शोभितां । नितंबबिंबसंनद्धकिंकिणीक्वणनादितां । शूलचक्रदण्डशक्तिवज्रपाशासिधारिणीं । घंटाक्षमालाकर
कपालपात्रलसत्कराम् । तदग्रे छिन्नशिरसं महिषं रुधिराप्लुतं । निःसृतार्धतनुं कंठनाले चर्मासिधारिणं । देवीध्व
तकरग्रीवं शूलेनोरसि ताडितम् । नागपाशेन विहितं हयदत्तेणापि विप्लुतं । वमद्रुधिरवक्त्रेण धुन्वतो ध्वंसयानुरूपां ।
सर्वतो मातृचक्रेण संभ्रमानानुरेस्तथेति । तत्र देवी प्रकर्तव्या हेमी वा राजती तथा । मृद्दार्वी लक्षणोपेता खड्गशू
ले च पूजयेत् । वा दार्वी दारुमयी । देवीमूर्तिस्थापने विशेषो दुर्गाभक्तितरंगिण्यां देवीपुराणे । याम्यास्याशुभदा दुर्गा
पूर्वास्या जयवर्द्धिनी । पश्चिमाभिमुखी नित्यं न स्यात्सौम्यदिङ्मुखी । अतिमात्रविशेषस्तत्रैव । हेमराजतमृ
न्मातुशैलचित्रार्पिता पि वा । खड्गे शूले चित्रिता देवी सर्वकामफलप्रदा । यद्यद्यस्यायुधं प्रोक्तं तस्मिंस्तान्प्रतिपूजये
त् । देवीभक्त्यार्चिता पुंसां राज्यायुःसुतसौख्यदा । कृत्यतत्त्वार्णवे कालिकापुराणे । लिंगस्थां पूजयेद्देवीं मंडलस्
स्यां तथैव च । पुस्तकस्थां महादेवीं पावके प्रतिमासु च । चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत् । बिल्वपत्रे य
जेद्देवीं तथा जातीप्रसूनकैः । नानाविधैश्च नैवेद्यैर्धूपदीपैर्मनोहरैः । भगलिंगाभिधाने श्रीभगलिंगार्चितकैः ।

भगलिंगक्रियाभिज्ञश्रीणयेद्वरचंडिकां। परैर्नो हिंप्यते यस्मात्प्रपरान्नाहिंप्यपि। तस्मात्तु या भगवती श्मशानचंडा सुर-
२० दारुणा। चित्रमत्रैव या देवी स्नानाद्यसंभवे तत्रैवोक्तं। अतिकस्यापि तेखड्गे स्थापयेद्दर्पणेऽथवेति॥ ॥अथ सप्तमी
पूजाविधाविधिः। प्रतिपद्युक्तविधिना फलसंकीर्त्तनं नीते। नवपत्रिकामृन्मयदुर्गापूजाबलिदानानि कारयेदिति संक-
ल्प्य पूर्वं बलिमंत्रितबिल्वसमीपं गत्वा संपूज्यागच्छ सर्वकल्याणीति पूर्वोक्तमंत्रं पठित्वा। बिल्ववृक्ष महाभाग सदा त्वं
शंकरप्रिय। गृहीत्वा तव शाखां च देवीपूजां करोम्यहं। शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो। गृहीत्वा तव शाखां
च पूज्या दुर्गेति च स्मृतिः। उत्तिष्ठ पत्रिके देवि सर्वकल्याणहेतवे। पूजां गृहाण सकलामस्माकं वरदा भव। मेरुमंद-
रकैलासहिमवच्छिखरे गिरौ। जातः श्रीफलवृक्षत्वमम्बिकायाः सदा प्रिय इति संप्रार्थ्य। ओं छिंधि फट् स्वाहा ओं
हुं फट् स्वाहेति छित्वा संपूज्य। ओं चामुंडे बल इति वाद्यघोषेण देवीं तां च गृहे प्रवेश्य। आरोपितासि दुर्गे त्वं मृण्म-
य्यां श्रीफले त्वं च। स्थिरा नित्यं तत्र भूत्वा च गृहे त्वं कामदा भवेति। स्थिरीकृत्य रंभादिपत्रिकाः पंचगव्येन पंचामृतेन च स्नापयि-
त्वा वस्त्रेणावेष्ट्य स्थापयेत्। ततः पूर्ववत्संकल्पं कृत्वाऽऽवाहितानां तयदेवीनामावाहयेत्। आवाहयाम्यहं देवि मृण्मय्यां श्रीफ-
ले तथा। कैलासशिखराद्देवि विन्ध्याद्रेर्हिमपर्वतात्। आगत्य बिल्वशाखायां चंडिके कुरु सन्निधिं। स्थापितासि मया

दुर्गे पूजये त्वां प्रसीद मे। आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते। दुर्गे दुर्गस्वरूपासि सुरतेजोमयो र्चिते। पल्लवैश्च फलो
पेतैः पुष्पैश्च सुमनोहरैः। पल्लवैस्संस्थिते देवि पूजये त्वां प्रसीद मे। दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय। यज्ञभागं
गृहाण त्वं योगिनी कोटिभिः सहेति। ततो मूलमंत्रेण पाद्यादिगंधान्तोपचारैः संपूज्य अक्षतोज्ज्वलं च अंजलिं शंकरस्य
सदा प्रियं। बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरीति बिल्वपत्रं। ब्रह्मा विष्णुशिवादीनां धूपेण पुष्पं सदा प्रियं। तत्ते दुर्गे
प्रयच्छामि सर्वकामार्थसिद्धये। इति धूपेण पुष्पानि वेद्य धूपादि दत्वा ततः पूजां मूलेन कृत्वा प्रार्थयेत। ॐ महिषघ्नि मह
हामाये चामुंडे मुंडमालिनि। आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते। कुंकुमेन समालब्धे चंदनेन विलेपिते। बिल्व
पत्रकृतापीडे दुर्गेहं शरणं गतः। रूपं देहि धनं यशो देहि भगं भगवति देहि मे। पुत्रान्देहि धनं देहि सर्वान्कामांश्च दे
हि मे। सर्वमंगलमंगल्ये इति च संप्रार्थ्य पत्रिकाः पूजयेत। कदल्या ब्राह्मणी दाडिमे रक्तदंतिका धान्ये लक्ष्मीहरि
द्रायां दुर्गा माने चामुंडा कच्वी कालिका बिल्वे शिवा अशोके शोकरहिता जयंत्यां कार्त्तिकी चावाघसंपूज्य दुर्गायै बलिं
दद्यात। अत्र शस्त्रादि पूजा वक्ष्यते। ततः स्तुतिं पठेत। तद्दुक्तं शिवरहस्ये। दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः
प्रियां। सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवाम्। मंगलां शोभनां सिद्धां निःकलां परमां कलां। विश्वेश्वरीं विश्वमा

21 तां चंडिकां प्रणमाम्यहं ॥ सर्वदेवमयीं देवीं सर्वरोगभयापहां ॥ ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमां ॥ विंध्यस्थां विंध्यनिल
यां दिव्यस्थाननिवासिनीं ॥ योगिनीं योगमातां च चंडिकां प्रणमाम्यहं ॥ ईशानमातरं देवीं ईश्वरीमीश्वरप्रियां ॥ प्रणतोऽस्मि
सदा दुर्गां संसारार्णवतारिणीं ॥ य इदं पठते स्तोत्रं शृणुयाद्वापि यो नरः ॥ समुक्तः सर्वपापैस्तु मोदते दुर्गया सह ॥ अथ महाष्ट
मी ॥ सा च परयुता शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति ॥ ब्रह्मवैवर्त्ते तु मद
नरत्नेऽस्मृतिसंग्रहे ॥ शरन्महाष्टमी पूज्या नवमीसंयुता सदा ॥ सप्तमीसंयुता नित्यं शोकसंतापकारिणी ॥ जंभेन सप्तमी
युक्ता पूजिता तु महाष्टमी ॥ इंद्रेणाभिहतो जंभस्तस्माद्दानवपुंगवः ॥ तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी ॥ वर्जनी
या प्रयत्नेन मनुजैः शुभकांक्षिभिः ॥ सप्तमीशल्यसंयुक्तां मोहाद्दज्ञानतोऽपि वा ॥ महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ॥ स
प्तमीकलया यत्र परतश्चाष्टमी भवेत् ॥ तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदं ॥ तथा ॥ पुत्रान् हंति पशून् हंति राष्ट्रं हंति
सराजकं ॥ हंति जातानजातांश्च सप्तमीसहिताष्टमी ॥ तेन त्रिमुहूर्त्तवेधः ॥ तद्घटिकामात्राप्यौदयिकी ग्राह्या ॥ व्रतोप
वासनियमे घटिकैकापि या भवेदिति देवलोक्तेः ॥ गौडास्त्वेवमाहुः ॥ अत एवोक्तं भोजराजेन ॥ न च सप्तमीशल्यस
मोपेतेति ॥ इयं भौमेति प्रशस्ता ॥ अष्टम्यामुदिते सूर्ये दिनोऽते नवमी भवेत् ॥ कुजवारो भवेत्तत्र स्रजनीया प्रयत्नतः

तिमदनरत्नेवचनात्। सप्तमीशल्यसंविद्धा वर्जनीया सदाष्टमी। स्तोकापि सा महापुण्या यस्मात्सूर्योदये भवेदिति म
दनरत्ने स्मृतिसमुच्चयवचनात्। अष्टमी नवमीयुक्ता नवमी चाष्टमीयुतेति पाद्मवचनाच्च। इयमेव मूलयुक्ता चे
न्महानवमीसंज्ञा। आश्वयुक्शुक्लपक्षे याष्टमी मूलेन संयुता। सा महानवमी प्रोक्ता त्रैलोक्येष्वपि दुर्लभेति हेमा
द्रौ स्कांदात्। मूलयुक्तापि सप्तमीयुता चेत्सा त्याज्यैवेत्युक्तं निर्णयामृते दुर्गोत्सवे। मूलेनापि हि संयुक्ता सदा त्याज्याष्ट
मी बुधैः। लेशमात्रेण सप्तम्या अपि स्याद्यदि दूषिता। महाष्टमी दर्वैघुः सर्वा [illegible] व्यापिनी पूर्वान्यथा परैवेति निर्णय
दीपमतं। एतच्च तु [illegible] नारायण [illegible] देवीपुराणे। सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी। पु
त्रदारधनैर्हीना भ्रमंतीह पिशाचवत्। यत्तु सप्तम्यामुदिते सूर्ये परतोयाष्टमी भवेत्। तत्र दुर्गोत्सवं कुर्यान्न कु
र्यादपरेहनीति विष्णुधर्मनिबंधवचनं तदाश्विनकृष्णाष्टमीविषयम्। कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमी
दिने। नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैरिति देवीपुराणे तत्रापि पूर्वोक्तेरिति हेमाद्रौ निर्णयामृते चोक्ते
र्यानि तु। भद्रया भद्रकाल्याश्च मध्ये स्याद्यदि चेन्नक्रिया। तस्माद्धि सप्तमीविद्धा या [illegible] दुर्गाष्टमी बुधैरिति
पत्रमोरक्षूलोनरे [illegible] च। आश्विनस्य सिताष्टम्यामर्द्धरात्रे तु पार्वती। भद्रकाली समुत्पन्ना [illegible] पाढा सममाधुर

तेति । तथा । नवम्यां भद्रकाली दक्षयज्ञविनाशिनी । प्रादुर्भूता महाघोरा योगिनीकोटिभिः सहेति । य
श्च मदनरत्ने । महाष्टम्यामाश्विने मासि शुक्ले लोककल्याणकारिणी । सद्यस्त्वाविर्भुता कालीमूले न तु विशेषत इति । ता
नि परदिने ऽष्टम्यभावविषयाणीति मदनरत्ने उक्तं । यत्तु तत्रैव परदिने ऽष्टमीसत्वेपि पूर्वविद्धां विधाय केवल
ने । यदाष्टमी तु संप्राप्य स्वल्पा याति दिवाकरे । तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेहनि । दुर्भिक्षं तत्र जानीयान्न
वम्यां यत्र पूज्यते इति तत्परदिने दशम्यां नवम्यभावविषयं । यदा तूर्योदये न स्यान्नवमी चापरेहनि । तदाष्टमी
प्रकुर्वीत सप्तम्या सहितां नृप इति तत्रैव स्मृतिसंग्रहोक्तेः । उत्तरास्तिथयो यत्र ह्रस्वं यान्ति नराधिप । पूर्वाष्टमी त
दा कुर्यादन्यथा लक्ष्मीर्न भवेदिति दुर्गोत्सवोक्तेश्चेति मदनरत्ने । वस्तुतस्तु इदं वचनद्वयं अष्टमीनवम्योः
सूर्योदयद्वयासंबंधपरं । अत एव नवमी चेति चकारादष्टमी च । तिथयश्चेति बहुवचनादष्टमीनवमीदश
म्युक्ताः । अन्यथा पूर्वोक्तविरोधादिति दिक् । यत्तु अहं भद्रा च भद्राहं नावयोरंतरं क्वचित् । सर्वसिद्धिप्रदा स्यामि भ
द्रायामर्चिता सहेति देवीपुराणे तद्विष्टिकरणमध्ये पूजाविधानार्थं विष्टिस्पर्शे महाष्टम्यां मम पूजां करोति
यः । तस्य पूजाफलं नास्ति नाहं भवामि नितेति तत्रैवोक्तेरिति निर्णयामृते । तथा कालिकापुराणे । स संप्राप्ते पत्रिकाप्र

जाग्रष्टम्यां वा प्रपोषणं । पूजा च जागरश्चैव नवम्यां विधिवद्बलिरिति । अष्टम्युपवासश्च पुत्रवता न कार्यः । उपवासं म
हाष्टम्यां पुत्रवान्न समाचरेत् । यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेदिति तत्रैवोक्तेः । रूपनारायणीये ब्राह्मे स्मृतौ
थोः पूजनीया सा तस्मिन्नहनि पंडितैः । उपोषितैर्वस्त्रमाल्यधूपरत्नानुलेपनैः । पशुभिः पानकैर्हृद्यैः रात्रौ जागरणे
न च । दुर्गागृहे च शस्त्राणि पूजितव्यानि पंडितैः । खड्गमांडानि चित्राणि कवचान्यायुधानि च । अत्र विशेषो हेमा
द्रौ निर्णयामृते भविष्ये । आश्वयुक्शुक्लपक्षस्य अष्टमी मूलसंयुता । सा महानवमी नाम त्रैलोक्येपि सुदुर्लभा
। कन्यागते सवितरि शुक्लपक्षेऽष्टमीयुता । मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता । नवम्यां पूजिता देवी ददात्यभि
मतं फलम् । सा पुण्या सा पवित्रा च सा धन्या सुखदायिनी । तस्यां सदा पूजनीया चामुंडा मुंडमालिनी । संदेसुर
क्तैर्नित्यतावि । तस्यां ये त्वनुपूज्यंते प्राणिनो महिषादयः । सर्वे ते स्वर्गतिं यांति घ्नतां पापं न विद्यते । यावन्न चाल
येज्जात्रं पशुस्तावन्न हन्यते । न तथा बलिदानेन पुष्पधूपविलेपनैः । यथा संतुष्यते मेषैर्महिषैर्विंध्यवासिनी ।
एतद्विविंध्यावासिन्या नवरात्रोपवासतः । एकभक्तेन नक्तेन तथैवायाचितेन च । पूजनीया जनैर्देवी स्थाने
स्थाने पुरे पुरे । गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने । स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः । वैश्यैः शूद्रैः

23 भक्तियुते म्लेच्छैरन्यैश्च मानवैः॥ श्रीभिश्च कुरु शार्दूल तद्विधानमिदं शृणु। जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्र
मात्। लोहाभिसारिकं कर्म कारयेद्यावदष्टमीमिति। लोहाभिसारिककर्मविधानं तत्रैवोक्तं। प्रागुदक्प्रवणे देशे प
ताकाभिरलंकृते। मंडपं कारयेद्दिव्यं नवसप्तकरं परं। षोडशहस्तमित्यर्थः। आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनं। नामि
खलात्रयसंयुक्तं योन्याऽश्वत्थदलाभया। राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च। आनीय मंडपे तानि स
र्वाण्यत्राधिवासयेत्। ततस्तु ब्राह्मणः स्नातः शुक्लांबरधरः शुचिः। ओंकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्घृतम्।
शस्त्रास्त्रमंत्रैर्होतव्यं पायसं घृतसंयुतं। हुतशेषं तु रंगाणां राजानमुपहारयेत्। लोहाभिसारिकं कर्म तेनैनं तदृषिभिः
स्मृतं। घृतपल्ल्ययनानश्वान् गजांश्च समलंकृतान्। भ्रामयेन्नगरे नित्यं वंदिघोषपुरःसरान्। प्रत्यहं नृपतिः स्नात्वा
संपूज्य पितृदेवताः। पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः। यस्मादभिसरणोऽस्त्राणां विजयः समुदाहृतः। पूजामंत्रा
न्प्रवक्ष्यामि पुराणोक्तान्नहं तव। यैः पूजिताः प्रयच्छन्ति कीर्तिमायुर्यशो बलम्। । अथ मंत्राः विष्णुधर्मोक्ताः। छत्रस्य
। यथांबुदश्छादयति शिवायेमां वसुंधरां। तथाच्छादय राजानं विजयारोग्यवृद्धये। चामरस्य। शशांककरसंकाश
क्षीरडिंडीरपांडुर। प्रोत्सारयाशु दुरितं चामरामलदुर्लभ। अश्वानामष्टधार्यैरेवंतपूजनमहं करिष्ये। सूर्यपु
त्र महाबाहो छायाहृदयनंदन। शांतिं कुरु तुरंगाणां रेवंताय नमो नमः। अनेन मंत्रेण पूजा। अश्वस्य। गंधर्वकुल

जातस्त्वं माभूयाः कुलदूषकः। ब्राह्मणः सत्यवाक्येन सोमस्य वरुणस्य च। प्रभावाच्च ऊतारास्य वर्द्धयत्वं तुरंगमान्। अने
जसा चैव वसूयेस्य मुनीनां तपसा तथा। रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च। स्मर त्वं राजपुत्रस्त्वं कौस्तुभं च मणिं स्म
र। यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा। भ्रूणहा नृतवादी च क्षत्रियश्च पराङ्मुखः। सूर्याचंद्रमसो [illegible] वायु
यावत्स्पृशति दुष्कृतं। ब्रजाम्स्तां गतिं हि त्वं तच्च पापं भवेत्तव। निःसृतौ पदिक्षा गच्छेथा युद्धाध्वानि तुरंगमा। दिह त्वं जि
त्य समरे सह भर्त्रा सुखी भव। गरुडध्वजस्य। शार्ङ्गकेतो महावीर्य श्यामवर्णार्चिया म्पहं। पक्षिराज नमस्तेस्तु तथा नाराय
णध्वज। काश्यपेयारुणभ्रातर्नागारे विष्णुवाहन। अप्रमेय दुराधर्ष रणे देवारिसूदन। गरुत्मान्मारुतगति स्त्वयि
सन्निहितो यतः। सारवं सायुधान्म्नरत्नं च रिपून्दह। ग्रपपताकायाः। ऊतमुग्वसवो रुद्रा वायुः सोमो महर्षयः।
नागकिन्नरगंधर्वयक्षभूतगणग्रहाः। प्रमथास्त्र सहादित्यै भूतेशो मातृभिः सह। शक्रः सेनापतिः स्कन्दो वरु
णश्चाश्रितस्त्वयि। प्रदहन्तु रिपून्सर्वान्राजा विजयमृच्छतु। यानि प्रयुक्तान्यरिभिरायुधानि समंततः। पतंतु
परिशत्रूणां हतानि तव तेजसा। हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा। कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने।
शोभितासि तथैवाद्य शोभयास्मान्स्वसं स्मर। नीलान्श्वेतान्निमान्दृष्ट्वा नश्यंत्वाशु नृपारयः। व्याधिभिर्विवि

२५ धैर्यैरिः शास्त्रैश्च युधि निर्जिताः । हतना रेवती नाम्ना कालरात्रिश्च या स्मृता ॥ दहं त्वां पुरि सन्सर्वान् पताके त्वं मया र
र्चिता । अपगजस्याकुमुदेश्च वलो पद्मः पुष्पदंतो पवामनः । सुप्रतीको जनो नीलएते षोडश देवयोनयः । ते त्वां पुत्रा
श्च पौत्राश्च वनान्य षोडश मां श्रिताः । भद्रो मन्द्रो मृगश्चैव गजैः संकीर्ण एव च । वने वने प्रसूतास्ते स्मरयोनिं महाग
जा । पांतु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः । भर्त्तारं रक्ष नागेंद्र स्वामिवत्प्रतिपाल्य तां । अश्वा नु हि जयेयु
द्धे गमने त्वस्ति नो व्रजेति । श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवो निलात् । स्थैर्यं गिरेर्जयं रुद्राद्यशो देवात्पु
रंदरात् । युद्धे रक्षंतु नागास्त्वां दिशश्च सह दैवतैः । अश्विनौ सह गंधर्वैः पांतु त्वां सर्वतः सदेति । अथ खड्गमंत्रः । अ
सिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः । श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च । एतानि तव नामानि स्वयमुक्ता
नि वेधसा । नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः । रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः । पिता पितामहो देवस्त्व
मां पालय सर्वदा । नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः । भाव शुद्धो मर्षणश्च अतितेजास्तथैव च । इयं येन
धृता क्षोणी हतश्च महिषासुरः । तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः । अथ छुरिकायाः । सर्वायुधानां प्रथमं
निर्मितासि पिनाकिना । शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभं । चंडिकायाः प्रदत्तासि सर्वदुष्टनिवर्हिणी । त

याविस्तारिता चासि देवानां प्रतिपादिता । सर्वसत्वांगभूतासि सर्वाशुभनिवर्हिणी । छुरिके रक्ष मां नित्यं शांतिं यछ
नमोस्तु ते । अथ कट्टारकपूजा । रक्षांगानि गजान्रक्ष रक्ष वाजिधनानि च । मम देहं सदा रक्ष कट्टारक नमोस्तु ते ।
कट्टारको मध्यदेशे कटारी इति प्रसिद्धः । धनुःपूजा । सर्वायुधमहामात्र सर्वदेवारिसूदन । चाप मां समरे रक्ष साकं
शरवरैरिह । ध्यतेरूपेन रक्षार्थं संहाराय हरेण च । त्रयीमूर्तिगतं देवं धनुरस्त्रं नमाम्यहं । कुंतपूजा । प्रासपात
य शत्रूंस्त्वं मनयानाकमायया । हत्वाणजीवितं तेषां मम सैन्यं च रक्षतो । चर्मपूजा । धार्मपद्स्त्वं समरे चर्मसैन्ये यशो
धमे । रक्ष मां रक्षणीयोहं तापनीय नमोस्तु ते । अथ कनकदंड मंत्रः । ओत्सारणाय दुष्टानां साधूनां रक्षणाय
च । ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये । यशो देहि सुखं देहि जयदो भव भूपतेः । ताडय स्वारिदृन्सर्वान्हेर
मदंड नमोस्तु ते । अथ दुंदुभिमंत्रः । दुंदुभे त्वं सपत्नानां घोरो हृदयकंपनः । भव भूमिपसैन्यानां तथा विजयव
र्द्धनः । यथाजीमूतघोषेण हृष्यंति वरवारणाः । तथास्तु तव शब्देन हर्षोस्माकं मुदावहः । यथाजीमूतश
ब्देन स्त्रीणां त्रासोभिजायते । तथा च तव शब्देन त्रस्यंत्वस्मद्विषो रणे । अथ शंखमंत्रः । पुण्यस्त्वं शंख पुण्यानां
मंगलानां च मंगलं । विष्णुना विधृतो नित्यमतः शांतिप्रदो भव । अथ सिंहासनमंत्रः । विजयो जयदो जेता रिपु

घातीशुभंकरः। दुःखहा धनदः शांतः सर्वारिष्टविनाशनः। एतेष्टौ सन्निधौ यस्मात्तव सिंहा महाबलाः। तेन सिंहासने स्थि
तिस्त्वं वेदैर्मन्त्रश्च गीयसे। त्वयि स्थितः शिवः शांतस्त्वयि शक्रः सुरेश्वरः। नमस्ते सर्वतोभद्र भद्रदो भव भूपतेः। त्रैलोक्य
जयसर्वस्व सिंहासन नमोस्तु ते। तथैव कर्मचित्रा निस्वानि स्वल्पानि शिल्पिभिः। लोहाभिसारिकं कर्म कृत्वैवं मन्त्र
पूर्वकम्। अष्टम्यां नियमं कृत्वा पूर्वाह्णे स्नानमाचरेत्। कुंकुमचंदनैश्चंपककैश्चतुःसमैः धोलविष्टैश्च। चर्चितगात्रीं
देवीकुसुमैरभ्यर्चयेच्छुभैः। कुमुदैस्सपद्मपुष्पैः सदीपधूपैस्सनैवेद्यैः। मांसैर्बल्युपहारैर्मंगलशब्दैः समुज्ज्व
लितैः। विहितच्छत्रैर्यानैः स्पंदनसितशस्त्रधारिभिर्लोकैः। तुष्टैः पश्वस्त्रादिभिर्निवेद्यते सर्वमेव भगवत्यै। दुर्गा
सा हृज्जनीया च तद्दिने द्रोणपुष्पकैः। ततः खड्गं नमस्कृत्य शक्रचूर्णं वध सिद्धये। इच्छेत विजयं राज्यं सुभिक्षं चात्मने नृपः
। पुनः पुनः प्रणम्याशिंसं स्मरन् हृदये शिवां। सर्वं कृत्वेति कोरव्ये अष्टम्यां जागरं निशि। नटनर्त्तनगीतैश्च कारयेत्सुम
होत्सवं। एवं हृष्टो निशां नीत्वा प्रभाते प्ररुणोदये। घातयेन्महिषान्मेषानग्रतो ननु केधरान्। शतमर्धशतं वापि तद
र्द्धं वा यथेच्छया। सुरासवघटैः कुंभैस्तर्पयेत्परमेश्वरीं। कापालिकप्रस्तुद्देयं दासीदासजनेन वा। ततो परान्हस
मयेन वम्यां वैरथे स्थितां। भवानीं भामयेद्राष्ट्रे स्वयं राजा सराष्ट्रवान्। कश्चिच्चोपोषितो वीरो विध्वतो नृपेन खड्ग

वान्नाभूतेभ्यस्तु बलिं दद्यान्मंत्रेणानेन साधिपः ॥ सरक्तं सजलं चान्नं गंधपुष्पादिसंयुतं ॥ त्रींस्त्रीन्वारान्समूलेन
दिग्विदिक्षु किरेद्बलिं ॥ मंत्रश्च ॥ बलिं गृह्णंत्विमे देवा आदित्या वसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगाः
ग्रहाः ॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्यो यक्षवेतालायोगिन्यः पूतनाः शिवाः ॥ जृंभकाः सि
द्धगंधर्वा माला विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्त्तारो ब्रह्माद्या
श्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ॥ इति महाष्ट
मी ॥ महानवमी तु पूर्वयुता ग्राह्या ॥ पूर्वोक्तवचनात् ॥ नवमी दुर्गाव्रते श्रावणीति दीपिकोक्तेः ॥ श्रावणी दुर्गनव
मी दूर्वा चैव हुताशनी ॥ पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति ॥ हेमाद्रौ पाद्योक्तेश्च ॥ भविष्येपि ॥ आश्व
युक्शुक्लपक्षे स्यात्तु अष्टमी मूलसंयुता ॥ सा महानवमी प्रोक्ता त्रैलोक्येपि सुदुर्लभेति ॥ मूलमुपलक्षणं ॥ दुर्गा
पूज्या सुनवमी मूलाद्यृक्षत्रयान्विता ॥ महती कीर्तिता तस्यां दुर्गां महिषमर्द्दिनीं [illegible] लभेद्गात्रं ॥ अत्र
त्रयोदश्यादिसर्गे विशेषः ॥ यानि तु लोकाचारोदयगामिन्यां तिथावुदयगामिन्या विमध्याह्नादिप्राप्तुकानि
तानि नवमीभिन्नतिथिपराणि नवम्यां विशेषोक्तेः ॥ वेधश्च तु [illegible] पि हेमाद्रिम

२६ ते मुहूर्त्तं दयात्मा पि वेधोस्ति तथापि नवम्येव ग्राह्या सायं तु त्रिमुहूर्त्तैव तन्मतेन दीपिकायां। त्रिमुहू
र्त्तगा तु सकला सायं मिति। माधवोपि। सायं तु तत्र स्यात्तदन्यून यात्तु तदन्विता ... तेन त्रिमुहूर्त्तं योगे
पूर्वा नवमी पूर्वोक्तवचनात्। न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति स्कांदे ... निषेधाच्च। त्रिमुहूर्त्त
योगाभावे तु निषिद्धापि परैव कार्येति निष्कर्षः। यत्तु। नवम्यां च जपं होमं समाप्य व्रतपारणं पिबेति संग्रहोक्तेः
व्रतं च जागरश्चैव नवम्यां विधिवद्बलिरिति देवीपुराणाच्च। नवम्यां होमबल्यादि विहितं तत्राष्टमीयुक्ता मुख्या
नवमी मुहूर्त्तं वा कला यदि। सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिरिति सौरपुराणात्। सूर्योदये प
रं सिन्धाह्नाल्ल्पादपरा यदि। बलिदानं प्रकर्त्तव्यं तत्र देशेषु भावहं। बलिदाने कृते ष्टम्यां पुत्रभंगो भवेन्नृप
ति मदनरत्ने देवीपुराणाच्च बल्यादौ परा कार्या। उपवासादौ तु पूर्वेति मदनरत्ने उक्तं। अत्रापमार्त्तण्डे प्येवम्।
यत्तु अष्टम्यां बलिदानेन पुत्रनाशो भवेद्ध्रुवमिति कालिकापुराणं तत्संधिहृज्ञापाराशस्यपरम्। अष्टमीन
वमीसंधौ तत्री यावत्खलु कथ्यते। इति तत्रैवोक्तेः। कामरूपनिबंधे। अष्टम्याः शेषभागश्च नवम्याः पूर्व एव च।
तत्र या क्रियते पूजा विज्ञेया सा महाफला। अष्टमीमात्रे भवत्येव। आश्विने शुक्लपक्षे तु अर्धरात्रे ष्टमीयुते। घात

यंति पशून् भक्त्या ते भवंति महाफलाः। तथा। कन्यासंस्थे रवावीशे शुक्लेऽष्टम्यां प्रपूजयेत्। सोपवासो निशार्द्धे तु
महाविभवविस्तरैः। तथा। पशुघातश्च कर्त्तव्यो गवयाजवधस्तथेति रूपनारायणीये देवीपुराणात्। तत्रैव भवि
ष्ये। तस्मादियं महापुण्या नवमी पापनाशिनी। उपोष्या तु प्रयत्नेन सततं सर्वपार्थिवैः। निर्णयदीपे तु महान
वमी पूर्वदिनेऽपराह्णव्यापित्वे परा अन्यथा पूर्वा। आवर्त्तनात्सर्वकाले नवमी स्यात्परेऽहनि। दुर्गार्चा तत्र पूर्वेद्युः
पूर्वा कोल्लष्टमी यदीति धौम्यवचनादित्युक्तं। अस्य तु शारदनवमीविषयत्वं समूलत्वं च विमृश्यं। यानि तु। नंदा
यां ज्वलते वह्निः श्रवणे याऽपशुघातनं। भद्रायां कुलकोलक्रीडा तत्र राज्यं च विनश्यतीति। नवम्यामपराह्णे तु बलिदा
नं प्रशस्यते। दशमी वर्जयेत्तत्र नात्र कार्या विचारणेति। नंदायां दर्शने रक्तो बलिदानं दशासु च। भद्रायां गोकु
लक्रीडा देशनाशाय जायते। इति ब्रह्मवैवर्त्तनारदादिवचनानि। तानि शुद्धाधिकनिषेधपराणीति मदनरत्ने।
तथा कालिकापुराणे। नवम्यां बलिदानं तु कर्त्तव्यं तु यथाविधि। जपं होमं च विधिवत्कुर्यात्तत्र विभूतये। केचित्तु
पूर्वाषाढायुताष्टम्यां पूजा होमाद्युपोषणमिति सर्वोक्तदेवीपुराणादष्टम्यां होममाहुः। अन्ये तु द्विविधवाक्य
वशादष्टम्यामारभ्य नवम्यां समापयेदिति। समुच्चयस्त्वयुक्तः। रुद्रयामले तु विकल्प उक्तः। तत्तु निर्मूलं। दुर्गाभ

क्तितरंगिण्यादिगौडग्रंथेपिध्वेनवम्यांहोमउक्तः। होमेचविशेषउक्तोडामरतंत्रे। पायसंसर्पिषायुक्तंतिलैःशुक्लैर्विमि
27 श्रितं। होममेयेविधिवद्भक्त्यादशांशेनतपोत्तम। रुद्रयामलप्रायेयथाहोमोमंत्रेणैकेनसाध्यते। तथात्रैवजपेहोमंश्लोके
नैकेनसाधयेत्। यद्यासमसप्तशतीजप्येहोमेमंत्रोनवाक्षरः। ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे। इतिनवाक्षरइतिकेचन। द्विजोक्तो
ग्राह्यइतितुयुक्तम्। रुद्रयामलेपि। यथातुद्रव्यमुद्दिष्टंपायसान्नंतिलास्तथा। किंशुकैःसर्षपैःश्वेतैर्लाजाद्वैर्वाकु
रैरपि। यवैर्वाश्रीफलैर्दिव्यैर्नानाविधफलैस्तथा। रक्तचंदनखंडैश्चगुग्गुलैश्चमनोहरैः। प्रतिश्लोकंचजुहुयात्स
वेदव्याणिचक्रमात्। नवार्णरेणवाऊल्वानमोदेव्याइतीतिचेति। रहस्येतु। प्रतिश्लोकंतुजुहुयात्पायसंतिलस
र्पिषेत्युक्तं। दुर्गाभक्तितरंगिण्यांतुतिलैर्जयंतीमंत्रेणचहोमउक्तः। पुरश्चरणकार्यंतुबिल्वपत्रयुतैस्तिलैरितिका
लिकापुराणोक्तेबिल्वपत्रैश्चेतिस्मार्त्ताः। तन्न। अत्रमानाभावात्। अथबलिदानं। तत्रमेषच्छागमहिषस्व(
मांसानामुत्तरोत्तरप्राशस्त्यं। फलविशेषश्चान्यतोवसेयइतिदिक्। बलिप्रकारस्तुदेवीपुराणे। कन्यासंस्थेरवौशुक्ले
शुक्लाष्टम्यांप्रपूजयेत्। द्रोणपुष्पैश्चबिल्वाम्रजातीपुन्नागचंपकैः। पंचाब्दंलक्षणोपेतंगंधपुष्पसमन्वितं। वि
धिवत्कालिकालीतिजप्त्वाखड्गेनघातयेत्। ॐ कालिकालिवज्रेश्वरिलोहदंडायैनमः इतिमंत्रः। तदुत्थरुधि

रं मांसं गृहीत्वा घृतनादि पुष्पादिना द्वारकी विदारी पापराक्षसः । नैरृतेभ्यः प्रदातव्यं महाकौशिकमंत्रितं ।
मंत्रस्तु वक्ष्यते । तथा । तस्याग्रतोन्नतः स्नाया कृत्वा प्रातुं तु पेष्टिकं । खड्गेन घातयित्वा तु दद्यात्स्कंदविशाखयोः ।
अशक्तौ ब्राह्मणेन च कूष्मांडादिभिर्बलिदानं कार्यमिति तदुक्तं कालिकापुराणे । कूष्मांडमिक्षुदंडं च मांसं सासारसमेव
च । एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा । रुद्रयामलेपि । छागाभावे तु कूष्मांडं श्रीफलं वा मनोहरं । वस्त्रसं
वेष्टितं कृत्वा छेदयेत्क्षुरिकादिना । तथा । ब्राह्मणेन सदा देयं कूष्मांडं बलिकर्मणि । श्रीफलं वासुराधीश छेदं नै
व तु कारयेत् । छेदविकल्पः । माषान्नं वा बलिं देयो ब्राह्मणेन द्विजोत्तम । कालिकापुराणे । उत्तराभिमुखो भूत्वा ब
लिं पूर्वमुखं तथा । निरीक्ष्य साधकः पश्चादिमं मंत्रमुदीरयेत् । पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः । प्रणमा
मि ततः सर्वरूपिणं बलिरूपिणं । चंडिकाप्रीतिदानेन दातुरापद्विनाशन । चामुंडाबलिरूपाय बले तुभ्यं नमो
स्तु ते । यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा । अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः । ऐं ह्रीं श्रीं
मिति मंत्रेणानेन तं बलिं तत्र [illegible] असि तु ध्यायन्मूर्ध्नि तस्मात्तु भैरव । रसना त्वं चंडिकायाः सुरलोक
प्रसाधक । [illegible] खड्गं च पूजयेत् । पूजयित्वा नमः खड्ग [illegible] कुं फडिति मं

चकैः। गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमं। ॐ ऐं ह्रीं श्रीं कौशिकीति रुधिरेणाप्याय तामिति। बलिदाने तु दुर्गायाः
२८ सर्वत्रायं विधिः स्मृतः। मत्स्यसूक्ते। नवम्यां सर्ववस्तु कर्त्तव्यमृतिमिष्टता। दक्षिणां वस्त्रसुवर्णं च आचार्याय निवेद
येत्। अथात्र प्रसंगात् सप्तशतीचंडीविधानमुच्यते। रुद्रयामले। शतचंडीविधानं च प्रोच्यमानं मया शृणु। सर्वोप
द्रवनाशार्थं शतचंडीं समारभेत्। षोडशस्तंभसंयुक्तं मंडपं पल्लवोज्ज्वलं। वसुकोणयुतां वेदीं मध्ये कुर्यात्त्रिमा
गतः। पश्चिमे कल्पितां रम्यामनुरूपां हस्तमात्रां। पंचवर्णरजोभिश्च कुर्यान्मंडलकं शुभं। पंचवर्णवितानेन च किं
किणीजालमंडितं। आचार्यं ब्राह्मणान् विधिवद्वरयेद्दश सुव्रतान्। ईशान्यां स्थापयेत्कुंभं शर्वोक्तविधिना हरे। वा
रुण्यां च प्रकर्त्तव्यं कुंडं लक्षणलक्षितं। मूर्त्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै। तदर्द्धेन तदर्द्धेन तदर्द्धेन महामते।
अष्टादशभुजां देवीं कुर्यात्साष्टकरामपि। पट्टकूलयुगच्छन्नां देवीं मध्ये निधापयेत्। देवीं संपूज्य विधिवत् जपं
कुर्युर्द्विजाः। शतमावर्त्तनं चाथ तेजपेन्मंत्रं नवार्णकं। चंडीसप्तशतीमध्ये संपुटोऽयमुदाहृतः। एकं द्वे त्रीणि च
त्वारि जपेद्दिनचतुष्टयं। रूपाणि क्रमशस्तद्वत् हव्यजनादिकमाचरेत्। पंचमे दिवसे प्रातर्होमं कुर्याद्विधानतः। गु
डूचीपायसं दूर्वांस्तिलान्मधुलाजान्यथानपि। चंडीपाठस्य होमं तु प्रतिश्लोकं दशांशतः। होमं कुर्यात्सहस्राद्भिः सभि

राज्यच्युतस्य नक्रमात् । ऊत्वा मृत्युञ्जतिं दद्याद्विप्रेभ्यो दक्षिणां क्रमात् । कपिलां गां नीलमणिं श्वेताश्वं छत्रचामरे । अ
भिषेकं ततः कुर्युर्यजमानस्य ऋत्विजः । एवं कृते समरे स्नान सर्वसिद्धिः प्रजायत इति ॥ ॥ अथ सहस्र
चंडी । सा च तत्रैवोक्ता । सहस्रचंडीविधिं वक्ष्ये शृणु विप्रा महामते । राज्यभ्रंशे महोत्पाते जनमारे महाभये । गजमारे
श्वमारे च परचक्रभये तथा । इत्यादिविविधे दुःखे क्षयरोगादिजे भये । सहस्रचंडिकापाठं कुर्यात्कारयेत्तथा । जा
पकाः स्युः शतं प्रोक्ता विंशाश्च स्त्रस्रमंडपः । भोज्याः सहस्रं विप्रेभ्यः शगोधान दक्षिणां दिन्नोत्त । गुरवे द्विगुणं देयं शय्या
दानं तथैव च । सतधान्यं च भूदानं श्वेताश्वं च मनोहरं । पंचनिष्कमितामूर्त्तिः कर्त्तव्या वार्द्धमानतः । अष्टादशभुज
जा देवी सर्वायुधविभूषिता । अवारितान्नदातव्यं सहस्रं प्रत्यहं विभो । स्नातं वा नियताहारः । पयः पानेन कर्त्तयेत् ।
एवं यश्चंडिकापाठं सहस्रं तु समाचरेत् । तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणेति । एतद्द्वयं यद्यपि महाति
वं धेयुक्तं तत्पापविप्रचरक्रूपत्वादुक्तमिति दिक् । वाराहीतंत्रे । संकटे समनुप्राप्ते दुर्भिक्षे कि त्स्या भये तथा । जाति
ध्वंसे कुलोच्छेदे व्यायुषो नाशमागते । वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये । तथैव त्रिविधोत्पाते तथा चै
वोपपातके । कुर्याद्यत्नाच्छतावृत्तं ततः संपद्यते शुभं । श्रेयो वृद्धिः शतावृत्ता राज्यवृद्धिस्तथापरा । मनसा

चिंतितं दं विसिद्ध्येद्दशोत्तराच्छतात्। सहस्रवर्त्तनाल्लक्ष्मीरावृत्तेणेति स्वयं स्थिरा। भुक्त्वा मनोरथान् कामान् नरो मो
क्षमवाप्नुयात्। चंड्याः शतावृत्तिपाठात् सर्वाः सिध्यंति सिद्धयः। इति शतचंडीसहस्रचंडीविधिः। अथ नवरात्रपार
णनिर्णयः। सा च दशम्यां कार्या। आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकं। प्रतिपदादिक्रमेणैव यावच्च नवमी भ
वेत्। त्रिरात्रे वापि कर्त्तव्यं सप्तम्यादियथाक्रमम् इति हेमाद्रौ धौम्यवचनात्। नवमीतिथिपर्यंतं वृद्ध्या पूजाजपादि
कमिति प्रागुक्तवचनेन नवमीपर्यंतं प्रधानभूतपूजायुक्तेरुपवासादेश्चांगत्वेन तत्पर्यंतत्वात्। आदिशब्देनोपवासो
क्तः। तृतीयोक्तत्रिरात्रव्रते नवम्या अनुपोष्यत्वाच्च। न च पारणांतत्वेन त्रिरात्रत्वं। विष्णुत्रिरात्रादौ तथाप्रयुक्तेः। न चात्रो
पवासे मानाभाव इति वाच्यं। एवं च विंध्यवासिन्या नवरात्रोपवासतः। एकभक्तेन नक्तेन तथैवायाचितेन च। पूजनीया
जनैर्देवी स्थाने स्थाने पुरे पुरे इति हेमाद्रौ भविष्योक्तेः। नवरात्रसमाख्यातेन नवम्या अनुपोष्यत्वाच्च। ननु तिथिह्रा
सेष्टावप्युपवासा भवंतीति कथं समाख्या। तेन कर्मविशेषे नवरात्रशब्दो रूढः। अत एवोक्तं देवीपुराणे। तिथिवृद्धौ
तिथिह्रासे नवरात्रमपार्थकमिति चेन्न। तिथिह्रासेपि नवतिथीनामुपोष्यत्वान्नवरात्रत्वादतेः। एतेन रात्रीलो
प्रधान्याद्ध्रासेऽष्टमामायनवत्वमिति मूर्खोक्तिः परास्ता। यत्तु देवीपुराणे। कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदि

कोऽयाचीस एवैकाशीनक्ताशीवा एवायत इति व्रतचतुष्टयमुक्तं तन्नौहाभिसारिकविषये। तस्य जयाभि
लाषीन्टपतिः प्रतिपत्समारभ्य तिक्रमात्। लौहाभिसारिके कर्मकारयेद्यावदष्टमी। तिमविष्ण्वेष्टमीपर्यंतमेवोक्ते॥
रूपनारायणेन तु नंदादिव्रतप्रयोगं दृष्ट्वा एवोक्तं तस्य नवम्यां पारणमुक्तम्। यदपि निर्णयदीपे। आश्विने शुक्ल
पक्षे तु नवरात्रमुपोषितः। नवम्यां पारणं कुर्याद्दशमी मिश्रिता न चेत्। दशमी मिश्रिता यत्र पारणे नवमी भवेत्। दुः
खदारिद्र्यदात्तेया न यात्रव्रतविनाशिनीति ब्राह्मने नाम्ना लिखितं वचनं। यच्च रुद्रयामल इति वदंति। अष्टम्यां सह का
र्यस्यान्नवमी पारणे दिने। यो मोहाद्दशमीवेधे नवम्यां चंडिकां यजेत्। पारणं च प्रकुर्याद्वै तस्य पुण्यं निरर्थकं। नव
म्यां पारिता देवी कुलवृद्धिं प्रयच्छति। दशम्यां पारिता देवी कुलनाशं करोति वै। तस्मात्तु पारणं कुर्यान्नवम्यां विबुधा
धिपेत्यादीनि यदि समूलानि तदा लौहाभिसारिके नंदादिव्रतचतुष्टयविषयाणि तस्याष्टमीपर्यंतमेवोक्ते रित्थु
क्तं प्राक्। अन्यथा महाष्टम्यां परविद्धायां पारणविधाने [redacted] ष्टवे निवंधे विरोधो दुर्वारः स्यात्। यानि तु केश्विल्लि
खितानि नवम्यां पारणविधायकानि वचनानि तानि हेमाद्यादिविरुद्धत्वान्निर्मूलानि। समूलत्वेपि यदा दिनद्वये न
वमीतदा द्वितीयदिने उपोष्यतिथ्यंते पारणा न किंतु नवमीमध्ये कोपि स्येवं नेयानि शिवरात्रिपारणवत्। अत्र केचि

30

त्। पारणाहे सूतकादिप्राप्तौ तदतिक्रम्य पारणं कुर्यादित्यर्थः। तन्मदं। काम्योपवासे प्रक्रांते तु रामन्तसूतके। तत्र काम्यव्रतं
कुर्याद्दानार्चनविवर्जितमिति माधवीये कौर्मोक्तेः। व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे। प्रारब्धे सूतके न स्यादनारब्धे तु
सूतकमिति विष्णुवचनाच्च। आरोग्ये च मद्यपि तत्कर्तव्यतावगतेः। पारणं तत्वाद्व्रतस्य। प्रारंभस्तु नैवोक्तः। प्रारंभो वरणं य
ज्ञे संकल्पो व्रतसत्रयोः। नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति। रुद्रयामलेपि। सूतके पारणं कुर्यान्नवम्यां होम
पूर्वकं। तदंते भोजयेद्विप्रान्दानं दद्याच्च शक्तित इति। तदंते सूतकांते। एवं स्त्रीभिरपि रजोदर्शनमध्येकर्त्तव्यमेव पार
णं। संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रतमिति माधवीये ऋष्यशृंगवचनात्। द्वादशीव्रतमित्युपलक्षणम्। प्रारब्ध
दीर्घतपसां नारीणां यद्रजो भवेत्। न तत्रापि व्रतस्यस्यादुपरोधः कदाचनेति तत्रैव सत्यव्रतवचनात्। किंच। एकादश्या
दौ पंचपात्रेण च पाते मासांते पारणापत्तिः। मासोपवासांते पंचपात्रेण च पाते जीवनासंभवश्च। यत्तु। नियमस्थायदाना
रीप्रपन्नेपदं तरारजः। उक्तोप्येवं तु ताराचीः स्नात्वा शेषं चरेद्व्रतमित्यंगिरोवचनं। यच्च हारीतवचनम्। नियमस्था व्रत
स्थास्त्री रजः प्रपन्नेप तत्कथंचन। त्रिरात्रे तु द्दिवेदूर्द्धं व्रतशेषं समापयेदिति। तद्विधवोपवासविषयं। तासां तत्र भोग
नानिषेधादिति केचित्। वयं तु प्रागुक्तसत्यवचने दीर्घतपसामिति विशेषणोपादानाद्द्वादशीव्यतिरिक्तसकले

काम्योपवासविषयोयं निषेधः। त्रिरात्रनवरात्रादिदीर्घव्रतेषु रजोमध्य एव पारणेति ब्रूमः। आशौचमध्ये तु सर्
वोपि पारणा भवति प्रागुक्तकौर्मवचनादिति सिद्धम्। अयं चोपवासपारणानिर्णयः सर्वव्रतेषु बोद्धव्य इत्यलं भूय
सा। दशम्यां देवीं विसर्जयेत्। तदुक्तं दुर्गाभक्तितरंगिण्यां देवीपुराणे। ततः प्रातः प्रपूज्य त्वा दशम्यां विधिपूर्वकम्।
संप्रेषणं तु कर्त्तव्यं गीतवादित्रनिस्वनैः। रूपं देहि यशो देहि भगं भगवति देहि मे। पुत्रान्देहि धनं देहि सर्वान्का
मांश्च देहि मे। महिषघ्नि महामाये चामुंडे मुंडमालिनि। आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते। इति संप्रार्थ्य दे
वीं तु तत उत्थापयेद्बुधः। उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह। ग
च्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके। व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह। इति उत्थाप्य जलं नीता। दुर्गे
देवि जगन्मातः स्वस्थानं गच्छ पूजिता। संवत्सरे व्यतीते तु पुनरागमनाय वै। इमां पूजां मया देवि यथाशक्त्योपपा
दितां। रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम्। इति जले प्रवाहयेत्। इयमेव विजयादशमी। सा च द्वितीयदि
ने श्रवणयोगाभावे पूर्वा ग्राह्या। तदुक्तं हेमाद्रौ स्कांदे। दशम्यां तु नरैः सम्यक् पूजनीयापराजिता। क्षेमार्थं वि
जयार्थं च पूर्वोक्तविधिना नरैः। नवमीशेषयुक्तायां दशम्यामपराजिता। ददाति विजयं देवी पूजिता जयवर्धिनी।

तथा। आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः। एकादश्यां न कुर्वीत पूजनं चापराजिताम् इति। यदा तु पूर्वदिने श्रवणयो
3। गाभावः। परदिने चाल्पापि तद्योगिनी तदा परैव। तथा च हेमाद्रौ अनंतकोऽङ्कस्यपः। उदये दशमी किंचित्संपूर्णैकादशी य
दि। श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा। श्रवणर्क्षं तु पूर्णायां काकुत्स्थः प्रस्थितो यतः। उल्लंघयेयुः सीमानं
तद्दिनर्क्षे ततो नराः इति। काले अपराह्णे। परदिने श्रवणाभावे तु सर्वपक्षेषु पूर्वैव। मदनरत्ने ज्योतिर्निबंधे
रत्नकोशे च नारदः। ईषत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः। विजयो नाम कालोऽयं सर्वकार्यार्थसिद्धिदः। इ
ष्टदशमी शुक्लां पूर्वविद्धां न कारयेत्। श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने। सूर्योदये यदा राजन् दृश्य
ते दशमी तिथिः। आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः। अत्रायं निर्गलितार्थः। अपराह्णो मुख्यः कर्म
कालः। तत्रैव पूजाद्युक्तेः। प्रदोषो गौणः। तत्र दिनद्वये अपराह्णव्याप्तौ पूर्वा प्रदोषव्याप्तेराधिक्यात्।
दिनद्वये प्रदोषव्याप्तौ परा। अपराह्णव्याप्तेराधिक्यात्। इदं च श्रुतितिथ्यावन्यकाले श्रवणस्तु रोहिणीव
दप्रयोजकः। दिनद्वये अपराह्णास्पर्शे तथात्वे वा श्रवणयुता पूर्वा। तत्रापि परदिने अपराह्णे श्रवणसत्त्वे
सत्त्वापि परैवेति दिक्। अत्र विशेषो मार्गबांधवे नदीपिकायां भविष्ये। दशमीयुक्ते जगन्नाथे नक्ता नाम भयंकरं।

अर्चयित्वाश्मीहृद्विपर्च्येये च्चततः पुनः। शमीमंत्रस्तु हेमाद्रौ गोपथब्राह्मणे। अमंगलानां शमनीं शमनीं दु
ष्कृतस्य च। दुःस्वप्ननाशिनीं धन्यां प्रपद्येहं शमीं शुभां। तथा भविष्ये। शमी शमयते पापं शमी लोहितकंटकी। धारि
ण्यर्जुनबाणानां रामस्य प्रियवादिनी। करिष्यमाणयात्रायां यथाकालं सुखं मया। तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपू
जिते इति। तथा गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं। गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति। ततो भूषण
वस्त्रादि धारयेत्स्वजनैः सहेति। अत्र बलनीराजनमुक्तं स्मरते। तत्र मंत्रः। चतुरंगबलं मह्यं निररिष्टं व्रजत्वि
ह। सर्वत्र विजयो मेस्तु त्वत्प्रसादात्सुरेश्वरीति। गौडनिबंधे ज्योतिषे। कृत्वा नीराजनं राजा बलवृद्ध्यै यथा
क्रमं। शोभनं खंजनं पश्येज्जलगोगोष्ठसन्निधौ। अस्य फलानि बृहस्पतिभाष्युमदे प्राध्यानं तत्रैव वृत्तेयाः। आश्विनपौ
र्णमास्यां वरलक्ष्म्या। सावित्रीव्रतमंतरेण भवतोऽमापौर्णमास्योः परे इति दीपिकोक्तेः। अत्र विशेषस्तिथितत्त्वे
लैंगे। आश्विने त्वापौर्णमास्यामचरेज्जागरं निशि। कौमुदी सा समाख्याता कार्या लोकैर्विभूतये। कौमुद्यां पू
जयेल्लक्ष्मीमिंद्रमैरावतस्थितं। सुगंधिर्निशि सद्वेषः अक्षैर्जागरणं चरेत्। तथा। निशीथे वरदा लक्ष्मीः को जा
गर्तीति भाषिणी। तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः। अत्रैवाश्वयुजीकर्म पाककर्माश्वलायनेन।

आश्वयुज्या आश्वयुजीकर्मेति तत्रैव पर्वणि कार्यं विहितत्वात् । आग्रयणं तु पर्वणि कार्यं । शरद्याग्रयणं नाम
32 पर्वणि स्यात्तदुच्यते शरदि शौनकोक्तेः । तत्राविशेषपर्वणि कार्यमिति प्रागुक्तेः । तच्च व्रीहिभिरिष्ट्वा व्रीहिभिरेव य
जेत यवैश्चायवैरिष्ट्वा यवैरेव यजेत व्रीहिभ्य इति । प्रकृत्या दर्शपौर्णमासयोरेकैकमेकेनैकद्रव्यनियमात् ।
दर्शेष्ट्याः परं पौर्णमासेष्ट्याः प्रागसंभवतीति हेमाद्र्यादयः । दर्शेष्ट्याः परमुक्तमाग्रयणं कैः प्राक्पौर्णमासाद्व
तदिति दीपिकोक्तेश्च । यच्चाग्रयणं त्रेधा व्रीह्याग्रयणं यवाग्रयणं श्यामाकाग्रयणं चेति । एवं कालः प्रकृतो ग
हमेधी व्रीहियवाभ्यां शरद्वसंतयोर्यजेत श्यामाकैर्नीवारैर्वर्षास्वापत्काले वाऽनपुरालेवेति । आपस्तंबोपि
। वर्षासु श्यामाकैर्यजेत शरदि व्रीहिभिः वसंते यवैर्येषु चतुर्वेणुयवैरिति । तत्रापि श्यामाकाग्रयणमनित्यमि
तरेतु [illegible] नाहिताग्नेर्नित्ये । यवाग्रयणं च कार्यमिति स्मार्तेष्वनाद्युक्तेः । त्वात् । [illegible] व्रीहियवदेवतासंबंधानानेव
मेष्वामाश्रायणमाम्नानाच्च । आहिताग्नेस्तु यवाग्रयणस्यानित्यत्वमुक्तं । अपिवाऽक्रियायावेष्विति [illegible] त्वात् । पक्वाव्री
ह्याग्रयणे न समानतंत्रता । श्यामाके तु मध्यस्तारं कुर्यान्नाग्रयणं । यदेवतादपि समानतंत्रमित्यापादिनारायणा
वृत्तोपरि [illegible] भवतामुलभमित्यलं । इदं च पर्वाभावे कृत्तिकापदेऽदेवनक्षत्रे कृत्तिकादिविशाखांते कार्यमिति स्मृत्यर्थसा

रेउक्तम्। बौधायनीये केशवस्वामिना प्येमुवेक्तम्। परिशिष्टे। श्यामाकैर्व्रीहिभिश्चैव यवैश्चान्योन्यकालर
तः। आग्रयणं तु युज्यते वर्षे नह्यत्राग्रयणात्ययः। त्रिकांडमंडनोप्येवं। यदा त्वेतदाश्विनपौर्णमास्यां क्रियते तदैक
कालत्वादाश्वयुजीकर्मणोऽस्य च समानतंत्रता भवति। तदेतद्वृत्तिकृताप्येकवर्हिरिध्याज्यैतिसूत्रे स्पष्टमुक्तं। अथ
स्याकरणे प्रायश्चित्तमुक्तं स्मृतिचंद्रिकायां कात्यायनेन। नित्ययज्ञात्यये चैव वैश्वदेवद्वयस्य च। अनिष्ट्वा नव
यज्ञेन नवान्नप्राशने तथा। भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत्। कारिकायां। अकृताग्रयणोश्नीयान्नर
वान्नं यदि वै नरः। वैश्वानरो यकर्त्तव्यश्चरुः स्वर्णाजतिस्त्ववेति। ऋग्विधाने तु। समिंद्ररायामंत्रेच च वर्षे वर्षे ज
पेच्छतं। आग्रयणं यदा न्यूनं तदा संपूर्णमेति तदित्युक्तं। एतच्च यदि मलमासे कार्यमन्यथानेति प्रागुक्तं
। अन्योप्याहिताग्न्यादिविशेषः शौनकादेर्ज्ञेय इत्यलं भूयसा।। इति श्रीमट्टकमलाकरकृते निर्णयसिंधौ आ
श्विनमासः।। ।।अथ कार्त्तिकमासः। तुलासंक्रमणे प्राक्परा दश घटिकाः
पुण्याः। रात्रौ प्रागुक्तम्। अथ कार्त्तिकस्नानं। तत्र पृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः। तुलामकरमेषेषु प्रातः
स्नानं विधीयते। हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति सौरमास उक्तः। साध्यश्चोक्तं देवाद्रियंते। दाहि

णात्तु। आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत्। कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत् सुधीरिति पाद्मोक्तेः। भार्गवार्च
33 ने च। प्रारभ्यैकादशीं शुक्लामाश्विनस्य तु मानवः। प्रातःस्नानं प्रकुर्वीत यावत्कार्त्तिकभास्कर इति विष्णुरहस्योक्तेः। हेमा
द्रौ चादिपुराणे। हलोच्चाश्वियुजे मासि पौर्णमास्यां समाहितः स्नात्वा मासं समग्रं परया च भक्त्या समाप्यते कार्त्तिक
पौर्णमास्यामित्यंतेभिधानाद्वा आश्विनशुक्लैकादश्यां पौर्णमास्यां वारभ्य कार्त्तिकशुक्लैकादश्यां पौर्णमास्यां वा समाप
येदित्याहुः। मदनपारिजाते विष्णुः। कार्त्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः। जपन् हविष्यभुक् शांतः सर्वपापैः प्र
मुच्यते। अत्र देशविशेषः पाद्मे कार्त्तिकीप्रक्रमे। कुरुक्षेत्रे कोटिगुणो गंगायामपि तत्समः। ततोधिकः पुष्करे स्याद्द्वा
रवत्यां च भार्गव। पुल्याः पुर्यश्च सप्तैव मुनयो मथुराधिकाः। दुर्लभः कार्त्तिको विप्र मथुरायां नृणामिह। यत्रार्चि
तः स्वकं रूपं भक्तेभ्यः संप्रयच्छतीति। इदं च स्नानं काश्यां पंचनदे प्रतिप्रशस्तं। एतेन समस्तपस्तस्नाकृतेमह
प्राप्यते फलं। तत्कार्त्तिके पंचनदे सकृत्स्नानेन लभ्यते। कार्त्तिके बिंदुतीर्थे यो ब्रह्मचर्यपरायणः। स्नास्यत्यनुदिने
मानैर्भानुजातस्य भीः कुतः इत्यादि काशीखंडोक्तेः। भानुजो यमः। इदं च प्रातःस्नानं संध्यां च कृत्वा कार्यम्। तेन विने
तरकर्मानधिकारादिति वर्द्धमानः। यद्यपि प्रातःसंध्यायाः सूर्योदये समाप्तिस्तथापि वचनबलादनुदितहोमवद्भ

तुलसीकाष्ठसंभवां। वहते यो नरो भक्त्या तस्य नैवास्ति पातकं न जलात् तुलसीमालां ५७

विति छ्यं। स्नानमंत्रश्च तत्रैव। कार्त्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन। प्रीत्यर्थं तव देवेश दामोदर मया सह। इमं मं
त्रं समुच्चार्य्य मौनी स्नायाद् व्रती नरः इति। अर्घ्यमंत्रोपि तत्रैव। व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम। गृहाणार्
घ्यं मया दत्तं दनुजेन्द्रनिषूदन। नित्ये नैमित्तिके कृष्ण कार्त्तिके पापनाशने। गृहाणार्घ्यं मया दत्तं राधया सहितो हरे।
इमं मंत्रं समुच्चार्य्य यो र्घं मह्यं प्रयच्छति। सुवर्णरत्नपुष्पाद्यैः पूर्णं शंखेन पुण्यवान्। सुवर्णपूर्णां पृथिवीं तेन दत्ता
न संशयः इति। एवं संपूर्णे स्नानान्तरे क्रोऽहं स्नायात्। वाराणस्यां पंचनदे अहं स्नातस्तु कार्त्तिके। अमी ते पुण्यवपु
षः पुण्यमाज्ञातिनिर्मला इति काशीखंडोक्तेः। अथ मालाधारणं। तत्र स्कान्दे। कार्त्तिकमाहात्म्ये। निवेद्य केशवे मालां
धात्रीमालां विशेषतः। महापातकसंहंत्रीं धर्मकामार्थदायिनीं। विष्णुधर्मे। स्पृशेत्तु यानि लोमानि धात्रीमालाकलेन्द
णां। तावद्वर्षसहस्राणि वैकुंठे वसतिर्भवेत्। मालायुग्मं तु यो नित्यं धात्रीतुलसिसंभवं। वहते कंठदेशे तु कल्पको
टिदिवं वसेत्। तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये। बिभर्मि त्वामहं कंठे कुरु मां कृष्णवल्लभं। एवं संप्रार्थ्य विधि
वन्मालां कृष्णगलेर्पितां। धारयेत्कार्त्तिके यो वै स गच्छेद्वैष्णवं पदमिति। अत्र मूलं चिंत्यं। तथा काशीखंडे। कार्त्तिके
मासि मे यात्रा यैः कृता भक्तितत्परैः। विंदुतीर्थे कृतस्नानैस्तेषां मुक्तिर्न दूरतः। मार्गे वा चेन्न दीपिकायां नृसिंहपुराणे। अ

34 गन्धकुसुमैर्देवं योऽर्चयेज्जनार्दनं। दर्शनात्तस्य देवर्षे नरकं नाप्नुते नरः। विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं। कार्त्तिके यो
र्चयेद्भक्त्या वाजपेयफलं लभेत्। स्कांदे कार्त्तिकमाहात्म्ये। मालतीमालया विष्णुः केतक्या चैव पूजितः। समाः सहस्रं सुप्रीतो भ
वतु मधुसूदनः। दृष्ट्वा चंद्रोदये पाद्मे। कार्त्तिके नार्चितो येन कमलैः कमलेक्षणः। जन्मकोटिषु विप्रेंद्र न तेषां कमलागृ
हे। कार्त्तिके केशवे दत्ता येषां नाम्ना सुतैः कृता। ते निर्मलस्थिरवैः पुत्रं वसंति त्रिदिवे सदा। तुलसीदललक्षेण कार्त्तिके यो
र्चयेद्धरिं। पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलं। स्कांदे कार्त्तिकमाहात्म्ये। धात्रीछायां तु यः कुर्यात्पिंडदानं महामुने।
मुक्तिं प्रयांति पितरः प्रसादान्माधवस्य तु। धात्रीफलविलिप्तांगो धात्रीफलविभूषितः। धात्रीफलकृताहारो नरो नाराय
णो भवेत्। धात्रीछायां समाश्रित्य योऽर्चयेच्चक्रधारिणं। पुष्पे पुष्पेऽश्वमेधस्य फलं प्राप्नोति मानवः। तथा। कार्त्तिके
मासि विप्रेंद्र धात्रीवृक्षोपशोभिते। वने दामोदरं विष्णुं चित्रान्नैस्तोषयेद्विभुं। मूलेन पायसेनाथ होमं कुर्याद्द्विजदणः
। ब्राह्मणान्भोजयेच्छक्त्या स्वयं भुंजीत बंधुभिरिति। तथा। कार्त्तिके द्विदलव्रतं प्रागुक्तम्। कार्त्तिके द्विदलं त्यजेदिति
। पाद्मेऽपि। कार्त्तिकमाहात्म्ये। राजिकां मादकं चैव नैवाद्यात्कार्त्तिकव्रती। द्विदलं तिलतैलं च तथान्नं नातिदूषितं। स्कां
स्कांदेऽपि। कार्त्तिके वर्जयेत्तद्वद्द्विदलं बहुबीजकं। माषमुद्गमसूराश्च चणकाश्च कुलत्थकाः। निष्पावा राजमाषाश्च

ढकोद्विदलं स्मृतं। नूतनान्यपि जीर्णानि तानि सर्वाणि वर्जयेत्। अत्र केचित्। उप्यन्ति समये दलद्वयं यस्य भवति
तद्भूतसर्वं गत्वा द्विदलमुच्यते इत्याहुः। उदाहरंति च। बीजमेव समुद्भूतं द्विदलं चांकुरं विना। दृश्यते यत्र तस्यैव द्विद
लं तन्निगद्यते इति। अन्ये तु लक्षणायामानाभावात् वचनस्यैव निर्मूलत्वात् द्विदलात्मकं यस्य स्वरूपं तदेव वर्जयेदि
त्याहुः। तथा नारदीये। कार्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु। कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुक्तसंधितं। कांस्य
तत्पात्रभोजनं। शुक्तं पर्युषितं। संधितं लवणशाकः। तत्रैव। कार्त्तिके विष्णुमूर्त्यग्रे दीपदानादिवर्जितः। तथा।
कार्त्तिके तु कृतादौ हि तानि जन्मविमोचनी। तथा। कार्त्तिके कृच्छ्रसेवी यः प्राजापत्यपरोऽथवा। एकांतरोपवासी वा त्रि
रात्रोपोषितोऽपि वा। षड्वा द्विदशपक्षं वा मासं वा वरवर्णिनि। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन भैक्षे
ण व्रजते परमं पदं। अन्येऽपि नियमाः प्रायुक्ताः। यथा। पयो मुक्त्वा स्कंदे। व्रीहयो यवगोधूमाः प्रियंगुतिलशालयः। एते
हि सात्विकाः प्रोक्ताः स्वर्गमोक्षफलप्रदाः। काशीखंडे। ऊर्जे यवान्नमश्नीयादेकान्नमथवा पुनः। वृंताकं सूरणं चै
व शूकशिंबीश्च वर्जयेत्। पृथ्वीं वंशोदयेपाद्ये। नोर्जे बिंब्यो विधानत्वा व्रतिना केनचित्क्वचित्। तथा। नारदीये। अ
व्रतेन स्वपेद्यस्तु मासं दामोदरप्रियं। तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणा। अन्यान्यपि तानि वूलांतैलताम्बूल

35 केशकर्त्तनादिवर्जनसंकल्परूपाणि प्रागुक्तानि। तथा। कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे। तुलायां तिलतैलेन
सायंकाले समागते। आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति। महतीं श्रियमाप्नोति रूपसौभाग्यसंपदमिति। तद्विधिश्च हेमाद्रौ आ
दिपुराणे। दिवाकरेऽस्ताचलमौलिभूते गृहाद्दूरे पुरुषप्रमाणं। यूपाकृतिं यज्ञियवृक्षदारुमारोप्य भूमावथ तस्य मूर्ध्नि। यवां
गुलच्छिद्रयुतास्तु मध्ये द्विहस्तदीर्घास्त्रयपट्टिकास्तु। कृत्वा च तस्मोऽष्टदलाकृतीस्तु याभिर्भवेद्दुष्टदिशानुसारी। तत्कर्णि
कायां तु महाप्रकाशो दीपः प्रदेयो दलगास्तथाष्टौ। निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराजे। प्रजापतिभ्य
स्त्वथ सत्पितृभ्यः प्रेतेभ्य एवाथ तमःस्थितेभ्यः इति। अपरार्के तु न्योमंत्रो यथा। दामोदराय नभसि तुलायां लोलया स
ह। प्रदीपं ते प्रयच्छामि नमोऽनंताय वेधसे इति। कार्त्तिककृष्णचतुर्थी करकचतुर्थी सा चन्द्रोदयव्यापिनी ग्राह्या। दिनद्व
ये तत्त्वे पूर्वा। कार्त्तिककृष्णद्वादशी गोवत्ससंज्ञा प्रदोषव्यापिनी ग्राह्या। दिनद्वये तत्त्वे पूर्वा। सुनमनाक्यात्। वत्सपूजाव
रश्चैव कर्त्तव्या प्रथमेहनीति निर्णयामृतेऽभिधानाच्च। अत्र विशेषो मदनरत्ने भविष्ये। सवत्सां तुल्यवर्णां च शीलिनीं गां
पयस्विनीं। चंदनादिभिरालिप्य पुष्पमालाभिरर्चयेत्। अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः। पादमूले तु दद्याद्वै
मंत्रेणानेन पांडव। क्षीरोदार्णवसंभूते सुरासुरनमस्कृते। सर्वदेवमये मातर्गृहाणार्घ्यं नमो नमः। ततो माषादिसंभूता

त्वयैकानुविनिवेदयेत्। सुरभि त्वं जगन्मातर्देवि विष्णुपदे स्थिता। सर्वदेवमये ग्रासं मया दत्तमिदं ग्रस॥ ततः। सर्वदे-
वमये देवि सर्वदेवैरलंकृते। मातर्ममाभिलषितं सफलं कुरु नंदिनि॥ इति प्रार्थयेत्। तथा। तद्दिने तैलपक्वं च स्थाली-
पक्वं युधिष्ठिर। गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत्॥ ज्योतिर्निबंधे नारदः। आश्विने कृष्णपक्षे तु द्वादश्यादिषु पंचसु
। तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः॥ नीराजयेयुर्देवांस्तु विप्रान् गांश्च तुरंगमान्। ज्येष्ठान् श्रेष्ठान् जघन्यां-
श्च मातृमुख्याश्च योषितः इति। निर्णयामृते स्कांदे। कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे। यमदीपं बहिर्दद्यादप-
मृत्युर्विनश्यति॥ मंत्रस्तु। मृत्युना पाशदंडाभ्यां कालेन श्यामया सह। त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मि-
ममेति। कार्तिककृष्णचतुर्दश्यां प्रभाते चंद्रोदयेऽभ्यंगं कुर्यात्। तदुक्तं निर्णयामृते भविष्योत्तरे। कार्तिके कृ-
ष्णपक्षे तु चतुर्दश्यामिनोदये। अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः॥ इनश्चंद्रः। मदनरत्ने। कालादर्शे च वि-
धूदय इति पाठः। दिनोदय इति पाठांतरं। सूर्योदयोत्तरं त्रिमुहूर्तं स्नानं वदतां गौडानां तदनुसारिणां चात्र तै-
व। एवं विद्धचतुर्दश्यां कार्तिकस्यासिते तरे। पाद्मेऽप्युषःसमये स्नाने कुर्यात्प्रयत्नत इति गौडाः। स्मृतिदर्प-
णेऽपि। चतुर्दशी चाश्वयुजस्य कृष्णा स्वातीयुक्ता च भवेत्प्रभाते। स्नानं समभ्यज्य नरैः स कार्यं।

सुगंधतैलेन विमृतिकामैरिति। पृथ्वीचंद्रोदये ज्योतिषे। आश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूदये। तिलतैलेन कर्त्त
36 व्यं स्नानं नरकभीरुणेति। कर्त्तव्यं मंगलस्नानं नरैर्निरयभीरुभिरिति कालादर्शे पाद्मः। उभयत्राश्वयुगित्यमावास्यांतर
मासमभिप्रेत्योक्तं। तथा। तैले लक्ष्मीर्जले गंगा दीपावल्यां चतुर्दशीं। चंद्रोदये प्राप्येति शेषः। प्रातःस्नानं तु यः कुर्याद्य
मलोकं न पश्यतीति। दिनद्वयेपि चंद्रोदये चतुर्दशीसत्वे तदभावे प्यरुणोदये। सत्वे तदभावे वा दिनद्वये चतुर्दश्याः सा
म्ये च पूर्वदिने भ्यंगं कुर्यात्। पूर्वविद्धचतुर्दश्यामिति वचनात्। पूर्वदिन एव वा सत्वे सैव ग्राह्या। दिनद्वये प्यसत्वे
रुणोदयव्यापिनी ग्राह्या। पक्षे सत्पूर्वसमये इत्युक्तेः। वक्ष्यमाणवचनाच्च। तदभावे तु। चतुर्दशीकासंपूर्वे विधुः प्रवेश्य
पूर्वे क्षितिपयोदशीमध्ये एवाभ्यंगं कुर्यादिति दिवोदासः। केचिदत्र वचनमपि साधकं वदंति। तिथ्यादौ तु भवेद्यावान्
ह्रासो वृद्धिः परेहनि। तावान्ग्राह्यः स पूर्वेद्युरदृष्टोपि स्वकर्मणीति तन्मंदं। नहीदं वचनं पूर्वदिनस्य पूर्वं ग्राह्यत्वं वि
धत्ते। नक्तं जन्माष्टम्यादौ दिनद्वये कर्मकालव्याप्त्यभावे वाक्यांतरेण पूर्वदिनस्य ग्राह्यत्वमुक्तं। तत्र मुख्यकालेतत्ति
थ्यभावेपि तत्रैवानुष्ठाने बोधकमिदं। न चात्र तदस्तीति यत्किंचिदेतत्। तेन चतुर्दश्यामागामिनी ग्राह्या। अत एव स
र्वज्ञनारायणः। तथा कृष्णचतुर्दश्यामाश्विने कोदयात्पुरा। यामिन्याः पश्चिमे यामे तैलाभ्यंगो विशिष्यते इति। मंगो